सामान्याभावप्रकाशप्र
काशवाद

भवानन्दीप्रकाशे, काशिप्रदेशा

प प्र काशाः

१२७५

नं॰ १६८९

७प्रस्तोव्यास

पत्रे १२५

श्रीगणेशाय नमः ।। श्रीवक्रतुंडेवक्रगिरां व्याख्यानमपि कुर्वति ।। प्रतिबंधकसामान्याभाव
संपादकोऽत्यलं ।।१।। ननु यएवेत्यादि दीधितिग्रंथस्याप्रकृतत्वमथाकरोति व्याख्येति पूर्वो
क्तात्यंताभावघटितव्याप्तीत्यर्थः । तथा चोक्तव्याप्तिलक्षणानंतरमुपोद्घातसंगत्या सामा
न्याभावपार्थक्यव्यवस्थाननिमित्येतत्स्वघटकतया नाप्रकृतत्वमिति भावः । दीधितौ धिये
जनयंतीति अत्र विषयीभवनमेव जननं तेन धियो विषयीभवंतीत्यर्थः । तेन वह्नित्वस्या
तींद्रियद्व्यणुकवृत्तित्वेन तदवच्छिन्नाभावस्यातींद्रियद्व्यणुकवृत्तित्वेन तदवच्छिन्नाभा
वस्यातींद्रियतया विषयत्वेन लौकिकप्रत्यक्षजनकत्वासंभवेऽपि नासंगतिः वस्तुतस्तु
धीपदं प्रत्यक्षप्रमापरं तथा च प्रत्यक्षप्रमायां विशेषणविधया संनिकर्षस्य जन
कतया तद्घटकतया तादृशधीजनकत्वं वह्नित्वावच्छिन्नाभावस्याप्यक्षतं अपि वा अतीं
द्रियधर्मावच्छिन्नाभावस्यैव लौकिकप्रत्यक्षाभावेनातींद्रियवृत्तिधर्मावच्छिन्नाभावस्य
लौकिकप्रत्यक्षमस्त्येव तथा च रूपसामान्याभावादिवद्वह्निसामान्याभावस्यापि

लौकिकप्रत्यक्षाभावेनातीन्द्रियवृत्तिधर्मावच्छिन्नाभावस्य लौकिकप्रत्यक्षमसत्त्वेव तथा च स्वरूप
सामान्याभावादिवद्वह्निसामान्याभावस्यापि लौकिकप्रत्यक्षसंभवेन तस्यापि वह्निर्ना
स्तीति धीजनकत्वमप्यस्त्येव तथा चाध्येयं। तत्र चेति इदं च वैयधिकरण्येत्यनेनान्वितं व्याख्या
पां स्वं तत्र प्रतियोगितेति प्रतियोगितायाः। तत्र प्रतियोगितायाः तत्र प्रतियोगिस्वरूपत्वा
दिति भावः। एतेन सामान्याभावानंगीकारेपि सामान्यधर्मावच्छिन्नप्रतियोगिताया अ
तिरिक्तत्वांगीकारे नाव्याप्तिरित्यपि निरस्तं। प्रतियोगिवैयधिकरण्यस्य प्रतियोगितावच्छे
दकसामान्यघटितत्वेनैवमिति वक्ष्यमाणरीत्या नाव्याप्तिरत आह तथा च वा दृशेति
। तत्रत्वैवमपि पारिभाषिकावच्छेदकत्वघटितलक्षणे नाव्याप्तिः तत्र घटान्योन्याभावप्रतियोगि
तावच्छेदकवह्नित्वस्य यत्किंचिदवच्छेदकतत्रघटितत्वावच्छिन्नानधिकरणवह्नित्वविशिष्टसं
बंधि निष्ठतत्रघटान्योन्याभावप्रतियोगितावच्छेदकत्वादिति चेदत्राहुः। सामान्याभावानंगीकारे
पारिभाषिकावच्छेदकत्वघटकप्रतियोगिवैयधिकरण्यं प्रतियोगितावच्छेदकसामान्यघटि

भवानं॰ दी॰
२

तमेव वा साध्यं अन्यथा धूमत्वाविशिष्टसंबंधितोपि तत्र धूमत्वावच्छिन्नानधिकरणत्वेन धूमत्वस्य स्व
विशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वेनातिव्याप्त्यापत्तेरिति । गुरुधर्मोपि प्रतियो
गितावच्छेदक इत्याशयेनेदमित्यपि केचित् । यत्किंचित्प्रतियोगितावच्छेदकघटितप्रति
योगिवैयधिकरण्यघटितलक्षणेऽव्याप्तिराशंकितत्वेन नचैवमित्याद्यसंगतमतो भाव
माह तथा चेति धर्मेत्यमिति । अन्यथा व्याप्यवृत्तिसाध्यकाव्याप्तितादवस्थ्येन प्रतियोगि
वैयधिकरण्यस्याव्यावर्तकतापत्तेरित्याशयः । ननु घटाद्यभावस्यापि पर्वतावृत्तित्वादिरू
पतत्प्रतियोगिवैयधिकरण्यस्याव्यावर्तकतापत्ते तावच्छेदकावच्छिन्नवैयधिकरण्याभावेन
प्रतियोगिव्यधिकरणाभावप्रसिद्ध्या तिव्याप्त्यसंभवइतितथासतीत्यादिकमसंगत
मत आह । एवं सतीति । नलक्षणं । अनवच्छेदकत्वघटितलक्षणं । प्रतियोगितावच्छेदकसं
बंधेनेत्यादि । नन्वत्र संयोगेन तत्र द्रव्याभावस्य संयोगेन प्रतियोगितावच्छेदकाव
च्छिन्नानधिकरणगुणादिवृत्तित्वात्तथा व्याप्तिवारणाय हेतुसमानाधिकर

ॐ रामः
२

ण्णत्वोपादानेपि उभयाभावप्रतियोगिकोटौ साध्यतावच्छेदकसंबंधावच्छिन्नत्वोपादानं व्यर्थं न च सम
वायेन तत्तद्वह्न्यभावमादायाव्याप्तिवारणाय तदुक्तिरिति वाच्यं । सत्त्वस्यापि तदभावप्रतियोगिता
वच्छेदकत्वेन तस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यानाक्रान्तत्वादिति चेन्न । वह्न्यभा
वत्त्वादिशाकालिकेन विषयितया च तत्तद्वह्न्यभावस्यापि प्रतियोग्यधिकरणत्वेन तमादा
याव्याप्तिवारणाय तदुपादानस्यावश्यकत्वात् । तथा सतीति । एवं च सति धितौ तथा स
ती स्वस्वतदधिकरणे स्वावच्छेदकपर्याप्तिकिंचिदवच्छिन्नसत्त्व एव तत्र स्वावच्छेदकावच्छिन्नवैय
धिकरण्यानिरूपकत्वे इत्यर्थः । अभावान्तरमादायेत्याशङ्कितिं न चेति । जन्यमात्रस्य
कालिकोपाधितावभ्युपगमेनाह एवमिति । तन्मते इत्यादिना धूमवान् वह्नेरित्यादावतिव्या
प्त्यभिधानमसंगतं कालमात्रस्य धर्मस्य अभावप्रतियोगितानवच्छेदकत्वे धूमत्वाद्यव
च्छेद्यत्वाप्रसिद्ध्या प्रतियोगिताधर्मिकोभयाभावघटिततल्लक्षणस्येति व्याप्त्यसंभवात् न
चानवच्छेदकत्वघटित घटिततल्लक्षणस्याभिप्रायकमिदमिति वाच्यं । फलतोऽन्तरफक्किक

भवा·दी
३ नदे
3

योर्भिन्नत्वं लक्षणाभिप्रायकत्वे संदर्भविरोधात्त आह। एतद्वीत्येतीति अतिव्याप्तिभीत्येत्यर्थः। अंगी
कृत्येति। अतिव्याप्तिर्वा धर्तेतूति शेषः। वह्नित्वावच्छेदत्वाप्रसिद्धेरिति। अव्याप्तिः। एतद्वीत्यादेरिति
शेषः लक्षणमिति। अत्र च तद्वह्निमान् तत् धूमादित्यादौ विशेषरूपेण साध्यतायामव्याप्ति
वारणाय हेतुसमानाधिकरणत्वेन अभावविशेषणमुपात्तमिति ध्येयं। तद्रूपाभावस्येति। हुताशि
वृत्तितद्रूपत्वावच्छिन्नाभावस्येत्यर्थः। अभाव एवेति अभावांतराणामुपदर्शितरीत्या साध्यता
वच्छेदकसंबंधेन प्रतियोगिव्यधिकरणत्वाभावादिति भावः। प्रतियोगिव्यधिकरणः उभयाभा
वघटितप्रतियोगिव्यधिकरणत्वाश्रयः एवमग्रेपि। तथा च तादृशविशिष्टाभावमादायैव व
ह्निमान् धूमादित्यत्र लक्षणसमन्वय इति भावः। ननु सर्वत्राभावाभावस्य प्रतियोगिरूपत
योत्तद्रूपात्मकविशिष्टाभावस्य हेतुसमानाधिकरण्याभावेन कथं लक्षणः घटकत्वमत आ
ह अभावेतिप्रतियोग्यतिरिक्तेति स्ये पाठः। अभ्युपगमादिति। अन्यथा तस्य केवलान्व
यित्वानुपपत्तेरिति भावः। एतन्मते च सर्वोपि ग्रंथोनवच्छेदकत्वघटितलक्षणाभिप्रा

राम
३

यकत्वप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यभावेनात्यन्ताभावस्यापि व्याप्त्यसंभवात् एवमुत्तर
ग्रन्थे तु वादिमते पीति बोध्यं विशेषणतयेति तद्रूपवद्वृत्तित्वस्यानेनान्वितं । नन्वभावस्य प्रति
योगिविरोधित्वनियमेनोपदर्शिततद्विशिष्टाभावस्य केवलान्वयितया तद्रूपवद्वृत्तित्वावच्छिन्ना
भावत्वासंभवेन तदात्मकत्वमत आह न्यूनेति नोच्यत इति त्वाद्यवादिति शेषः । वाप्रवृत्तित्वे
ति ताद्दशनियमस्य केवलान्वय्यभावातिरिक्ताभावविषयकत्वादिति भावः तुल्यमिति इदमुप
लक्षणं निरुक्ताभावस्यैव प्रतियोगिव्यधिकरणत्वे अव्याप्यवृत्तिकतया हेतुसमानाधिकरणत्वस्य
वैयर्थ्यं प्रतियोगिव्यधिकरणत्वमपि साध्यतावच्छेदकसंबंधेन निरुक्तप्रतियोगिप्रतियोगि
कात्यन्ताभावगर्भमेव सुवचमित्यपि द्रष्टव्यं । तस्यापि आकाशस्यापि । तदभावोपि । आकाशा
भावोपि । तथात्वात् । प्रतियोगिव्यधिकरणः । तस्य तद्वृत्तित्वरूपप्रतियोगितावच्छेदकावच्छिन्न
समानाधिकरणत्वादिति भावः । यस्येत्यादि तद्धर्मावच्छिन्नाभावबुद्धिनियामकाभाव
स्यैव तद्धर्मावच्छिन्नप्रतियोगिताकत्वात् । तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वस्य च त

भवानं·टी·
४

धर्मावच्छिन्नाभावबुद्ध्यभावप्रयोजकाभावप्रतियोगित्वरूपत्वादिति भावः। तस्य नेति। अतीन्द्रिय
धूमखण्डकाभावस्य हृदावृत्तित्वावच्छिन्नाभावबुद्धिनियामकत्वादिति भावः। तस्यैव धूमखं
खण्डकाभावस्यैव प्रतियोगिव्यधिकरणत्वे तत्संभवे ऽतिव्याप्त्यसंभवादिति धूमत्वस्य सा
मान्यधर्मस्य विशेषाभावात्मकधूमखण्डकाभावप्रतियोगितावच्छेदकत्वादिति भावः। अ
थातीन्द्रियधूमखण्डकाभावस्य धूमत्वावच्छिन्नाभावबुद्धिनियामकत्वस्याप्यभावात्कथमे
तदिति चेन्न। धूमखण्डकवति धूमो नास्तीति बुद्ध्यभावेन धूमखण्डकाभावस्यापि धूमत्वा
वच्छिन्नाभावत्वाश्रयविशेषाभावकूटान्तर्गततया धूमत्वावच्छिन्नाभावबुद्धिनियामकधूम
त्वावच्छिन्नाभावसंपादनद्वारा धूमत्वावच्छिन्नाभावबुद्धिनियामकत्वात्। न चैवं रीत्या धू
मखण्डकाभावस्य हृदावृत्तित्वावच्छिन्नाभावबुद्धिनियामकत्वमप्यस्त्विति वाच्यम्। धूमख
ण्डकवति मृत्तिकाखण्डकादेरेव धूपसत्त्वेन तदभावस्यैव हृदावृत्तित्वावच्छिन्नाभावत्वाश्रय
विशेषाभावकूटान्तर्गततया हृदावृत्तित्वावच्छिन्नाभावबुद्धिनियामकहृदावृत्तित्वा

ॐ रामः
४

वच्छिन्नाभावसंपादनद्वारा हृदवृत्तित्वावच्छिन्नाभावबुद्धिनियामकत्वेन धूमद्व्यणुकाभाव
स्यातथात्वात् । न च विनिगमकाभावात् धूमद्व्यणुकाभावस्यापि तादृशविशेषा
भावकूटान्तर्गतत्वस्यात्वमिति वाच्यं । वह्निकाद्व्यणुकास्मिन्निति धूमद्व्यणुकस्यावश्यं
सत्त्वे योग्यताभावेन वह्निकाद्व्यणुकाद्यभावस्य तादृशविशेषाभावकूटान्तर्गतत्व
स्यावश्यकत्वात् यत्तु तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वं विषयत्वेनैजनकतया किं
तु तत्प्रमात्वनियामकतया एवं च हृदवृत्तित्वावच्छिन्नाभावबुद्धिनियामकत्वं धूमद्व्य
णुकाभावस्यापि अन्यथा धूमद्व्यणुकावति हृदो वृत्तिर्नास्तीति बुद्धेः प्रमात्वे प्रसंगा
दिति सूक्ष्मक्रमाकाशाभाव एव प्रतियोग्यसमानाधिकरण इति तन्न हृदं यस्य हृदवृत्तेर
भावाभावेनेत्यादिग्रंथाद्विषयत्वेन जनकतयोक्तरीत्या तद्धर्मावच्छिन्नाभावबुद्धिनि
यामकतद्धर्मावच्छिन्नाभावसंपादनद्वाराच्च तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वस्ये
वोपदर्शितरूपस्य लाभेन प्रमात्वनियामकतया तद्धर्मावच्छिन्नाभावबुद्धिनियाम

कत्वालाभात् तन्नाभेवोक्तरीत्या मृत्तिकाद्यणुकाद्यभावस्यैव हृदावृत्तित्वावच्छिन्नाभावबुद्धिप्र
मात्वनियामकत्वे तु धूमद्व्यणुकाभावस्य हृदावृत्तित्वावच्छिन्नाभावबुद्धिनियामकत्वा
संभवात्। वस्तुतस्तु अन्येतु वादिमते आकाशाभावस्यैव प्रतियोगिव्यधिकरणत्वे हेतुस
मानाधिकरणत्वस्याव्यावर्त्तकतया वैयर्थ्येन तद्वृत्तिव्याप्तिलक्षणत्वासंभवस्य दुष्परि
हरत्वात्। आकाशसाधारण हृदावृत्तित्वस्याकाशव्यावृत्त हृदावृत्त्यभावप्रतियोगितायाः
अतिरिक्तवृत्तित्वेनानवच्छेदकतया धूमाभावस्यापि प्रतियोगिव्यधिकरणत्वेन तद्व्याप्य
संभवाच्चाकाशाभाव एवेत्यस्यासंगतत्वाच्चेत्यतमसंभवदुक्तिकमेव एतेन संयोगेन
गोत्वाभाव एव प्रतियोगिव्यधिकरण इत्यनवच्छेदकत्वघटितलक्षणाभिप्रायकत्वं
सर्वोपि ग्रंथ इति नवीनोक्तिरपि चिंत्यैवेति दिक्। यद्यप्यनुगतेति सिद्धसाध्यव्याघातात् आह अ
नुगतरूपस्येति। अत्रेदं बोध्यं अनुगतधर्ममात्रस्य प्रतियोगितानवच्छेदकत्वमते
रूपं नास्तीत्यादि बुद्धीनां रूपत्वाद्यवच्छिन्नप्रतियोगिकयावदभावस्तत्र प्रतियोगिता

संबंधेन रूपादिकं च विषयः केवलान्वय्यवृत्तिधर्मावच्छिन्नाभावयोरप्यतिरिक्त
त्वाभावेन तादात्म्यातिप्रसंगाभावात्। नचैवमस्मदादीनामसार्वज्ञेन तादृशबु
द्धिर्न स्यादिति वाच्यं। सामान्यलक्षणया सकलरूपाद्युपस्थितौ तत्संभवात्। एव
मेतन्मते बाधबुद्धिप्रतिबंधकत्वमपि तन्न तद्वत्ताबुद्धिं प्रति तत्र प्रतियोगितासंबंधे
न तत्प्रकारकाभावनिश्चयत्वेनेति। अत्रेत्यादि विधिकोटिः परमते निषेधकोटिः सि
द्धांते घटाभावे रूपं नास्तीति प्रतीतेरभावद्वयविषयकत्वेन सिद्धसाधनादाह वायावि
ति। अत्रापि परमते विधिकोटिर्निषेधकोटिः स्वसिद्धांते। अत्र सामानाधिकरण्ये
न वह्न्यत्वे अभावांतरविषयकसमूहालंबनमादाय विधौ सिद्धसाधनं अवच्छे
दकावच्छेदेन वह्न्यत्वे तमादाय निषेधबाध इति विप्रतिपत्त्यंतरमाह अत्यंताभावे
त्यादि। अत्र विधिकोटिः सिद्धांते निषेधकोटिः परमते रूपत्वेदमुपलक्षणं तथा
च सिद्धांतिमते अत्यंताभाववृत्तिरूपत्वावच्छिन्नप्रतियोगिताकत्वस्वरूपकाला

भवानं-टी॰
६
6

वच्छेदेनरूपवत्त्वृत्तिभिन्नेउत्पत्तिकालावच्छेदेनरूपवत्त्वेरूपसामान्याभावेवृत्तित्वयाविधि
सिद्धिः पूर्वपक्षिमतेतुताद्दशरूपप्रागभाववृत्तित्वंताद्दशरूपत्वावच्छिन्नप्रतियो
गिताकत्वेनास्तीतिनिषेधसिद्धिः। अत्रेत्यादि। तत्तीयादिस्थलेत्पन्नवायुसंयोग
प्रागभावस्यरूपकालेपिपृथिव्यादौसत्वेनतस्यरूपत्वसामान्यावच्छिन्नप्रतियो
गिताकत्वेतदानींतत्रतद्वगाह्यभावप्रतीत्यापत्तिरतोद्वितीयस्थलेतिपृथिव्या
दिसंयोगप्रागभावस्यतत्वेसंयोगप्रतियोगिपृथिव्यादौतत्प्रतीत्यापत्तिरतो
वायुसंयोगेतिरूपप्रागभावस्यतत्वेवायौसकलानांरूपसामान्याभावानाप्र
तीत्यनुपपत्तिरतस्तत्परित्यागः सत्वादितितत्वेवाधकाभावादितिभावः। पृ
क्षासिद्धसाधनयोरर्थान्तरपरः तथाचताद्दशप्रागभावस्यतत्वेनार्थान्तरं
अतएवरूपप्रागभावत्यागः एकदेशिभिस्तस्यरूपसामान्याभावात्मकत्वोप
गमादितिभावः। वृत्त्यंतंअत्यंताभाववृत्तित्वविशेषणं वाधः। प्रसिद्धिवाधः। विसेष

राम
६

णामिति। अत्र भेदप्रतियोगिकोटौ रूपवत्त्वस्य विशेषणत्वे तु तादृशरूपसामान्याभावप्रसि
द्ध्या रूपकालावच्छेदेनेति न देयमेवेति ध्येयं सिद्धसाधनं अर्थान्तरं चेत्यंतं रूपवद्भिन्नत्व
भिन्नत्वविशेष्यतावच्छेदकतयोपादानमिति शेषः अर्थान्तरं निराकरोति रूपकाले इत्यादि
सम्यग्नैष्फल्यसंपादनाय रूपं कालावच्छेदेनेति वह्नित्वविशेषणं रूपवत्त्वस्य विशेषणत्वे
तु तन्न देयं तुच्छसिद्धिरेवेति। तथा च प्रकृतोपयोगित्वात्तत्रार्थान्तरमिति भावः उत्पत्ति
कालावच्छेदेन रूपसामान्याभावानंगीकर्तृप्राचीनमते उक्तं वि। प्रतियोगिनेरसंभवात्
द्यादिति।। दिगर्थस्तु रूपत्वावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्ति न वा रूपा
भावादिमुख्यविशेष्यिकारूपं नास्तीत्यादिप्रतीतिर्विशेषाभावकूटातिरिक्तमुख्य
विशेष्यिकाघटेत्यादिकाधिविप्रतिपत्तिः संभवतीति नैयायिकमतेऽन्यथानुपपत्तेः
प्रमाणत्वाभावादाह। संशयेत्यादि। अत्रान्यथानुपपत्तिर्विशेषाभावभेदाभाव
वत्ति सामान्याभावप्रकारकसंशयाभावरूपा विशेषाभावभेदाभावभेदाभावव्या

पवानंदी·
७
7

पक्षीभूतो यो विशेषाभावनिर्णयकालीनसामान्याभावप्रकारकसंशयनिष्ठकोटितासं-
सर्गावच्छिन्नप्रतियोगिताभाववृत्तप्रतियोगित्वरूपव्यतिरेकव्याप्तिपर्यवसिताय-
दि सामान्याभावो विशेषाभावभिन्नो न स्यात् तदा कोटितासंसर्गेण विशेषाभावनि-
र्णयकालीनसामान्याभावप्रकारकसंशयवान् स्यादित्याकारकविषयपरिशोधक-
तर्कपर्यवसितायाश्च अन्यथानुपपत्तिघटकतंत्रे लाभयलाभसंभवात् । एतदुत्कीर्तनमे-
व किमर्थमिति तु न शंक्यं । रूपसामान्याभावो रूपत्वव्याप्यधर्मावच्छिन्नाभावभिन्नः
कोटितासंबंधेन तादृशाभावाभावनिर्णयकालीनतत्समानाधिकरणतत्समान-
धर्मितावच्छेदककरूपसामान्याभावप्रकारकसंशयादिति संशयलिंगकानुमाने
दृष्टान्ताभावेन विशेषतोऽन्वयव्याप्यसत्वेन यत्वतत्वाननुगमेन सामान्यतोऽन्वयव्याप्य-
संभवेन च व्यतिरेकव्याप्तिसत्वोत्कीर्तनस्याप्रयोजकत्वशंकानिराकरणाय अनुकूल-
तर्कसत्वोत्कीर्तनस्य चावश्यकत्वात् । अत्र सामान्यतोऽनुगतसंशयत्वस्य दुर्वचत्वेया

राम
७

हेतुतावच्छेदककोट्योरूपसामान्याभावप्रकारकसंशयत्वनिवेशस्यावश्यकतासामान्य
तः संशयत्वं निवेश्य घटाभावादेर्हेतुत्वसंभवेनान्वयव्याप्तिः संभवतीति शंकाया
नावकाशः । इति निःसंशयप्रमाणं प्रतीतिप्रमाणमाचष्टे इत्यर्थः । नन्वत्र कृदन्ताद्व्याख्याना
त्कृत्तद्धितप्रकृतिप्रत्ययात्यादिः प्रकृतिवत्कारकमित्यनुशासितेन कृदन्तोत्तरप्रत्याख्या
नाख्येणिजन्तत्रकृत्तौ लोपः प्रकृतिपरावृत्तिः कृदन्तकारकस्याण्यंत प्रकृतिप्रतिपा
द्यक्रियाकारकतुल्यत्वमित्यर्थकेन कंसकर्मकवधमाचष्टे कंसं घातयतीति वत्
प्रकृते कृत्तद्धितप्रकृतिप्रत्ययोपन्नि[illegible]प्रमाणयतीत्येवप्रयोगस्य साधुत्वे प्रमाणयती
ति चेद्यत्राहुः कृदन्ताद्व्याख्यानादित्यत्र कृदन्तपदं भावकृदन्तपरं तेन प्रकृते प्रमाण
पदस्य करणल्युडन्तत्वेन करणकृदन्ततया भावकृदन्तत्वाभावेन कृत्तद्धितप्रकृति
प्रत्ययोपत्योरसंभवेन प्रमाणयतीति प्रयोगस्यैव साधुत्वं न तु प्रमापयतीति प्रयो
गस्येति वस्तुतस्तु कृदन्ताद्व्याख्यानादित्यत्राख्यानशब्दस्य कंसवधरूपक्रियारूपार्थं

भवानं·टी
८
५

घुपाख्यानपरत्वमाश्रित्य कृते प्रमाणशब्दस्योपाख्यानत्वाभावेन हल्लुकृप्रकृतिप्रत्ययापत्तौ
रप्रसङ्गात् प्रमापयतीति प्रयोगस्यासाधुत्वोपपत्तौ इदंतच्छब्दस्य भाय इदंत्वपरतया
संकोचे मानाभावः। युज्यते चैतत्। अन्यथाख्यानशब्दस्य शब्दमात्रपरत्वे पाकमाच
ष्टे पाकयति इदमाचष्टे पाकयति इदमाचष्टे इदयति ऊदिमाचष्टे ओदयतीत्यादिप्रयो
गानुपपत्तेः पाचयतीदं हयति काहयतीत्यादिप्रयोगापत्तेः व्याख्यानशब्दउपाख्यान
परइत्येतत्सर्ववैयाकरणग्रंथकलापविरोधापत्तेश्च आख्यानशब्दस्य शब्दमात्रपरत्वे शब्द
भिन्ने इदंत्वाभावेनाव्यावर्तकत्वयाख्यानशब्दोपादानस्यैव वैयर्थ्यापत्तेश्चेति मासस
र्वमपहाय सुधीभिराकलनीयमिति संक्षेपः तथाच कथमन्यथेत्यादिमूलस्य
मुख्यतो विशेषाभावमेहसाधकप्रमाणप्रदर्शकत्वं सहकारितया व्यतिरेकव्या
प्यनुकूलतर्कप्रदर्शकत्वमिति पर्यवसितं। तथा तु कथमन्यथेत्यादिमूलं सा
मान्याभावेऽपि विशेषाभावाभिन्नः स्यात्तथा विशेषाभावकूटनिश्चयकालीनतस

ॐ राम
८

मानधर्मिकतत्समानाधिकरणसामान्याभावसंशयकोटिर्नस्यादित्यनुकूलतर्कस्यैव प्रदर्शकत्वेन
तत्तात्पर्यकमेव तथा च प्रमाणानुग्रहदर्शनेन न्यूनतां परिहर्तुं तदुक्थस्य कथंचित्प्रमाणतात्पर्यकत्व
मप्याह। संशयेतीति संशयस्य विशेषाभावकूटनिश्चयकालीनसामान्याभावसंशयकोटित्वस्य
अन्यथा। सामान्याभावस्य विशेषाभावाभिन्नत्वे अनुपपत्तिं अभावापादनं तन्मूलभूतव्यतिरे
कव्याप्तिमितिं यावत् प्रमाणपति। प्रमाप्रयोजकोकरोतीति तथा च तर्कमूलीभूतव्यतिरेकव्याप्ति
ज्ञानादेः सामान्याभावो विशेषाभावभिन्नः विशेषाभावकूटनिश्चयकालीनतत्समानधर्मि
कतत्समानाधिकरणसंशयकोटित्वात् घटाद्यभाववदिति प्रकृतानुमानं तर्कमूलीभूत
व्यतिरेकव्याप्तिज्ञानस्यैव प्रकृतानुमानोपयोगपन्वयव्याप्तिज्ञानात्मकत्वादिति पर्यवसित
मित्याहुः। तच्चिन्त्यं। उक्तस्य रत्वात् प्रमेयसिद्धेर्मुख्यतः संभवे मुख्यतस्तर्कपरत्व कथंचित्प्र
मा [illegible] प्रमाणाधीनतया पूर्वोपदर्शितरीत्या कथमन्यथेत्यादिमूलस्य मुख्यतः।
प्रमाणतात्पर्यकत्वकथंचित्तर्कपरत्वयोः संभवे मुख्यतस्तर्कपरत्वकथंचित्प्रमाणपरत्वो

१

पक्षतानानोपि स्यात्। किंच संशयत्वस्यानुगतस्य प्रकारविशेषमनंतर्भाव्य दुर्वचत्वाद्धेतु
तावच्छेदककोटिरूपसामान्याभावकोटिकसंशयत्वनिवेशस्यावश्यकत्वेन घटाघटभा
वादौ दृष्टांतत्वासंभवेनान्वयव्याप्तिज्ञानस्य प्रकृतानुमानोपयोगित्ववर्णनमप्यसंगत
संकर्षं चित्वनुगतसंशयत्वनिवेशेपि विशेषाभावस्य दृष्टांतत्वसंभवेनान्वयव्याप्तेरेव तर्कमू
लत्वसंभवेन घटाघटाभावेपि विशेषाभावभेदासिद्धोक्तानुमाने दृष्टांतत्वासंभवेन यदु
क्तार्थासंगतिः स्फुटैवेति विभुज्ञांतःकरस्यैरेव सूक्ष्मदृशावधातव्यमित्यलमनल्पज
ल्पनेन। ननु रूपविशेष्यकवायुवृत्तित्वतदभावकोटिकसंशयस्यापि वायुवृत्तित्वसामान्या
भावसाधकतया प्रकृतोपयोग एवेत्यत आह व्याख्यायांरूपाभावेति। संशयस्येवेति। एव
कारेणोक्तसंशयव्यवच्छेदः। उक्तरीत्या प्रसिद्धरूपाभाव इत्यादिमूलोक्तरीत्याशंकासंदर्भ मि
वेति। वायुविशेष्यकसंशयस्य सम्यं त वायुपदघटितवाक्येनानुल्लेखादिति भावः। रूप
वायाविति। नन्वस्य रूपप्रकारकतया [illegible] रूपाभावनिश्चयप्रतिबध्यतावच्छेदकत्वोपगा

मान्नत्तीबइत्तिवाच्यं। तथात्वस्य समवायावच्छिन्नाधेयतासंसर्गकत्वेनानिस्तारादिति चेन्न
। तत्संबंधावच्छिन्नाधेयतया: प्रतियोगितावच्छिन्नतत्संबंधात्मकतयादोषात्। तस्मि
न् तदभावाव्यतरनिश्चयस्येति भ्रमनिराकरणाय। तन्नद्भावयोरिति। रूपसामा
न्याभावसत्त्वे। रूपसामान्याभावस्य विशेषाभावानतिरिक्तत्वे। विशेषाभावनि
श्चयदशायां बाधावित्तिशेषः क्वचित्त्रयैदपाठः। तादृशासंशयोपि। रूपेवा पृथ्वीत्वसंशयो
पि ज्ञानांतरेति घटेनृ तत्त्ववृत्तित्व तदभावाव्यतरनिर्णयात्मकज्ञाने सर्वः। अत्रवा
ख्यात्रा प्रथममततीयमतयोरेवास्वरसप्रदर्शनेन मध्यममतं दीधितिकारसंमतमिति प्रतीय
ते। मात्वास्तु चरममतमेव सम्यक् दीधितिकारसंमतं च संशये कोटिप्रकारतानेपत्य
रत्वेन मध्यममतापेक्षया पुत्कर्षात्। न च स्वातंत्र्येण प्रतिबंधकताकल्पनगौ
रवमुक्तमेवेति वाच्यं। प्रकारसाधारण्येन तद्वैशिष्ट्यावगाहितायाएव तदभावनिश्चय
प्रतिबध्यतावच्छेदकत्वेन तदभावात् प्रतिबंधकताप्रतिपादकग्रंथोपि तत्प्रप्रतिबंध

मवा नं॰ टी॰
१०
10

धकतापरएवेत्याहुः । इतिवाक्यस्येति । तथा चाभावप्रतियोगितयावत्वस्योपलक्षणत्वविशे
षणत्वाभ्यां विकल्पचतुष्टयं बोध्यमिति भावः । शेषेति प्रतियोगिताऽभावयोरिति यद्य
पि प्रथममभावोपन्यास एवोचितस्तथैवोपक्रमात्तथापि तच्छब्देन प्रतियोगिपराम
र्शसौकर्याय पश्चात्तस्यैवोपन्यासः । यावद्विशेषाभावहेतुकसामान्याभावानुमितिस्थले
विशेषाभावे यावत्वनिर्णयस्यावश्यकत्वादिति । योग्यानुपलब्धेरिति । व्याख्यायां रूपत्व
सामानाधिकरण्येनेति । प्रसिद्धरूप इति शेषः । प्रामाणिकमिति । तादृशाभावनिश्चयेपि
तादृशसंभावनायां संशयो स्यादनुभवादिति भावः । मिलितघटद्वये इति । एकत्र वह्निः
संयुक्तघटद्वये इत्यर्थः तत्र विशेषाभावकूटस्यैव वह्निः संनिकृष्टत्वादिति भावः । ननु रूपा
भावस्य प्रक्रान्तत्वेन रूपाभावस्य चेत्येव वक्तुमुचितमत आह । अत्रेति । तेन रूपे यावद्वि
शेषाभावाधिकरणवृत्तित्वविशिष्टरूपेण । सामान्यावच्छिन्नप्रतियोगिकत्वतत्त्व इति पाठः
रूपत्वावच्छिन्नप्रतियोगिताकत्व इति पाठे तेन रूपेण तस्य यावद्रूपविशेषाभावाधिकरण

राम
१०

वृत्तित्वविशिष्टत्वरूपेणेत्यर्थो बोध्यः न संभवतीति भावाभावकरं वित्तत्वदोषापत्तेरिति
शेषः न मेव विरुद्धोऽनीति भावाभावकरं वित्तत्वमपीति । तदवच्छेदेन वृत्तीति यावद्विशेषा
भावाधिकरणवृत्तित्वावच्छेदेनवेत्यर्थः । तादृशेति । सामान्यावच्छिन्नेत्यर्थः । संभवादि
ति । अन्यथा विशेषाभावप्रतीत्यनुपपत्तेरिति भावः । तत्र सामान्यावच्छिन्नप्रतियो
गिताकत्वेनावच्छेदकम् । न्यूनवृत्तित्वादिति शेषः । तत्रापि विरोधांतरवत्यपि । संभ
वति चेत्तीति । अत्र संभवति चेत्यादिः अतिरिक्तत्वादित्यंतः एको ग्रंथः । तथा च तादृश
प्रतियोगितायाः अतिरिक्तत्वे च इदं च तादृशप्रतियोगितायाः अतिरिक्तत्वाभिधा
नं च । असत्त्वसंभवादिति । तथा च तादृशप्रतियोगितायाः अतिरिक्तत्वमनावश्यक
मिति भावः । अत्र वदंति । इदमपि प्रोक्तन्यायेनैवोक्तम् । तथापि तादृशप्रतियोगिताकत्व
विशिष्टाधिकरणत्वादेरतिरिक्तत्वस्यावश्यकत्वादिति । तच्चिन्त्यम् । तादृशप्रतियो
गिताकत्वेन तादृशप्रतियोगिताकत्वविशिष्टनिरूपितसंबंधस्यैव तादृशाधिकर

णताद्यात्मकत्वात् तन्मयावच्छिन्नाभाववत्त्वाविशिष्टाधिकरणतादेरेव ताद्दृशाधिकरण
दिरूपत्वसंभवाच्च। प्रतियोगिताभेदस्याभावभेदनियामकत्वं कुतो नाशंकितमित्या
शंक्याह। प्रतियोगिताया इति। भेदः प्रतियोगितावच्छेदकभेदं विनेत्यर्थः। विलक्षणैव
च्छेदकत्वं पूर्वमेकघटप्रतियोगिकाभावस्यैवाभेदापादनेन तत्रैवावच्छेदकभेदोपादान
मुचितमित्याशयेनाह। तच्चेति। पूर्वकालीनेति। स्वपूर्वकालीनेत्यर्थः। अपरकालीने
ति। स्वपूर्वकालीनेत्यर्थः। अपरकालीनेति स्वापरकालीनेत्यर्थः। अत्र तद्घटत्वादेर्ध्वंस
प्रागभावप्रतियोगितावच्छेदकत्वे साधारण्यात् कालविशेषस्यावच्छेदके निवेशः प्रतियो
गिविशेषणतया भासमानस्य घटत्वादेरतिप्रसक्तत्वात् तद्घटत्वादेरित्युक्तं। न च य एव
प्रागभावस्योत्तरकालस्तस्यैव ध्वंसपूर्वकालत्वेनाव्यावर्तकतया कालविशेषस्यावच्छेदक
त्वं न संभवतीति वाच्यं। कालविशेषस्यैकप्रत्यवच्छेदकताया अभेदात्। अन्यतरत्वादीति य
त्वेवं सति नीलघटत्वसमवायाद्यादिरूपान्यतरभेदस्य घटत्वादावसत्त्वेन घटाभावनील

घटाभावयोर्भेदानुपपत्तिरिति भावः। दूषणमुद्भावितं तदनालोचनविजृंभितं। विलक्षणा
वच्छेदकताया एव भेदपदार्थत्वेनोक्तेः। यत्तु उक्तक्रमेणावच्छेदकभेदः सहानवभा
स्यैव नियामक इत्यत आह किं चेति नवीनानामवतारणं तत्र सम्यक्। युगपदुत्प
न्नविनष्टानामभिन्नाघटानिमग्रंथविरोधात्। ननु ध्वंसप्रागभावयोः प्रतीतिवैलक्ष
ण्यमेव पूर्वकालीनत्वादेस्तत्प्रतियोगितावच्छेदकत्वे मानमत आह तद्युक्तं तस्यैवेति
। पूर्वकालीनत्वादेरिति। ध्वंसप्रागभावयोर्भेदसिद्धेर्वक्ष्यमाणरीत्यैवोपपत्तेरिति
भावः। कृत्यनुवृत्तियदभावे प्रतियोग्यधिकरणयत्कालावृत्तित्वं नियमतः प्रतीयते सका
लः संबंधविधया तदभावस्य प्रतियोगितावच्छेदक इति नियमस्यानुभवसिद्धत्वा
दिति भावः। पूर्वापरकालीनत्वविशिष्टघटत्वादेर्ध्वंसप्रागभावप्रतियोगितावच्छेदक
त्वमभ्युपेत्याह किं चेतीति कश्चित्। मतस्वरूपभेदस्येति इदं च वस्तुगतिमनुरुध्यते
नातिरिक्तभेदस्याजन्यत्वेपि नासंगतिः। प्रतियोगितावच्छेदकयोर्भेदस्य तदवच्छिन्ना

भावयोर्भेदस्य चाप्रमेयत्वादेः सामानाधिकरण्यसंभवात् ॥ अवच्छेदकस्वरूपभेदस्येति ।
विलक्षणावच्छेदकतायाश्चावच्छेदकभेदपदार्थत्वादिति भावः अभावस्वरूपभेदस्ये
ति अभावप्रतियोगिकाभावाधिकरणकाभावस्यानतिरिक्तत्वादिति भावः । न चैवमप्य
भावस्वरूपभेदस्यावच्छेदकनिष्ठत्वे बाधकाभाव इति वाच्यं ॥ तावतैव यथाश्रुतायाम
त्र प्रतियोगितावच्छेदककोटिस्थापि तु क्तस्य नैष्फल्यमिति तार्थः तथा च अभावयोः परस्परं भेद
सिद्ध्याय यदभावप्रतियोगितावच्छेदके यदभावप्रतियोगितावच्छेदकभेदस्तदभावयोः
परस्परं भेद इति क्रमेण परिष्कृतव्याप्तौ वैयधिकरण्योद्भावनात् । अविरुद्धमिति व्या
पकातिप्रसक्तेरदोषत्वादिति भावः अनुमानं सामान्याभावे विशेषाभावभेदसाधक
मनुमानं । समन्वितपतनेनेति अयं भावः सामान्यतः सुखदुःखाद्यवच्छिन्नाभावयोरभे
दासंभवेऽपि तत्तत्सुखदुःखाद्यवच्छिन्नाभावयोरभेदत्वाभावपतनात् स्वर्थकं समन्विय
ते तस्मात् न च ततत्र स्यैव कुतो नोक्तमिति वाच्यं सामान्यतस्तत्व स्यव्याधिकरण साधार

ण्येन तावता समानाधिकरणव्यक्तिविशेषालाभात्। सत्वादिति तत्र सुखादिकाले तत्र दुःखा
द्यवच्छिन्नं शरीरं नास्ति यद्यनुभवामि इति भावः तत्र तत्संख्येति। अत्र सामान्यतस्तत्वस्यैन
।व्यधिकरणसाधारण्यं पूर्वसमानाधिकरणोपक्रमेण तन्निरासादिति ध्येयं। रूप
रसादिति। न रूपरसादीत्यर्थः। न च रूपरसावच्छिन्नाभावयोरैक्ये रूपावच्छिन्नाभाव
त्वेन रासनत्वं रसावच्छिन्नाभावत्वेन चाक्षुषत्वं स्यादिति वाच्यं। चाक्षुःसंबद्धविशेषण
त्वरासनसंबद्धविशेषणत्वयोर्विशिष्टरूपावच्छिन्नाभावत्वप्रकारकचाक्षुषत्वरसा
वच्छिन्नाभावत्वप्रकारकरासनत्वयोः कार्यतावच्छेदकत्वांगीकारात् रूपरसपदयो
रतीन्द्रियरूपरसपरत्वाद्वावश्यकी सम्यगर्थ इति रित्याशयेनाह भावादिति सामान्य
तस्तद्देशवृत्तित्वतदभावयोरवच्छेदकभेदेनैकत्र सत्वान्न विरुद्धत्वमत आह तदवच्छि
न्नतद्देशवृत्तित्वेति समनियतानामित्यनेन तत्र संख्यापरिमाणादीनां ग्रामेकएवात्यं
ताभावइत्याभिमतं तत्र देशतः समनैयत्ये असमनियतकालसमनियतैते शानां

कालतः समनैयत्येऽसमनियतदेशासमनियतकालानामभावैक्यापत्तिरत आह समनि
यतदेशकालानामिति देशतः कालतश्च समव्याप्यानामित्यर्थः एवमपि मूलाग्राव
च्छिन्नशरीरतरुसंयोगादीनामभावैक्यापत्तिस्तादवस्थ्यमेवेत्यत आह । समनियता
वच्छेदकानां चेति विभिन्नावच्छेदककभिन्नानामित्यर्थः । तेन व्याप्यवृत्तिसमनियता
नामभावैक्योपपत्तिः अतएव समनियतदेशकालावच्छेदकानामिति नोक्तं देशकाल
समनैयत्यस्यावच्छेदकसमनैयत्यस्य च पृथग्रूपतया पृथगुक्तेरेवोचितत्वात् ।
रूपत्वावच्छिन्नाभाववह्निः स्यादिति । यथा रूपत्वावच्छिन्नाभावस्तत्तद्रूपाभावकूटात्म
कस्तथा तत्परिमाणत्वावच्छिन्नाभावोऽपि तत्तत्स्थलवृत्तित्वविशिष्टपरिमाणाभा
वकूटात्मक इत्यर्थः । ननु चैवं तत्संख्याभावतत्परिमाणाभावयोः कथमैक्यमिति
वाच्यं तत्तत्स्थलवृत्तित्वविशिष्टतत्संख्याभावकूटतादृशविशिष्टतत्परिमाण
भावयोरभावकूटात्मकत्वमुक्तं तुल्ययुक्त्या तद्रूपाभावादीनामप्यभावकूटात्मक

त्वमवसेयं एवं च रूपसामान्याभावादीनामभावरूपात्मकत्वमिति तु बोध्यं । वस्तुतस्तद्रूप
तावच्छिन्नाभावस्तत्परिमाणत्वेत्यादिरेव संप्रदायसिद्धः पाठः तत्र तद्रूपाभावस्य तत्प
रिमाणत्वावच्छिन्नाभावादीत्यादिपदग्राह्यतादृशविशिष्टरूपाभावरूपात्मक
त्वं बोध्यं । तत्परिमाणं नास्तीतीति । तत्परिमाणं नास्तीत्यादीत्यर्थः । आदिना तद्रूपं
नास्तीति बुद्धिपरिग्रहः तत्र यद्यपि तद्रूपत्वावच्छिन्नाभावादेस्साध्यत्ववक्तुमर्हं परिमा
णाभावरूपस्यैवादिपदग्राह्यत्वेस्वारस्यात् तथाप्युपदर्शितदिशा तत्संख्याभावतत्प
रिमाणाभावयोरैक्यबोधस्सौकर्यायेत्यस्मदुक्तमिति मंतव्यं । ध्वंसेति । युगपदित्यादि । अ
त्र युगपद्विनष्टानां समानदेशानामेक एव ध्वंसः युगपदुत्पन्नानां समानदेशानामे
क एव प्रागभाव इति यो जनाः क्रमोत्पन्नविनष्टानां समानदेशानामपि ध्वंसप्रागभा
वयोर्नैक्यं तत्कालेपि तद्ध्वंसादिप्रत्ययप्रसंगात् इतो युगपदित्युक्तं असमानदेशानां यु
गपदुत्पन्नविनष्टानामपि ध्वंसप्रागभावयोर्नैक्यं तदनधिकरणेपि तद्ध्वंसादिप्रत्ययप्र

संगादतोयुगपदित्युक्तं असमानदेशानां युगपदुत्पन्नविनष्टानामपि ध्वंसप्रागभा
वयोर्नैक्यं तदनधिकरणेपि तद्ध्वंसादिप्रत्ययप्रसंगादतो समानदेशानामित्युक्तं
सम नियतदेशानामितितदर्थः आरब्धायां तत्प्रत्ययेति ध्वंसादिप्रत्यये त्वर्थः वाध
कं इति । अत्रेदं बोध्यं दीधितिस्थवाधकशब्दो येन वाधकविशेषपरो न तु वाधक
सामान्यपरस्तथा सति क्रमोत्पन्नविनष्टानामसमानदेशानामपि ध्वंसप्राग
भावयोरैक्यस्य दूषणीकृततत्वाधकपराहततया युगपदित्यस्य समानदेशानामि
त्यस्य च वैयर्थ्यप्रसंगादिति । अत्र केचित् मूलाग्रस्यादिनोक्ताऽसतीत्यादिव्यावृ
त्तिरसती समानपदेन विभिन्नावच्छेदकानवच्छिन्नत्वरूपसमानावच्छेदकत्वपर्य
न्तविवक्षणात् । किं तु एकाग्निसंयोगजन्यरूपरसादीनां नैकः प्रागभाव इत्यतोऽस
तीति तत्र प्रागभावैक्ये सकलकारणानामभेदे कार्यभेदापत्तिरेव वाधिका वाध
कशब्दो हि तद्वाधकविशेषपर इत्याहुस्तदसत् । समानपदेन समानावच्छेदकत्वपर्य

15

नविशिष्यैवप्रयोजनाभावात्तत्र प्रागभावस्यैकत्वेऽपि विशेषरूपकारणभेदाद्वैसाम
ग्रीभेदसंभवेन कार्यभेदापत्तेर्बाधकत्वासंभवात् उच्यते चेत्तत्र अन्यथा प्रागभावा
नंगीकर्तृणां दीधितिकाराणां तन्नामगतेः अत एव यत्र जन्यस्थलेऽदृष्टवैलक्षण्यादेव
सामग्रीभेद इति मणिकृदुक्तमपि संगच्छत इति दिक् उक्तव्याप्त्यभावे लाघवान्तर
माह दीधितौ व्यधिकरणेति प्रतियोगितावच्छेदकसंबंधभेदेऽपि नाभावभेदनिया
मक इत्याह। सर्वैर्वेति समानासमानाधिकरणयोः संबंधयोरिति। अत्र प्रतियोगिता
संबंधेन प्रतियोगिनिष्ठानिष्ठत्वमेव संबंधे समानासमानाधिकरणत्वमिति
ध्येयं। व्याख्यायां अन्यथेति व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छे
दकसंबंधानंगीकार इत्यर्थः समानाधिकरणधर्मसंबंधेति। समानाधिकरण
धर्मावच्छिन्नाभावस्येव समानाधिकरणसंबंधावच्छिन्नाभावत्वादिति भावः। यद्य
प्यसमानाधिकरणसंबंधावच्छिन्नाभावत्वमपि समानाधिकरणधर्मावच्छिन्ना

भावस्यैव तथापि तस्य संयोगेन घटाभावाद्यात्मकस्य न व्यतिरेकित्वमतः समानाधि
करणधर्मसंबंधावच्छिन्नाभावत्वमेवैक्यानुपपादकं व्यतिरेकित्वप्रयोजकं तयोर्भे
द एवानुपपत्तिरिति तथा च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदक
संबंधानंगीकारे तस्य समानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वपरः स्व
रूपैक्यमुक्तमसंगतं स्यात् तदंगीकारे तु संयोगेन घटत्वेन घटाभावस्य समवायेन घ
टत्वेन घटाभावस्यैवैक्यात्तत्संगतमिति भावः। यद्वा अन्यथेति। अभावमात्रे एवं रीत्यनुस
रणे इत्यर्थः। इतिभाव इति व्यधिकरणधर्मेत्यादिसमुदितग्रंथभाव इत्यर्थः। शेषं
पूर्ववदिति बोध्यं अथवा अन्यथेति व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिक
त्व इत्यर्थः शेषं यद्वेति वदतिरीत्यान्यथेत्यादिकंपूर्वग्रंथ एव व्याख्येयं। अधिकरणसंबं
धावच्छिन्नत्वात् व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वात् प्रतिबंधात् पूर्वप
क्षिमुखे नैव सामान्याभावत्वव्यवस्थापयितुमाह दीधितौ एवमिति। आख्यायां पूर्वोक्त

तेषामिति। भावाभावकरंबितत्वरूपतेषामित्यर्थः अव्याप्यवृत्तित्वमिति अभिप्रेत्येत्य
ग्रिमेणान्वयः व्याप्यवृत्तित्वं चेति। यत्तु कालिकसंबंधेन गोत्वादेरव्याप्यवृत्तित्वा
दिदमसंगतमिति माध्येरुक्तं तच्चिंत्यं कालिकसंबंधेन व्यतिरेकि धर्ममात्रस्यैवा
व्याप्यवृत्तितयाऽव्यावर्तकत्वेन दैशिकाव्याप्यवृत्तित्वस्यैवात्राभिप्रेतत्वात्। दीधि
तौ प्रतियोगिकत्वेति। प्रतियोगितात्वेत्यर्थः एवमग्रेपि व्याख्यायां घटपटाभा
वादिभेदइति दीधितौ विलुप्येतेति। ननु प्रतिवंदेरनुत्तरत्वात्कथमतिरिक्तसामा
न्याभावसिद्धिरिति वाच्यं। विरुद्धधर्माध्यासात् घटपटाभावादिभेदवद्विशेषसा
मान्याभावयोर्भेदइत्यत्रतात्पर्यात्। केचित्तु तादृशप्रतियोगितात्वविशिष्टा
धिकरणत्वस्यानतिरिक्तत्वे तद्वत्तिसामान्याभावधीप्रसंगस्यानुवृत्तेः अतिरिक्त
त्वे च किमपराद्धमभावभेदेनेत्यत्रतात्पर्यमित्याहुः। अतएवेत्यादिनाऽनतिरिक्तस्यातिरि
क्तकल्पनं इत्यादिनाग्रे विवरणसंभवात्तद्व्याख्यायां सर्वमितिशब्दलभ्यं तद

लभ्यं संभवदुक्तिकमन्यविशेषधर्मद्वयावच्छिन्नत्वे विशेषवत्त्वपि सामान्याभाववत्त्वप्रसं
ग इत्यभिप्रेत्य भिन्नमित्यर्थः। दोषांतरमिति अतिरिक्तसामान्याभावकल्पनेपि प्रतियोगि
स्वरूपप्रतियोगितायाः सामान्यविशेषधर्मद्वयावच्छिन्नत्वे विशेषवत्यपि सामान्या
भाववत्त्वप्रसंगेनातिरिक्तप्रतियोगिताकल्पनस्यावश्यकतया पूर्वोक्तकिमपरा
द्धमित्याद्युक्तदोषासंभवादित्याशयः युगपदिंद्रियसंनिकर्षमुपपादयति। मिलि
तेति। नास्त्येवेति अनुभवानुरोधेन साधिकरणाभावविषयतायाएव संनिकर्ष
जन्यतावच्छेदकत्वोपगमादिति भावः। अत इति न तादृशधीरित्यनेनान्वयः। वि
शेषणतायाएवेति एवकारेणैकाधिकरणावच्छिन्नत्वांतर्भावव्यवच्छेदः हेतुत्वादिति
तादृशधीरित्यनेनान्वितं तदवच्छेदेन विशेषणतायाहेतुत्व एव तादृशधीप्रसंग
संभवादिति भावः तादृशधीरिति निरधिकरणाभावलौकिकधीरित्यर्थः घटेरूपा
भाववानित्यादिसाधिकरणाभावप्रतीतेरपि घटेरूपत्वावच्छिन्नप्रतियोगिताक

त्वविशिष्टाधिकरणत्वाभावादेवासंभवादित्याशयः अत्रघटेरूपत्वावच्छिन्नप्रतियोगिताकोभा
वइत्यधिकरणमिश्रिताभावधीप्रसंगोदुष्परिहरएवेतितुनशंक्यंगुणेगुणान्यसत्ताभा
वोनास्तीत्यादिधीवारणायावच्छेदकत्वावगाहिधियोऽसंनिकर्षजन्यतावच्छेदकत्वभंगी
कृत्यतदनवगाहिधियोनंगीकारेणतादृशप्रतियोगिताकत्वेघटवृत्तित्वसामानाधिकर
ण्यमात्रावगाहिधियोऽसंभवात्तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैयतद्वृत्तिता
वच्छेदकत्वेनतादृशप्रतियोगिताकत्वस्यघटवृत्तितानवच्छेदकंतयावच्छेदकत्वावगाहि
न्याअप्यसंभवात् । संबंधविधयेति । संख्यात्वंसादित्यादौसंसर्गीभूतेकार्यसमवा
यस्यद्वित्वादिरूपेकार्यघटिततयाद्वित्वादेःसंबंधविधयाभानादितिभावः । व्यासज्य
वृत्तित्वेतिगुणत्वादिनाद्वित्वादिप्रकारकप्रत्यक्षेव्यभिचारवारणायाद्यंप्रकारकांतं
संबंधविधयाद्वित्वप्रत्यक्षेसंबंधतावच्छेदकद्वित्वत्वप्रकारकेद्वित्वत्वाद्यवच्छिन्नविशेष्यकेच
तद्वारणायद्वितीयंप्रकारकांतंसंबंधविधयाद्वित्वप्रत्यक्षेसंबंधतावच्छेदकद्वित्वप्रकारक

भवानं-टी·
१७
17

प्रत्यक्षाविरोधित्वं तथाधीः घटे रूपं नास्तीति धीः संबंधविषया तज्ज्ञानमिति इदमुपलक्षणं
ऽधिकत्वाद्यवच्छिन्नविशेष्यकभानमपि द्रष्टव्यं। व्यासज्यवृत्तितावच्छेदकत्वप्रकारकत्वमिति
पाठः व्यासज्यवृत्तितावच्छेदकत्वसहितं प्रकारकत्वं तदर्थः मध्यमपदलोपिसमासात्। अप्र
कारकत्वं च द्वयमपि तथा च व्यासज्यवृत्तिधर्मलौकिकप्रत्यक्षत्वमात्रं कार्यतावच्छेदकं प
र्यवस्यतीति मध्ये त्वञ्च न्यपाठेऽपि स एवार्थः अन्यथासिद्धेरिति यत्किंचिदाश्रयज्ञानेऽपि या
वदाश्रयसंनिकर्षसत्त्वे व्यासज्यवृत्तिप्रत्यक्षस्येष्टत्वादिति भावः इदं च यथाश्रुताभिप्रायेण
अग्रे यावदाश्रयलौकिकप्रत्यक्षहेतुत्वस्य वक्ष्यमाणत्वादिति ध्येयं। लौकिकप्रत्यक्षा
भिप्रायेण लौकिकप्रत्यक्षस्य हेतुताभिप्रायेण कश्चिदिति सामान्यतस्तद्विशेष्यकज्ञान
स्य हेतुत्वे मानाभाव एवास्वरसः तल्लौकिकप्रत्यक्षस्यैव हेतुतायां पूर्वतात्पर्ये यद्वर्ण
नेन तद्व्यतिरेकलाभाय व्याचष्टे तल्लौकिकेति भेदज्ञानव्यतिरेकलाभाय व्याचष्टे तद्भे
दज्ञानेति धर्मग्रहादिति घटकपालादौ भेदभ्रमे तज्जनकदोषस्य भेदग्रहप्रतिबंधकत्व

राम
१७

यात्तदभावेन द्वित्वादिप्रत्यक्षस्यानुदयादिति भावः। द्वित्वभ्रमेति अनुभूयमानारोपाभिप्राये
ऽसिद्धं अन्यस्य लौकिकत्वासंभवादिति ध्येयं। तत्तद्रूपाभाववत्त्वादिना। तत्तद्रूपत्वावच्छि
न्नाभाववत्त्वादिना। व्यभिचारवारणाय जन्यतावच्छेदककोटावस्य वहितोत्तरत्वनिवेशो
ऽगौरवावहः। तत्तद्रूपत्वेति। न त्वनेकस्येति। यत्त्वनेकस्यापि तत्तद्रूपाभावस्य रूपं नास्ती
ति प्रतीतिविषयताङ्गीकारे तव सामान्यरूपेण प्रतियोगिज्ञानेन्द्रियसंनिकर्षरूपनियाम
कसत्त्वेन तद्विषयताया अत्रावश्यकत्वादिति। तत्र रूपं नास्तीत्यनुमित्यादेस्तावद्व्यक्ति
विषयताकल्पनमपेक्ष्य एकाभावविषयत्वे लाघवात्। न च तत्रापि पूर्वपश्चिमतत्तद्रूप
त्वावच्छिन्नप्रतियोगिताकत्वेन यत्किंचिदभावोऽनुमितिविषय इति वाच्यं व्यापकताज्ञा
ने रूपत्वावच्छिन्नप्रतियोगिताकत्वेन यावदभावानां विषयतयानुमितौ विनिगमना
विरहेण तावद्विषयताकल्पने गौरवस्य दुष्परिहरत्वात् लाघवमिति पूर्वपश्चिमतेऽ
भावकूटस्य कारणत्वे गौरवमिति भावः। यत्तु पूर्वपश्चिमतेपि कारणतावच्छेदकस्यैक्यात्

भवा-टी०
१८

कथं गौरवं न चातिरिक्तसामान्याभावस्य तद्व्यक्तित्वेन कारणत्वे लाघवं सामान्यधर्मावच्छिन्न
प्रतियोगिताकत्वविशिष्टाभाववत्त्वेनानंताभावानां हेतुत्वे पूर्वपक्षिमते कारणतावच्छेदक
गौरवमिति वाच्यं । अभावनिष्ठतद्व्यक्तित्वस्यान्यथासिद्धिनिरूपकतावच्छेदकतया तेन रू
पेणाभावहेतुतायाः सिद्धान्तविरुद्धत्वात् । अन्यथा घटव्यवहितपूर्ववर्त्तिभिन्नाभावस्य तद्व्य
क्तित्वेन हेतुत्वे गौरवाभावाद्दण्डत्वादिना हेतुताया अपि विलयापत्तेरिति तत्तुच्छं कारणता
वच्छेदके केवलपृथुलघुकारणताकल्पना गौरवस्य परिहरत्वात् । यत्त्वेवं सति कल्पोपधाय
कदण्डाघटनमतेन कारणत्वापेक्षया रणपस्य दण्डापेक्षिलघुलघुकारणताकल्पना गौरवेण दं
डत्वादिना हेतुताविलोपापत्तिरिति तत्तुच्छं अन्यथासिद्धिनिरूपकतावच्छेदकत
या कारणतानवच्छेदकत्वात् । अत एव प्रतियोग्यविशेषिताभावस्यावच्छेदकत्वं नास्तीति
नियमः अन्यथा [illegible] न्यूनतमत्वेन हेतुत्वकल्पने गौरवं शङ्केव आ
[illegible] वाकल्पनेनेत्युक्तं मिश्रैः तद्व्याख्यातं मिश्रोक्तनियमो न्यूनतमत्वेन हेतुतायामन्यथा

राम
१८

सिद्धिम्फलकइत्युक्तं। दिगितिदिगर्थस्तु व्यापकाभावेन व्याप्याभावानुमानस्य सर्वसिद्धत
यायत्र घटादिव्यापकाभाववत्तापरामर्शाद्घटाद्यभावानुमितिस्तत्राभावस्यैकत्वेलाघव
मित्यादिलाघवज्ञानसहकारेणातिरिक्तसामान्याभावसिद्धिरीश्वरास्यैकत्वमिति कल्पसि
द्धिवत् एवंभेदसिद्धिस्तु भावाद्भावस्यापीत्युक्तदिशा मिलितघटद्वयवृत्तित्वतदभावादि
रूपविरुद्धधर्माध्यासाद्विशेषाभावातिरिक्तरूपसामान्याभावादिसिद्धिरवश्यकीयत्वनु अ
तिरिक्तसामान्याभावकल्पनेस्तद्गेहादीनां तेषुनन्तप्रमेयमित्यादिज्ञानविषयतानां
घटादिभेदादिसंबंधकल्पने गौरवात्रातिरिक्तसामान्याभावांगीकारोयुक्त इति केचित्
दुक्तं तन्नसम्यक् एवं सत्यधिकरणातिरिक्ताभावकल्पनेप्युक्तगौरवसंभवेन विशेषा
भावस्याप्यसिद्ध्यापत्तेः विवादग्रस्तपदार्थानां युक्तिभिः सिद्ध्यनापत्तेश्च। विरुद्धध
र्माध्यासादियुक्तिभिस्तत्सिद्धौ प्रामाणिकत्वयोक्तगौरवं न दोषायेति चेत्समं प्रकृतेपी
ति संक्षेपः व्यासज्यवृत्तित्वं पर्याप्तिविशेषस्वरूपं एवमग्रेपि लाघवमिति लाघव

भवानं॰टी॰
१९
19

मित्युक्तं ननु सिद्धांतिमते तथा चेत्यादिनाभासोक्तोभयकल्पनागौरवसत्त्वेन कथं विनि
गमनाभाव इत्यत आह त्वयेति। अनंतप्रतियोगितानां विशेषाभावप्रतियोगितानां
प्रतियोगिताकत्वस्य प्रतियोगितायाः तत्कल्पने विशेषाभावेष्वेकप्रतियोगिताक
ल्पने विनिगमकमिति सिद्धांतिनैमतिरिक्ताभावस्य धर्मित्वेन तत्कल्पनाया गुरुता
दिति भावः। तत्रैवेति अभ्युपगमासर्वस्यैव धर्मित्वान्न्यायस्यैवासंभवदुक्तिकतापत्तेरि
ति भावः अयं सामान्याभावच्छिन्नत्वं अतिरिक्ताभावत्वस्यानंताधिकरणवृत्तित्वं चेतिद्व
यं। द्वयं। अतिरिक्तप्रतियोगितासामान्याभावच्छिन्नत्वं चेति द्वयं। तृतीयस्य रूपत्वमाह। अ
नंतेति नचानंतविशेषाभावेषु सामान्याभावच्छिन्नप्रतियोगिताकत्वस्य पर्याप्तिरूपः
संबंधस्त्वया कल्प्य इति तुल्य इति मितिवाच्यं। विशेषाभावकूटस्य तदतिरिक्तस्य च
सामान्याभावत्वाधिकरणत्वकल्पनेन तत्वाधिकरणाधिक्यकल्पनागौरवप्रतिबंदि
रनुसरत्वाशाह वस्तुत इति। दीधिति नावहुरिति। अनंतव्यक्तिकल्पनास्थले फलमुखव

राम
१९

गौरवस्यापि दोषत्वमेवेत्यस्वरसो वोध्यः॥ ॥ ❀ ॥ ॥इति श्रीमन्महादेवविरचिते भवानंदी
प्रकाशे सामान्यव्याप्तिप्रकाशः॥ ॥श्रीः॥ द्रव्यं पृथिवीत्वादित्यादावेकव्यक्तिसाध्यके
ऽव्याप्यसत्वं एव तद्घटावृत्तिकत्वपासाध्ये नानाव्यक्तित्वनिवेशसार्थक्यं तदेव न तत्रापि
विशिष्टाभावादिकमादाय व्याप्तिसत्वादिति तद्वैयर्थ्यमत आह साध्यस्यैकत्व इ
ति विशिष्टाभावाद्यनंगीकार इति आदिनोभयाभावपरिग्रहः रूपवान् रसादित्यादौ
नानाव्यक्तिहेतुकेऽव्याप्यसत्वेव तद्घटावृत्तित्वापहेतावेकव्यक्तिकत्वं निवेश्यं तदेव न
तत्रापि चालनीन्यायेनाव्याप्तिसत्वादित्यत आह हेतोरपीति। दीधितिमिश्रादिदृशा:
।समानाधिकरणयोरेव व्याप्तिरिति मिश्रोक्तरीत्या। यद्यत्र नवीनैरुक्तं दीधितौ अथवा
त्रेत्यनेनं तरं यथाश्रुतप्रतियोगिवैयधिकरण्यानिवेशेपीति पूरणीयं। अन्यथास
ध्रुत्रैव विशिष्टाभावोभयाभावादिकमादायैव रूपवान् रसादित्यादावपि रवं उभा: प्रसि
द्धोभयाभावघटितप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याश्रयेन रूपाकाशो

भवा.टी.
२०

भयत्वावच्छिन्नाभावमादाय तद्घटकगमनेनासंभवसंभवेनाव्याप्तेरसंगत्यापत्तेरिति
तदसमंजसं। विशिष्टाभावोभयाभावादेरनंगीकाराभिप्रायेण दूषणांतरेणैवोपपत्तौ
तद्दूषणे प्रयोजनाभावात्। यत्ररूपस्येति। अन्यथा इदंज्ञानादौ साध्ये परंपरासंबंधेन
इंद्रत्वादेः साध्यतावच्छेदकत्वमपि पूर्वोक्तमसंगतं स्यादिति भावः। सर्वत्रैव विशिष्टाभावे
ति। इदं च यथासंभवं बोध्यं तेन वह्न्यादिसाध्यके समानाधिकरणयोरेव व्याप्तिरिति
वह्नेरेतद्रूपादिसाध्यके च विशिष्टाभावमादाय तद्घटकगमनासंभवेपि न क्षतिः। द्वि
त्वावच्छिन्नेति। अत्र विशिष्टाभावप्रतियोगितापि व्यासज्यवृत्तिः विशिष्टोभयाभावादेः
समयशीलतत्वैकदेशस्य दुष्करत्वान्न व्याच सत्तादिसाध्यकाव्याप्तिरप्यसंगतेति तु न शक्यं वि
शेषणस्य प्रतियोगितानुपातुत्वेरवेनं विशिष्टाभावप्रतियोगिताया व्यासज्यवृत्तित्वस्यासंभ
वात्। एतद्रूपवानिति यद्यपि वह्निमान् धूमादित्यत्रैवापि वह्न्यंशकं तथाप्येकव्यक्ति
कत्वेन सत्तादिसाध्यकसजातीयत्वेनाणुरूपीतिन्यायेनेदमेवोक्तं प्रतियोगिव्यधिक

राम
२०

रस्येति उभयाभावघटितप्रतियोगिवैयधिकरण्याश्रयेत्यर्थः। अभावेति। तद्रूपाकांशोभया

भावेत्यर्थः॥ विशेष्याप्रतियोगिकत्व इति विशेष्यविशेषणसंबंधस्येव तदभावात्मक

विशिष्टाभावप्रतियोगित्वादिति भावः। कुत्रचिदिति एतन्मते विशिष्टसाध्यके व्यभिचारि

त्वविशेष्यविशेषणसंबंधस्यैव साध्यतयात्र पर्वतस्य भावत्वरीत्या अतिप्रसंगासंगते

रेवास्वरसः साध्यत्वे परमिति तत्र तन्नातिप्रसंगः साध्यस्य हेतुसमानाधिकरणाभा

वप्रतियोगित्वादिति भावः अतिरिक्तस्यैव अतिरिक्तमिति मतभंगी कृत्वैवेतान्तरम

मित्यर्थः। उभयाभावप्रतियोगितापर्याप्त्यासज्य वृत्तित्वे नासंभव इत्यत आह अत्र

त्विति प्रतियोगिता उभयाभावप्रतियोगिता क्वचित्तथैव पाठः प्रमेयत्वाद्यवच्छेदेन

धूमादौ वह्निसमानाधिकरणाभावप्रतियोगित्वाभावसत्वाद्धूमवान्वह्नेरित्याह

वत्तिव्याप्तेराह दीधितौ सचेति। भारव्यायां सत्वस्य वच्छेदायेति तत्सत्वेन ज्ञानरूपप्रति

बंधकसत्वेन रूपत्वावच्छेदेन तादृशाप्रतियोगित्वस्यानासंभवादिति भावः। तथाचेति त

अवा.टी.
२१

२१

धानरूपव्याप्यधिकीत्वादित्यादावव्याप्तिः सुदृढैवेति भावः । नन्वनतिरिक्तेति अन्यथा ग्राहे ः
कपिसंयोगाद्यभावानतिरिक्तवृत्तित्वरूपावच्छेदकत्वग्रहे कपिसंयोगाद्यैः स्वरूपसंबंध
रूपावच्छेदकत्वग्रहानुपपत्तेरित्ति भावः । बाधिकारूपत्वे स्वरूपसंबंधरूपावच्छेदकत्वा
वगाहि ताद्दशप्रतियोगित्वाभावग्रहे बाधिकागुरुत्वादिति । आदिनाकारस्य त्वमवच्छिन्न हेः
सामानाधिकरण्यप्रतियोगितावच्छेदक इति इदं चाग्रे तद्रूपावच्छिन्नसामानाधिकरण्य
मित्यत्रावच्छिन्नत्वविशिष्टत्वमात्रमित्याशयेन क्वचित् पुस्तके न्यून एव पाठस्तत्र तद्रूपाव
वच्छिन्नसामानाधिकरण्यमित्यस्यैव तद्रूपावच्छिन्नप्रतियोगिताकसामानाधिकरण्य
मर्थो बोध्यः इदमपि । सामानाधिकरण्यप्रतियोगितानिरूपितमपि अवच्छेदकत्वं स्वरू
पसंबंधरूपावच्छेदकत्वं अन्यूनवृत्तित्वं । तत्समनियतं । क्वचिन्नैव पाठः अनवच्छेदक
त्वात् । सामानाधिकरण्यप्रतियोगितानवच्छेदकत्वात् । दीधितौ तद्रूपवत्ताया इति
तथान्वयः संभवत्समनियतताक लघुधर्मापेक्षया । गुरुधर्मो यद न वच्छेदकस्तत्प्रमा

राम
२१

वावच्छेदक इति व्याप्तिशरीरघटितत्वाभावः। ननु पारिभाषिकस्य प्रतियोगित्वाभावावच्छेदक
त्वस्य निवेशात्कंबुग्रीवादिमत्त्वादिसाधकस्थले साध्यतायात इत्यत आह व्याख्यायां
तथा चेति। इत्युक्तावित्यन्ते तनैनान्वयः। तादृशव्याप्तिघटकस्य तत्पदस्यार्थः। यद्रूपेति यद्रू
पपदं साध्यतावच्छेदकपरं तदवच्छिन्नेति तद्रूपावच्छिन्नेत्यर्थः। इत्युक्तावपि तथा च कं
बुग्रीवादिमत्त्वादिसाधकस्थले साध्यतायां यद्रूपपदेन कंबुग्रीवादिमत्त्वादिरूपादानसं
भवात्लक्षणसमन्वय इति भावः। इत्याद्यावपीति आदिना धूमवान्वह्नेरित्यादेः संग्रह
ः। अतिव्याप्तिरिति तत्र यद्रूपपदेन प्रमेयधूमत्वादिरूपादानसंभवात् हेतुव्याप
कतावच्छेदकं धनत्वादेरेव तादृशप्रतियोगित्वाभावावच्छेदकत्वेन तस्मात्तत्र लक्ष
णसमन्वयसंभवादित्याशयः। अत्र गगनाभावसाध्यकानुमाने हेतुमन्निष्ठाभाव
प्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगित्वाभावावच्छेदकं तद्भि
न्न धर्मवत्तासामानाधिकरण्यं व्याप्तिरित्येतल्लक्षणनिष्कर्षमात्रको ध्युक्त दोषः प्रति

योगितायां विशिष्टोपादानं यत्तत्तदभावकूटएव निवेश्यः नातो गुरोरवच्छेदकत्वं विना दुर्वचत्वं। वह्निमान् धूमादित्यादौ धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेर्वह्नित्वादिविशिष्टसंबंधिनिष्ठतत्तद्व्यक्त्यभावप्रतियोगित्वाभावावच्छेदकत्वेन वह्नित्वादेरपि पारिभाषिकावच्छेदकत्वापत्त्याऽसंभवः स्यादिति कूटोपादानं। न चैवं सति पारिभाषिकावच्छेदकाप्रसिद्धिः घटाद्यभावप्रतियोगित्वाभावस्य घटादौ व्याप्यवृत्तितयाऽवच्छेदकानपेक्षणादिति वाच्यं। सिद्धान्तेपि प्रतियोगिताया व्याप्यवृत्तितयावच्छेदकानपेक्षया प्रसंगात् प्रतियोगित्वतदभावयोरवच्छेदकत्वे विरोधाभावात् अतएव प्रतियोगितायाइव तच्छून्यताया अपि नावच्छेदकमित्युक्तं दीधितिकारैरेतिप्राहुः। गन्धप्रागभावासंसर्गाभावइत्तित्वं येन समानाधिकरण्ययोरेव व्याप्तिरिति कृत्स्नकृताभिधानाद्धुरीणस्याभेदएव तन्नाम्यर्थादिति भावः विशेषः साध्यसामानाधिकरण्यमिति। न चैवमुदाहरणस्य व्याप्तिप्रदर्शकत्वानुपपत्तिः पक्षधर्महेतावाकांक्षिताया विशेषव्या

मेत्तेनाप्रदर्शनादिति वाच्यं । तेन दृष्टान्तवृत्तिहेतौ विशेषव्याप्तिप्रदर्शनेन तद्धेतुदृष्टान्ते न पक्षधर्म
हेतौ हेतुतावच्छेदकेन व्याप्तित्वावच्छिन्नसाधनेऽपक्षधर्मतावत्त्वादप्रसिद्ध्या विशेष
व्याप्तेः स्वेच्छाकाङ्क्षितविशेषव्याप्तिप्रदर्शनप्रयोजकतया व्याप्तिप्रदर्शकत्वोपपत्तेः सि
द्धसाधनविषयान्यथाप्रयोगे पक्षस्य दृष्टान्तत्वे च हेतुरूपस्य साध्यस्य विशेषव्याप्तिप्र
दर्शकत्वसंभवाच्च । अधिकमग्रे वक्ष्यामः । ननु अत्यन्ताभावगर्भलक्षणे दूषणे यथाक्र
ममव्याप्तत्वकृतः प्रतियोगितावच्छेदकावच्छिन्नभेदप्रतियोगितावच्छिन्नभेदे तथा सामान्य
विशेषभावनिबन्धनभेदस्तु वक्तुः अन्योन्याभावगर्भलक्षणदूषणे च तथानुगमात्तादृश
भेदे न सु वच इत्यत आह दीधितौ प्रथम इति नञ्कृतादाहरणस्य व्याप्तिप्रदर्शकत्वानुप
पत्ता विशेषव्याप्तेरगमकतया सामान्यविशेषभेदेन लक्षणभेदोऽनुपपन्न इत्यत आ
ह प्रथम इतीत्यवतारणं न सम्यक् । उपदर्शितरीत्योदाहरणस्य व्याप्तिप्रदर्शकत्वोपपा
दनेन तादृशावतारणासंभवात् । मोरव्यायां इत्यर्थ इति अन्योन्याभावाप्रतियोगि

स्वाधिकरणकसाध्यसामानाधिकरणकसाध्यसामानाधिकरण्यरूपइत्यर्थः। तद्वृत्तित्वमि
त्यर्थ इति न चैवं साध्यवत्कत्वमित्यत्र विग्रहवाक्यस्यस्वरूपघटकयोऽधिकरणत्वमित्येवपर्यवसि
तं तथा च व्याप्यव्यापकभावाज्ञानेपी साध्यनिरूप्यत्वासंगतिः। तेन संबंधत्वेनैव भान
स्य व्याप्यव्यापकभावस्यैव घटकार्थत्वप्रतिपादनादिति वाच्यं। दीधितिकारेण निरूपितत
त्वमेतदित्यादिनाग्रेऽधिकरणत्वस्य घटकार्थत्व एव तन्मूलतात्पर्यस्य वर्णनीयतया तदनु
सारेणैव तदभिधानात्। तच्च तत्रैव स्फुटीभविष्यति। नानाव्यक्तिसाध्यके यत्र नानाव्य
क्तिषु साध्यतानियमस्येति विग्रहाभिप्रायेण तन्नानाधिकरणेति वह्निमान् धूमादित्यादा
वित्यर्थः। तादृशविग्रहबीजं स्फुटयति साध्यस्येति शाकवान् गगनेपरिमाणादित्याद्य राम
भिप्रायेण। तत्राप्युभयथाव्याप्त्याभावव्याप्यतयाव्याप्तिसंभवात् एको नेति प्रतीतेरिति २३
हितत्वात्यंताभावविषयकत्वेति शेषः। साध्यस्येति इदं पृथिवीत्वादित्याद्यभिप्रायेण। नि
स्तारः अव्याप्तिवारणं। तत्र वह्निमत्त्वस्येति तद्वह्निरूपत्वेति शेषः। दीधितौ वन्ह्यादाविति इ

णं तार्थं परंपरया तुल्यप्रदर्शनाय तद्धूमादाविति व्याख्यायां अस्य यो: । तत्संयोगत्वघटितो:
स्वाश्रयप्रतियोगिकत्वादीति आदिना स्वाश्रयप्रतियोगिकसंयोगाश्रयत्वपरिग्रहः
यादृशरूपेति अत्र यादृशपदेन वह्नित्वावच्छिन्नमेव धर्मत्वं इत्युपलक्ष्यते वह्निसंयोग
वृत्ति हेतौ साध्ये यादृशरूपपदवहवच्छिन्नमित्यादि वा अभिलप्यविरुद्ध्यां । इदं च । यद्रूपाव
च्छिन्नमनवच्छेदकमित्यादिकं यत्तदभावेति तत्र धूमो वह्नित्वेन न धूमवन्निष्ठभेदप्रतियो
गितावच्छेदकत्वमित्यादिप्रतीतेरिति भाव: । एवं चानवच्छेदकमित्यस्यावच्छेदकत्वाभा
ववद्वृत्तित्वपर्यवसन्नतया तद्रूपावच्छेदेन तादृशावच्छेदकत्वाभाववत्तद्रूपावच्छिन्नसामानाधि
करण्यं व्याप्तिरित्यार्थ: पर्यवसन्न: प्रतियोगितावच्छेदकत्वस्याव्याप्यवृत्तित्वान्ना
व्याप्ति: । न चैवं प्रतियोगित्वस्याव्याप्यवृत्तित्वमुपेत्य यादृशरूपावच्छेदेन प्रतियो
गित्वाभावविरहस्य यावत्याश्रुतत्त्वलक्षणमेव सम्यगिति वाच्यं अभावविरहात्मतत्
रूपप्रतियोगिताया अव्याप्यवृत्तित्वासंभवात् सम्मतेत्विति अयं भाव: । तत्र धूमो वह्नि

त्वेन न धूमवह्निसंभेदप्रतियोगितावच्छेदकत्वमित्यादिप्रतीतेर्वह्नित्वादेस्तादृशावच्छेदकत्वा
भावो विषयः ननु वह्नित्वाद्यवच्छेदेन तादृशप्रतियोगितावच्छेदकत्वाभावः सर्वत्रैव वह्नौ
धूमवह्निसंभेदप्रतियोगितावच्छेदकत्वं न तु कुत्रापि तदभाव इत्यादिसर्वजनसिद्धप्र
तीतिर्बाधितत्वादिति पूर्वोक्तरीत्या न निर्वाह इति । इत्यादीति आदिना वह्निसंयोगवत्
द्दो साध्ये तादृशप्रतियोगितावच्छेदकतावच्छेदकतानवच्छेदकं यत्साध्यता
वच्छेदकं तत्तावच्छेदकतावच्छेदकमित्यादेः परिग्रहः । दीधितौ उक्तरीत्येति निरूपकत्वान्पृथिवी
त्वादिव्यापकत्वव्याप्तिवारणाय घनुरोधेनेत्यर्थः । सर्वत्रेति । सर्वलक्ष्येष्वित्यर्थः । अकिं
चित्करमेव । व्यधिकरणयोर्व्याप्तिघटकव्यापकतावच्छेदकत्वविरहाप्रयोजकमेव व्याख्या
यां प्रतिहेतुकमिति । तथा च मूले न व्याप्तिरित्यस्य न तादृशसामानाधिकरण्यरूपा
व्याप्तिरित्यर्थः एवं च व्यधिकरणसामानाधिकरण्याभावरूपव्याप्त्यभावे हेतुरिति तादृ
शसामानाधिकरण्याभावगमकतया वतादृशप्रतियोगित्वकथनमिति भावः । ननु मुग

पदुत्पन्नविनष्टयोरपि व्याप्तिः स्यादित्याशंकायां युगपदुत्पन्नविनष्टे इत्यादिमूलमभिप्रा
यस्यासमाधानपरं तस्य व्याप्तिरेव तस्य कालिकीत्यादिरिति ग्रन्थेन कालिकव्याप्त्यास
माधानपरत्वं दीधितिकृदुक्तमसंगतमाशंकितुर्दैशिकव्याप्तावभिप्रेततायां कालिक
व्याप्त्याविषयं त्वासमाधानस्यासंगतेरित्यत आह। विभिन्नकालेत्यादि इदमुपलक्ष
णं युगपदुत्पन्नविनष्टयोरपि व्यधिकरणयोर्दैशिकव्याप्त्यसत्त्वादित्यपि बोध्यं दैशि
कव्याप्तौ। आशंकितुरभिप्रेतायामिति शेषः युगपदुत्पन्नेत्यादिकं तेन न शंकितुर्युगप
दुत्पादविनाशाभिधानं अनुपपन्नं दैशिकव्याप्तौ युगपदुत्पादविनाशयोरनुपयोगा
दिति भावः। अतः आशंकितुः कालिकव्याप्तेरेवाभिप्रेतत्वात्। पूरयन्ति। कालिकव्या
प्त्यासमाधानार्थं पूरयन्ति आशंकासमाधानयोरेकाभिप्रायकत्वस्यौचित्यादि
ति भावः। एवं च ननु समानाधिकरणयोरेव व्याप्त्यंगीकारे व्यधिकरणयोर्युगप
दुत्पन्नविनष्टयोरपि कालिकी व्याप्तिः स्यात् तयोरपि कालिकसंबंधेन समानाधिक

रत्वादित्यत आह युगपदिति। तीतिमूलावतरणं तत्र व्यधिकरणयोर्घटपटयोः का
लिकव्याप्यसंभवाद्युगपदित्यादेरुपयोग इति ध्येयं। एतेन ननु व्यधिकरणयोर्व्या
प्यत्वास्वीकारे दैशिकसंबंधेन व्यधिकरणयोर्युगपदुत्पन्नविनष्टयोः कथं व्याप्य
त्वव्यवहार इत्यत आह मूले युगपदित्यादि तत्र दैशिकव्याप्यसंभवात् पूरणमिति कालिकी
ति। यत्तु दैशिकव्याप्तौ युगपदुत्पन्नेत्यादिकमपि किंचित्कर मता दशायोरपि न सत्त्वात्
तादृशयोरपि कुचित्तादृसत्त्वादित्यतः पूरणमित्यपीति। तन्मूलावतारणिकाया अवि
चारितोक्तिकेषांचिद्दूषणे ज्ञापनं परास्तं। उपदर्शितरीत्या मूलावतारणस्यैव विचा
रितत्वात्। ननु द्वयोर्भिन्नलयोरन्योन्याभावगर्भतया न द्वयोः स्वे स्वेकवचनमसं
गतमित्यत आह। सामान्यत इति। जात्यभिप्रायेणेत्यर्थः। अव्याप्यवृत्तित्वसाधक प्र
तीतिमत्यप्योपपादयति दीधितौ तथा चेति अयं दृष्टान्तः बाधितप्रत्यभिज्ञाने चेत्यर्थः
उत्त्रेरवशब्दस्य शब्दाभिलापप्रसिद्धत्वात् तद्व्याख्यायां उत्त्रेरवः शब्दाभिलाप इति धी

बाधकवत्त्वादित्यर्थ इति। न च भेदप्रतीत्योर्बाध्यबाधकभावे विनिगमनाविरह इति
वाच्यं। लाघवेन सामान्यतः क्लृप्तस्यात्यन्ताभावप्रतियोगितावच्छेदकविरोधस्यैव वि
निगमकत्वात्। न च तथापि संयोगिभेदस्य व्याप्यवृत्तित्वे संयोगात्मकतदभावस्या
व्याप्यवृत्तित्वानुपपत्तिः अभावस्याव्याप्यवृत्तित्वे प्रतियोगिव्याप्यवृत्तित्वस्य तन्त्रत्वा
दिति वाच्यं। संयोगात्यन्ताभावात्मकप्रतियोगिनोऽव्याप्यवृत्तित्वे न तदनुपपत्तेः। न ति
यावद्वृत्तियोगिनोऽव्याप्यवृत्तित्वमेव तत्र तन्त्रं। तथा सति प्राचां मतेऽत्यन्ताभावस्य
ध्वंसादिभिन्नतया प्रतियोगिकत्वेन संयोगात्यन्ताभावस्य व्याप्यवृत्ति ध्वंसप्रागभाव
प्रतियोगिकत्वेनाव्याप्यवृत्तित्वानुपपत्तेः तदभावत्वेति भेदाभावत्वे स्वर्थः लाघवा
त्। अभ्यन्तरसंयोगेषु संयोगिभेदाभावत्वकल्पनागौरवमपेक्ष्य लाघवात्। तद्देव
तद्धर्मवद्भिन्नभेदस्य तद्धर्मस्वरूपत्वमेव। प्रमात्वेति। घटत्वस्यैकतया लाघवं नो
क्तं अतिरिक्तत्वस्वीकारे घटभिन्नभेदस्य घटत्वातिरिक्तत्वस्वीकारे। दीधितौ अ

भवानं-टी
२६
26

ऽप्यभावेऽभावत्वास्वीकारेऽतिरिक्तत्वेति। तथा चाभावाभावस्य भावरूपतामंगीकृ
त्य संसिद्धान्तिनामत्र मते घटेन भावेऽप्यभावत्वभावरूपकल्पित इति भावः व्याख्यायां अन्य
थानुपपत्तिः। अन्यविषयकत्वस्य पाद्यत्वासंभवं। सद्भावेपीति संनिकर्षादिघटितसा
मग्रीसंभवादिति भावः। तदुपस्थितौ संयोगोपस्थितौ तत्संभवात्। संयोगवत्वेन प्र
तियोग्युपस्थित्यसंभवात्। तथा चाभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हे
तुतया तदभावेन वृक्षे मूलेन कपिसंयोग इति प्रतीतेः कपिसंयोगिभेदविषयकत्वसंभव
इति भावः उपस्थितिः संयोगवत्वेन प्रतियोगिन उपस्थितिः संयोगिनोऽनुल्लेखादित्ये
वपाठः अभावांशे साक्षात्परंपरया वा संयोगवतः प्रकारत्वेनानुभवे नाग्रहस्तु इत्य
र्थः। तथा चानुभवविरोध इति भावः। क्वचित्तु प्रतियोगिनोऽनुल्लेखादित्यनंतरं अविषु
यत्वात् प्रतियोगिवाचकपदाभिलापाभावादित्यर्थ इति पाठः तत्रानुल्लेखादित्यस्ये
यमारभ्याहृप उल्लेखशब्दस्य विषयत्वार्थकत्वानुसारेण शब्दाभिलापार्थकत्वानुसा

राम
२६

रेखाद्वितीयेन निषेधयं। मूले नेत्यादिप्रतीकमध्ये त्वेवलज्ञावमाह। न संयोगीति। दीधितौ
विशेषणे वेति। तथा च संयोगिभेदस्य संयोगसामानाधिकरण्यरूपविरोधः प्रकृते न
कल्प्यतद्वृत्तिभावः। व्याख्यायां तादृशाकल्पनेति तथाविधविरोधकल्पनेत्यर्थः। बा
धिकेति। न कपिसंयोगीति प्रतीतिरिति शेषः। ननु तथाविधविरोधरूपबाधकेन भेद
त्वप्रकारकप्रतीत्यनुव्यवसायस्य भेदत्वप्रकारकत्वांशे भ्रमत्वं कल्पनीयमत आह
दीधितौ गौरवं त्विति बाधकैः। अतिरिक्तविशिष्टज्ञानतत्कारणकल्पनागौरवं। ज्ञाने
व्यभिचारित्वादिकल्पनारूपैः। न खलु त्वित्यादेर्भावार्थमाह व्याख्यायां अतत्प्रका
रक इत्यादि। तथा चानुव्यवसायस्य तत्प्रकारकत्वांशे प्रमात्वनियमेन भेदत्वप्र
कारकप्रतीत्यनुव्यवसायस्य भेदत्वप्रकारकत्वांशे भ्रमत्वकल्पनं न संभवतीत्या
शयं उक्तार्थः। नवीनास्तु न खलु त्विति आदेरन्यथैव भावं वर्णयंति तथा हि यादृशप्रतीते
र्यादृशव्यवहारजनकत्वं तस्यास्तादृशाकारत्वं रंगतत्वप्रकारकप्रतीतेश्च नेदं रजतमिति

भवानं॰टी॰
२१

व्यवहारजनकत्वं किंत्विदं रंगमिति व्यवहारजनकत्वमतो रंगे रजतप्रतीतेरजतत्वावगा
हित्वाद्विदं रजतमिति व्यवहारजनकत्वासंभवान्नस्यास्तदवगाहित्वं वस्तुतस्तु येन
रूपेण संयोगीति व्यवहारजनकप्रतीतेस्तादृशवाक्यप्रतिपाद्यसंयोगिभेदविषय
कत्वमावश्यकं तादृशवाक्यस्यानुयोगिनि सप्तमीविना संसर्गाभावाबोधकत्वादि
ति न दोषस्तत्र समवायसंबंधेन विशेष्यकघटत्वप्रकारकज्ञानादेरपि अयं घट इत्याद्याकार
संबन्धस्य संप्रदायसिद्धत्वात्तादृशवाक्यस्य चेदंत्वविशिष्टेऽभेदेन घटप्रकारकबोधा
यैव हेतुत्वात्। दीधितौ शक्यत इति। नन्वेवं शिखी ध्वस्तः यज्ञोपवीती यं भविष्यति
इत्यादि प्रतीत्या विशिष्टसत्ताभाववद्विशिष्टध्वंसप्रागभावयोरप्यावश्यकत्वं वारणं अत्रा
पि बाधकसत्त्वे रन्यविषयकप्रतीतेरन्यविषयकत्वासंभवादिति चेन्न। अत्र विशेष्य
नाशकोत्पादकसामग्रीसत्त्वेन स्वप्रतियोगि। विशेषणाश्रयत्वरूपपरंपरासंबंधे
न विशेषणस्य नाशप्रागभावाभ्यामेव तादृशप्रतीत्युपपत्त्या विशिष्टनाशप्रागभावयोः

राम
२१

सिद्ध्यसंभवात्। आख्यायां संसर्गाभावविषयकत्वेति भेदत्वप्रकारकत्वेनानुव्यवसायस्य
संदिग्धत्वादिति भावः। तद्भेदवेति तथा चान्योन्याभावस्याव्याप्यवृत्तित्वं विनैवायं न रूपा
मइति व्यवहारोपपत्तिरिति भावः। अप्रसिद्धेति एतत्स्थल एव च घटउद्दिश्यमत्वमुपेक्ष्य
तन्नाशानुधावनं नाम तद्भेदवानित्यत्र तद्भेदानुधावनं चेति ध्येयं। वस्तुतस्तु संयोगस्यान्यो
न्याभावस्याव्याप्यवृत्तित्वमत्र प्रकृतं तत्त्वायं न रूपवानिति व्यवहारेण सिद्धं न वा मूले
नायं कपिसंयोगीति व्यवहारेण सिद्ध्यतीति तत्र कपिसंयोगसम्बन्धित्वस्यैवान्वयिता
वच्छेदकतया तद्देवच्छिन्नभेदस्यैवाव्याप्यवृत्तित्वं तथा प्रतीत्या सिद्धेस्तच्च न प्रकृतम
सिद्धं वा अव्याप्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्यैवाव्याप्यवृत्तित्वगरतस्तच्छुगु
णमुदाहरणमाह दीधितौ नायं तद्भेदवानयमित्यास्यमइति। अत्र च तद्भेदसंयोगा
वच्छिन्नभेदः प्रतीयते तद्भेदसंयोगस्यैवान्वयितावच्छेदकत्वात्तत्त्वस्यावच्छिन्नप्रतियो
गिताकभेदसिद्धोभवतिप्रकृतानुगुणं इत्याद्यथ इत्यादिपदात् मूले नायं कपिमानि

त्वादि व्यवहारस्य देशिकाव्याप्यवृत्तित्वसाधकस्यापरिग्रहः यत्तु आदिपदं देशिकाव्याप्यवृत्तित्व
साधकानां मूलेनाप्यंकपिसंयोगीत्वादि व्यवहाराणां परिग्रह इति तन्नवीनैरुक्तं तद्भिन्नत्वं
उपदर्शितरीत्या तेषां देशिकाव्याप्यवृत्तित्वसाधकत्वासंभवात्। न चैवमपि कप्यं ताद्दश
व्यवहारेषु यन्निरिति वाच्यं वक्ष्यमाणरीत्या प्राचीनमते तद्बोधपदैः आख्यायांतथा
ते तु त्वं। पुरुषोपस्थापकपदोत्तरसप्तमीपदज्ञानहेतुत्वं। तीधिनोवाचके तिबोधके स
र्पः इदं आदीति इदं आदि वाक्यांतर्गतइदं आदीत्यर्थः। धर्म्युपसर्जनतयामतुवर्थसंबंधि
विशेषणतया प्रतियोगित्वेन। प्रतियोगितासंबंधेन। अन्वयः शाब्दबोधः। ननु साम
र्थ्यीसत्वेन तादृशशाब्दबोधे बाधकाभाव इत्यत आह इतर विशेषणतमेति उपस्थित
स्येति। अन्यत्रेत्यनेनान्वयः अन्वयायोग्ये हेतुर्निराकांक्षत्वेति। आकांक्षाज्ञानकप
कारणाभावेन अयं भावः इदं वाज्ञास्तीत्यादेः मतुवर्थ विशेषणतयोपस्थितानां
इदं आदीनामभावादन्वयबोधकारणाप्रकल्पनीयेतर विशेषणतयेत्यादि मतुप्समकुरोधे

नाभावाद्यंशे तदन्वयबोधं प्रति प्रथमांत तदुपस्थापक पद धर्मिक नञादिपद समभिव्याहार
रूपाकांक्षाज्ञानस्य हेतुताया आवश्यकत्वात्प्रकृते तादृशाकांक्षाज्ञानघटित सामग्र्यभावे
न तादृशशाब्दबोधो न संभवति। न चाभावाद्यंशे तदन्वयबोधं प्रति प्रथमांत तदुपस्थापकपदध
र्मिक नञादिपदसमभिव्याहार ज्ञानहेतुत्वे नीलो घटो नास्तीत्यादौ घटादि विशेषणस्य नी
लादिपदार्थस्याभावादि विशेषणत्वमाकथं नान्वय इति वाच्यं। अभावाद्यंशे नीलादिवि
शेषणक बोधे तात्पर्यग्रहदशायामिष्टत्वात्। नचैवमितर विशेषणतयोपस्थितस्येतर
विशेषणतया नान्वय इति प्रवाद विरोध इति वाच्यं तस्य स्वार्थ विशेष्यकान्वयबोधप्रकारो
पस्थापकाव्यवहित पूर्व पदार्थस्य स्वार्थातिरिक्ते नान्वयबोध इत्येतत्परत्वात्। यथा
श्रुतादरे वह्निमान्नास्तीत्यादावपि वह्न्यादिपदार्थस्य विशेष्यतयैव पदजन्योपस्थिते
र्भानात्तत्साधारण्येनानुपपत्तेः न चोक्त समभिव्याहाररूपाकांक्षाज्ञानाभावस्य विरो
कांक्ष्यत्वे तत्रानुपपत्त्याया इतर विशेषणतयोपस्थितेः कथमसंगतमिति वाच्यं। ता

दराससमभिव्याहाराभावप्रयोजकत्वेनैव तत्कथनात्।नचैवमपि इदंत्वादिपदस्य मत्वर्थादिविव
क्षया इदंत्वादिपरत्वे इदंत्वादिसंसर्गाभावबोधनिर्वाहपरायानचात्रेत्याद्यभिमशंकाया अनु
स्यान प्रसंगः मत्वर्थादिविवक्षायामपि मतुपाद्यव्यवधानेन इदंत्वादिपदस्य प्रथमांतत्वाभावे
नोक्तसमभिव्याहाररूपाकांक्षाया असंभवादिति वाच्यं।सार्थकपदव्यवधानाभावस्यैव
प्रकृते प्रथमांतत्वघटकत्वमित्यभिप्रायेण तदुत्थानसंभवात् यद्वा इत्तरविशेषणतया
स्वार्थबोधपरेतरतदुपस्थापकपदस्य विशेष्यपरनञादिपदसमभिव्याहारस्यात्राकां
क्षापदार्थ इति नकाप्यनुपपत्तिः।केचित्तु उक्तसूत्रस्यानुरोधेनाभावांशे तदन्वयबोधे
ऽभावादिभिन्नाविशेषणतयाऽऽदुपस्थितेर्हेतुताकल्प्यत इति तादृशोपस्थितिरूपकार
णविरहेणनायं तद्इंदंत्वानित्यादौ इदंत्वसंसर्गाभावबोधासंभव इति भावमाहुस्तदसत्।
इदंत्वो नास्तीत्यादाविव इदंत्वाभावोस्तीत्यादावपि इदंत्व मतुवादिपदेभ्यो विशकलितानां
येव इदंत्वसंबंध्यादिपदार्थानामुपस्थितमाऽभावादिभिन्नविशेषणतया इदंत्वाद्युपस्थिति

सत्वेनाभावाद्यंशेऽदंडाद्यन्वयबोधस्य वारयितुमसंभवात्। निराकांक्षत्वेत्यस्यास्वारस्यप्र
संगाच्च। नन्वितरविशेषणतयेति व्युत्पत्तेर्नोभावानाभावः। प्रतियोगिपदादन्यपदन्य
त्कारकादपि। वृत्तिशब्दैकदेशेन संबंधस्तेनान्वेष्यत इति व्युत्पत्त्यं तद्देशे वदंडवान्नास्तीत्या
दौ दंडाभावबोधवारणासंभवात् अव्ययराजमातंग इत्यादौ राज्ञि अद्रादेरन्वय
वारणाय तादृशव्युत्पत्त्यंतर्भावे [illegible] वारकत्वस्यावश्यकत्वात्। समासस्यैव तद्वृत्तांत
स्यापि वृत्तिशब्दत्वादिति चेन्न तादृशव्युत्पत्त्यंतर्गतवृत्तिशब्दस्य समासरूपवृत्तिपरत्वा
त्। वस्तुतस्तु तादृशव्युत्पत्तिरभेदसंबंधेनान्वयपरा अत एव पितुः स्वर्गकामः चैत्र
स्येति मनुष्य इत्यादौ पित्रादेः स्वर्गादावन्वयोपपत्तिः। न चैवं प्रतियोगिपदकार
करूपदयोर्भेदनिवेशनमफलमिति वाच्यं। यथा प्रतियोगिपदकारकपदार्थयोर
भेदेनोक्तान्वयबोधस्तथा तद्भिन्नपदस्यापीति दृष्टांतविधया तदुपादानात्। तथा
वदंडवान्नास्तीत्यादौ दंडादीनां प्रतियोगितयाभावादावन्वयबोधवारणायेतरविशेष

ल न्वयेति व्युत्पत्तिरेव स्पष्टकीर्त्तिरिति । व्याख्यायां मनुवर्ण्यविशेषणत्वेनेति । अन्वयादित्यनेना
न्वयः अभ्यत्रेत्यादि यथासंख्यमन्वयादित्यंतेनान्वयः शोधितो विशेष्योपस्थापकं विशि
ष्टोपस्थितिस्वरूपयोग्यं तादृशास्यमनुवं तस्य पदार्थान्यालम्बनयाबाविशेषणमात्रपरत्वा
संभवादाह । व्याख्यायं व्याचेति । अनुयोगिनि सम्बन्धभावात्तथापीत्यादिना संसर्गाभा
वप्रतीत्यापादनमसंगतमत आह दंडिपदस्येत्यादि । विशेषइति । अर्थइत्यादिः तथाबो
धे । तथा बोधांगीकारे त्वयादंडसंसर्गाभावबोधांगीकार इति यावत् । तथा । दंडसंसर्गा
भावप्रतीतिः घटोनघटइत्यादेरपि असंगतिरिति पूर्वोक्तिदोषस्यापीदानीं संभवेन तदनुमा
न्यूनतापरिहारायाह पूर्वोक्तेति । दोषापातात्वेति । चकार उक्तसमुच्चायकः नन्वेवं दीधि
तिकारः पूर्वोक्तं विहाय स्थलांतरं किमित्युदाहृतवानित्याशंकायामाह चैत्रो नदंडीत्या
दि । तादृशबोधेति संसर्गाभावबोधेत्यर्थः उदाहृतवानिति । प्राधान्येनेत्यादिः तथेति
। संसर्गाभावेत्यर्थः अभावमात्रं । संसर्गाभावमात्रं मात्रपदेनाधिकरणांशव्यवच्छेदः

अभाववतः संसर्गाभाववतः न तद्रूपेणेति । तथा च चैत्रो न दण्डवानित्यादौ दण्डात्यन्ताभावव
दभिन्नश्चैत्र इत्याद्यन्वयबोधः अभेदेनान्वयबोधे च विरुद्धविभक्तिराहित्यस्य तंत्रत्वान्ना
नुपयोगिनि समस्यपदेऽप्येति भावः संसर्गाभावबोधे । संसर्गाभावमात्रबोधे । दीधितौ
प्रत्युक्तमिति तथा चाभाववत्त्वाद्यघटितनञ्घटितचैत्रो न दण्ड इत्यादितः संसर्गाभाव
प्रतीत्या चैत्रो न दण्डवानित्यादावप्युक्तरीत्या न संसर्गाभावबोध इति भावः लक्षणाकल्प
ने गौरवान्नेदं मेऽस्येत्यादौ सुविभक्तौ लक्षणायाः असंभवाच्च वस्तुतः इति हन्ति संबंधा
द्येति यथासंख्यमन्वयः व्याख्यातां सिद्धान्तितां चेदस्याव्याप्यवृत्तित्वमनभ्युपगम
तां प्राचां लक्षणावच्छेदेनेति । इदं च विभक्त्यन्वयितद्धर्मस्य तत्र तद्धर्मस्य विशेषणतया निवेश
स्य सूचकं विशेषणत्वे एव विशिष्टान्वयमहिम्ना तस्य संसर्गतया भानात् । न तु वैयधिकरण्यान
र्गतं । तद्घटवृत्त्यादीति आदिना तद्घटवृत्तित्वात्यन्ताभाववतः परिग्रहः नञर्थः नञल
क्ष्यः वृत्तिर्भिन्नं चेति तद्वतः प्रतियोगिपदादेव लाभः विशिष्टस्य नञर्थत्वे च प्रतियोगि

नरकादिभागान्वयासंभव इति एवं उशोवृत्तिभिन्नं चतुष्टयवंतादिपदवदेकवृत्तिविषयं एवं च वृत्ति
रित्यस्य वृत्तित्वं आश्रय इत्यर्थः अन्योन्यो नोष्ठानुकारादितिभावः विशेषणत्वमिति
एतत्प्रयोजनं रक्तत्वदशायामित्यादिना स्वयमेव वक्ष्यति पक्वतादशायामयं न श्याम
इति व्यवहारो न भवत्येवेति सर्वलोकानुसारात् इदानीं न श्याम इति श्यामत्वविशिष्टे
ति। अत्र श्यामत्वादेः स्वावच्छेदकीभूतपर्याप्त्यवच्छिन्नत्वसंबंधेन वृत्तित्वे पारतंत्र्येण प्र
कारतया भानं विशिष्टान्वयमहिम्नेति। अयं अयमिदानीमिति भ्रमे तत्कालविशिष्टे
मनुवंतार्थान्वयेन विशिष्टान्वयमहिम्ने तत्कालस्य मनुवंतार्थे आधेयतया भानेऽपि
तत्कालीनत्वं मनुवंतार्थे लब्धं तेन नेदानीमित्यस्य व्यावर्तकत्वमिति ध्येयं विशे
षणत्वप्रयोजनमाह रक्तत्वेति न बाध इति अन्यथा घटस्य श्यामत्वोपलक्षितत्वेन बाधः
स्यादितिभावः। ननु श्यामभेदस्यापि श्यामवैधर्म्यतया न श्यामभेदभावसिद्धिरि
ति न न तदेकाप्यवृत्तित्वमवच्छेदकमत आह विधिनेवैधर्म्यं चोत्तरं रक्तत्वादिकमेवेति

एवकारेणाश्यामभेदव्यवच्छेदः व्याख्यायां रक्तत्वादिकमिति । ननु श्यामभेद इति शेषः दीधि
तौ न तु पृथगिति तथाच रक्ते श्यामावधिकपृथक्त्वाभाववद्वृत्तित्वेन श्यामभिन्नाभाववत्साध
नात् । श्यामभेदासंभवेन रक्तत्वाद्यात्मकमेव वैधर्म्यं पर्यवस्यतीति भावः । तेन न सिद्धान्तिना
मते पृथक्त्वस्य भेदातिरेकेण पृथक्त्वाभावस्याव्याप्यसंयतत्वेपि श्यामभेदाभावस्याचार्य
संमतत्वासिद्धान्तेष सिद्धिरित्याशंकाया अनवकाशः एतेन ननु पृथगित्यस्यानुभि
न्न इत्यर्थ इत्यपि परास्तं सिद्धान्तिनापृथक्त्वस्य भेदातिरेकेण शक्यताता इत्यावर्तलाभासंभ
वात् । उक्तरीत्यैवोपपत्तौ लक्षणया तत्पर्यमानाभावात् एवं च नायं तदुद्धारपं मूलेकपि
मानि त्याद्यपि तदुद्धर्तकपिमादृत्य वैधर्म्य तदुद्धः कपिसंयोगाभावादिकमेवं विवप
इति नातृशिष्यवहारादृपि न भेदस्याव्याप्यवृत्तित्वसिद्धिरित्यवधेयं । वदन्तीत्यस्वरसो
भावनं नवीनं वस्त्वं चैत्र तद्धर्मस्वरूपवैधर्म्येणोपपत्तौ भेदविलोपापत्तिः न
च घटो न पट इत्यादौ भेदत्वप्रकारकज्ञानस्यानुभवसिद्धतया न तल्लोपसिद्धिरिति वाच्यं । प्र

कृतेपि तुल्यत्वात् न च पृथक्त्वाभावेन भेदाभावः साधनीय इत्युक्तमेवेति वाच्यं । भेदत्वप्रकार
कज्ञाने विरोधेन पृथक्त्व [illegible] भावभेदाभावव्याप्यत्वे बाधा चेतिन
रूपाभाव इत्यादि भेदविषयकत्वमेव न तु रक्तत्वाद्यात्मकवैधर्म्यविषयकत्वमिति । न
नु पृथक्त्वस्य भेदानतिरिक्तत्वांगीकारेण अव्याप्यवृत्तित्वं न संभव
ति तथा सति रूपाभावे रक्तो न पृथगित्यादेरयोग्यतापत्तेरित्यत आह कृतं पल्लवि
तेनेति । न च अयमतेन अपृथक्पदस्य न तु अव्याप्तिकृत्वावच्छिन्नभेदपरत्वाद्वा योग्यत्वापत्तिरिति
भावः । वस्तुतस्तु । न तु अव्याप्तिकृत्वावच्छिन्नभेदपरत्वस्यातिगौरवग्रस्तत्वयोग्यतादर्शितायो
ग्यतापत्तिरेवात्र वदंतीति भेदाव्याप्यवृत्तित्वमते ऽस्वरसस्फ विकातव्या [illegible] सागत्यायं न रूपा
भाव इत्यादेरक्तत्वादिरूपवैधर्म्यविषयकत्वमेव घटो न पट इत्यादेस्तु बाधकाभावेन भे
दविषयकत्वमेवेति सिद्धांतिमतस्यैव सम्यगित्याशयेनाह । कृतं पल्लवितेनेतीति युक्त
मुक्तरूपाभावः व्याख्यायां तत्प्रवेश इति संबंधघटकेश इत्यर्थः । न च व्यवधकत्व मिश्रितत्वाधिकर

णत्वस्यैव षष्ठ्यर्थत्वप्रयोजकत्वं पृथगंशे दीधितिकारेण निरूपणं तस्य च संयोगाद्यात्मकत्व
व्यापकत्वं संयोगत्वेन तत्र चेष्टासंभव इति वाच्यं। संयोगे नाधिकरणत्वस्यानुयोगितासं
बंधेन संयोगवत्त्वरूपत्वस्याऽपेक्षणात्। अथैवमपि व्याप्यव्यापकभावाज्ञानेपीत्यादि
मूलात् व्याप्यत्वं स्वसंबंधत्वेन षष्ठ्यर्थ इति प्रतीयते न तु कथं संयोगत्वादिनैव तत्रैवे
ष्टा इति तन्मूलं तत्त्वनिरूपणमिति चेन्न तन्मूलस्य संयोगत्वादिना संयोगात्मकाधि
करणत्वं षष्ठ्यर्थ इत्यत्रैव निरूपिततत्त्वमेतदित्यनेन तात्पर्यवर्णनात् एवं च तन्मूले
व्याप्यव्यापकभावाज्ञानेपि व्याप्यव्यापकभावज्ञानं विना संबंधत्वेनैव संयोग
त्वादिनैव भानस्य यथोक्तव्याप्तिबुद्धौ भानस्य तथात्वेनाज्ञायमानस्य व्याप्तित्वेन
व्याप्तिबुद्धावभानस्य वस्तुसतः वस्तुनि [illegible] संयोगाद्यात्मकाधिकर
णत्वस्य षष्ठ्यर्थत्वं न तु व्याप्तित्वविशिष्टस्येत्यन्वयः तथा च यत्संबंधेनैव सह सा
ध्यस्य व्याप्यव्यापकभावः संबंधो न षष्ठ्यर्थः किं तु यद्वत्ता सह संयोगाद्यात्मका

भवानं-दी०
३३

धिकरणत्वमेव मूलार्थ इति लभ्यते तात्पर्यं। अन्यथा प्रकारांतराश्रयणे एकाधिकरणं
शास्त्राधिकरणाद्वितीयमित्यनेन तत्सम्यत्नीयदर्शितरीत्या व्याप्यव्यापकभावारोपने
पीत्यस्य विरोधेन पूर्वापरग्रंथविरोधो निरूपित तत्वमेतदिति ग्रंथात्स्वारस्यादिकं वस्या
दिति संबंधव्याप्त्यविरोधे यथा कथंचित्तद्विरोधेन व्याख्यानमेव महत्वोऽस्य समा
धानमिति निर्मत्सरैः श्रेयस्याद्विरेवसहस्रदशावधानमपि स्थलं बहुजनव्येवना कार्य
तावच्छेदकं। तल्लिंगकत्वसाध्यकव्याप्तिज्ञानकार्यतावच्छेदकं। वस्तुतस्तु मेवेति। नवप्रच्य

२४

मतत्व प्रयत्नस्यावच्छेदकत्व घटितत्वेन न ताद्रूप्य संभव इति वाच्यं। तत्रापि प्रतियोगितावच्छे
दकावच्छिन्नत्वं यत्नप्रवृत्तीसे वस्तुतस्तु गोत्वेन यथा घटस्यापि संभवात्। माण्यास्तु लिंग
ज्ञानावच्छेदकत्व घटितलक्षणं वस्तुतस्तु बाध्येप. शक्ति तु उभयाभाव प्रतियोगितावच्छेद
कत्वसमानाधिकरण द्वितीयस्य बाधानतु निर्वचनाभिप्राये तस्मात्। दीधितौ ताद्रूप्येति॥१
तादृशाभावानभ्युपगम्यादिति मूलवाक्यस्यार्थः। अभिप्राय इत्यादि ग्रंथेन न्यायः। तस्यार्थ

राम
३३

मेवञ्च तस्मादाधारत्वं व्याख्यायामिति प्रतीतिः इत्यादि प्रतीतितः घटो नास्तीति प्रतीते र्वि
षय विकल्पासंभवात् इह घटपटौ न स्त इति एवमत्रेपि । द्वित्वैकैकेति घटाभावप
टाभावे स्पष्टः घटपटौ न स्त इत्यत्रान्वयितावच्छेदकं द्वित्वं घटत्वं पटत्वं च तत्र द्वित्वस्य
प्रतियोगितानवच्छेदकत्व पक्षे परिशेषात् अन्वयितावच्छेदकावच्छिन्न प्रतियोगिताकत्व
व्युत्पत्तिमर्यादया घटपटत्वाद्यवच्छिन्न प्रतियोगिताकत्वस्यावश्यं विषयिकरणेन त
त्र प्रामाण्यसंशयं विनाप्यनुभूयमानस्तथापि घटत्वान्नवेत्यादि संशयो न स्यादिति
भावः । द्वित्वस्यैव घटत्वादेरनुपलम्भस्य तथाभावाभिप्रायेण इह व्याख्यायां घटत्वा
देरिति । नानुपपन्न इति तद्धर्मावच्छिन्न प्रतियोगिताकाभाव निश्चयस्यैव तत्संशय
प्रतिबंधकत्वादिति भावः । यत्वन्वयितावच्छेदकावच्छिन्न प्रतियोगिताकव्युत्पत्तिभंगा
पत्त्या नन्वभावस्येत्यादिना स्वयमेवैतद्दूषयिष्यमाणतया चेदं संगलमिति के
न चिदुक्तं । तन्न तादृशव्युत्पत्तिसंकोचभंगी कृत्योक्त प्रथमदोषाभावात् अन्यथा न

भवानं॰टी॰
३७
35

त्वाभावस्यैवेत्याशंकाया अव्यसंगत्यापत्तेः एतस्याननुगतविषयकत्वाभिप्रायकतयाननुगतत्वा
भावस्यैवेत्यादेस्त्वनुगतविषयकत्वाभिप्रायकतया द्वितीयदोषाभावात् गुरुत्वस्तु घट
पटौ न स्त इत्यादिशाब्दबोधस्याद्वित्वाश्रयवृत्तिघटत्वाद्यवच्छिन्नप्रतियोगिताकाभा
वविषयकतयानैकैकाभावसंशयप्रतिबंधकत्वमित्याशयेनाह घटत्वादेरितिश्रु
घटत्वादेरित्यर्थः। नानुपपन्नम् इतिश्रु द्वघटत्वाद्यवच्छिन्नप्रतियोगिताकाभाववि
षयस्यैव तादृशसंशयप्रतिबंधकत्वादिति भावः एवं च नोक्तदोषद्वयसंभावनापीत्या
शयः। दीधितौ अनुगताकारेति अनुगतोल्लेखवादिनानुगताकारत्वसिद्धेस्सर्वसिद्ध
त्वादित्याशयः एतेन तादृशप्रतीतौ नित्यं निरुक्तमनुगताकारत्वं नानुव्यवसायग्राह्य
मनस्तु आयोग्यत्वात् तर्कसाचिव्यमनपेक्ष्यागृह्यमाणमपि तत्र प्रामाण्यसंदेहे
न तत्प्रमाविषयत्वेनोपस्थापनासांहं अनुकूलतर्काभावेनोपस्थितस्योपनीतभानानि
यमेन तादृशाग्रहणमपि संदिग्धमेवेति कस्यचिदालपितमपास्तं। आरव्यायां कित्व

राम
३८

अथप्रतियोगिकत्वं प्रतियोगितासंबंधेन छित्वाश्रयवत्त्वं । दीधितौ मात्रमित्यनेन घटत्वा
देः प्रतियोगितावच्छेदकत्वव्यवच्छेदः तथाच नोक्तवैलक्षण्यसंशयानुपपत्तिर्नवावि
षयानुगमः एवमग्रेपि व्याख्यायां प्रकारः उपलक्षणं तथाप्रकारः आनुभविकत्वा
दिरिति अन्वयितावच्छेदके स्वादिकमुपलक्षणमिति भावः । दीधितौ छित्वसमानाधिकरणे ति
। छित्वसामानाधिकरण्योपलक्षितधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेन छित्वा
श्रयवत्वमित्यर्थः इदं च प्रतियोग्यंशे तु व प्रतियोगितावच्छेदकांशेप्युपलक्षणं त
थाभानांगीकर्तृप्राचीनमतानुसारेण । तेनाभावप्रतियोगिवच्छेदककोटावुपल
क्षणं तथाभानाभावादिप्रसंगत इति शंकानवकाशः । नवीनास्तु प्रतियो
गिताप्रकारकबोधाभिप्रायेणेदं तत्रोपलक्षणतयाभानस्य सर्वसंमतत्वादिति
वदंति तच्चिंत्यं घटं नास्तीति दीधितिग्रंथासंगतेः प्रतियोगितासंसर्गकबो
धस्यैव तदाकारत्वात् । छित्वसामानाधिकरण्याभानेपीति । अनुगमकं यत्र

द्वित्वसामानाधिकरण्यं संसर्गविधयापि तद्विषयतां विनापि अनुगताकारत्वात्। अनुग
ताकारविषयकत्वस्यानुभविकत्वात्। घटत्वपटत्वाद्यन्यतरावच्छिन्नेति। घटत्वपट
त्वाद्यन्यतरत्वोपलक्षितधर्मावच्छिन्नप्रतियोगितासंबंधेन द्वित्वाश्रयवदभाव इत्य
र्थः। अन्यतरत्वानुल्लेखेपि अनुगमकं यदन्यतरत्वं संसर्गविधयापि तद्विषयतां
विनापि। परंतु द्वित्वसामानाधिकरण्याभानेपीत्यस्य घटत्वादेर्द्वित्वसामानाधिक
रण्यानुपस्थितावपीत्यर्थः अन्यतरत्वानुल्लेखेपीत्यस्यापि घटत्वादेरन्यतरत्वा
नुपस्थितावपीत्यर्थ इति तन्तुच्छं। संसर्गतयाभानस्यानन्यथाप्रागुपस्थितत्वापेक्षत्व
त्वा। अनुपस्थितावपीत्यनुक्ताभानेप्यनुल्लेखेपीत्युक्तेरस्वारस्यान्न। अत एवाक
पर्यं प्रकारतयाभाने घटादिवृत्तित्वानुपस्थितावपीत्येव वक्ष्यति। व्याख्यायाम
नुल्लेखः संसर्गविधयापि विषयत्वाभावः अतिप्रसक्तेति अन्यतरत्वेत्यर्थः।
उपस्थितेघटत्वादौ अवच्छेदकत्वाग्रहेपि तादृशाग्रहासंभवोपि बोध्यः अपिनेत्या

रा म
३५

त्तिः व्यभिचारादिति वन्हित्वाद्यावृत्तिप्रसक्तव्यापकतावच्छेदकत्वेनोपस्थितेष्वेवच्छेदकत्व
ग्रहादिति भावः घटवन्नोभवेतितथाचद्विवचनंतादृशाद्वित्वनाश्यलौकिकं प्रकृतेस्ता
त्पर्यग्राहकत्वमित्याशयः। द्वित्वादेरितीति तथाच घटादिवृत्तित्वानुपस्थितेरेत
त्र लक्ष्यत्वाधिनसंभवतीति भावः। एकविशिष्टापरत्वस्य घटविशिष्टपटत्वस्य
होधितेः। विरुद्धयोरपि विरुद्धत्वेनज्ञातयोरपि। अत्र वदंति विरुद्धयोरपीत्यादिक
मायाततः विशेषदर्शनकालेपि वैशिष्ट्यांशे आहार्यरूपायां तादृशप्रत्यक्षात्मक
बुद्धेः शंखे पीतत्वाभावनिर्णयदशायां पीतः शंखो नास्तीति शाब्दबोधादेरिव
तादृशधर्मितावच्छेदकीयविषयताशून्यजलत्वविशिष्टपृथिवीत्वं नास्तीति
शाब्दानुमित्योरपि बाधकाभावात्। नच प्रतियोगितावच्छेदकविशिष्टमप्रसि
द्धमितिवाच्यं। विशिष्टस्यानतिरिक्ततया तद्घटकीभूतपदार्थेषु प्रतियोगिताव
च्छेदकत्वसंभवात्। सतिचापेक्षितत्तज्ज्ञाने तदप्रसिद्धिरितस्य वार्थभूत्यत्वात् सा

त्रेऽप्यस्ति अनुगमनं तु विरोधस्य बाधविषयेति व्याख्यायां अनपायादिति। वन्ह्यादि
साधारण्यद्वित्वस्यातिप्रसक्तत्वेऽवच्छेदकत्वासंभवेन तदवच्छिन्न तदभावप्रति
योगितायां वन्ह्याद्यावपि सत्त्वादिति भावः। अतिप्रसक्तमपीति अन्यूनवृत्तित्व
समनैयत्यस्यैव प्रकृते स्वरूपसंबंधरूपावच्छेदकत्वांगीकारादिति भावः। तदये
ति तत्पदेन घटं तरवतीत्यत्र यद्रूपं तदंतर्निविष्टं तस्य परामर्शः। वस्तुतस्त्वित्यादि
वक्ष्यमाणदूषणाद्यापातत इति द्वित्वविशेषः घटपटीयद्वित्वं। अननुगमात्
तत्तत्कालीनतत्तत्पुरुषीयापेक्षाबुद्धिजन्यानां तेषां नानात्वादिति भावः। तदंतर्गत
व्यक्तिविशेषस्य तद्व्यक्तित्वेनावच्छेदकत्वेनाननुगमइत्यत आह। तत्तत्पद्वित्वेनतेन
घं। व्यक्तित्वेन घटपटवृत्तिद्वित्वं घटपटवृत्तित्वेनानुगतीकृतं घटपटीयद्वित्वसा
मान्यं। तथा घटपटौ न स्त इत्याकारेण प्रत्ययात्। शब्दे नैत्यादि। द्वित्वं द्वित्वत्वा
वच्छिन्नं। तद्धर्मितावच्छेदकीभूतं। तदाश्रयांशे विशेषणीभूतं तथा। प्रतियोगितावच्छे

राम
३६

दकं। त्रयाणामवच्छेदकत्वे प्रतियोगितावच्छेदकावच्छिन्नेन सहाभावस्याविरोधेन केवल
घटादिमति तादृशप्रतीत्यनुपपत्तिरत आह प्रतियोगितावच्छेदकत्वं चेति। व्यासज्य
वृत्तीति तथा च प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणसमुदायावच्छिन्नेनैव स
हाभावस्याविरोधान्नोक्तानुपपत्तिरिति भावः। ननु तादृशसमुदायस्य विरुद्धधर्म
द्वयघटितत्वात् तदवच्छिन्नाप्रसिद्धिरत आह प्रतियोगितावच्छेदकावच्छिन्नं चेति।
घटपटोभयमिति। यद्विशेषणेन यावत्त्वावच्छेदकतापर्याप्तिस्तदवच्छिन्नं तत् एवं
क्रमेण प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नं घटपटोभयमेव घ
टत्वपटत्वयोर्विरुद्धत्वेऽपि द्वित्वधर्मिविशेषणेन तथात्वयोस्तत्पर्याप्तिसत्त्वेन द्वि
त्वधर्मिसंख्याघटत्वपटत्वावच्छिन्नत्वादिति भावः। न कोऽपि दोषः नाप्रसिद्धिः। वस्तु
तस्तु स्वप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नस्वनिरूपकता
वच्छेदकतापर्याप्तिकाधिकरणेन सहासहाभावस्य विरोधः प्रथमस्वपदस्याभावप

रं द्वितीयमधिकरणं तापरं घटत्व,टाद्युभयाभावस्य विरोधिनी घटत्वस्य द्युभयाधिक
रणतेवेति तत्त्वं अवच्छेदकं प्रतियोगितावच्छेदकं तेनेत्यादि वक्ष्यमाणानुपपत्तिमाशं
क्याह धर्मितेति अन्यूनवृत्तित्वेन ततस्समनैयत्येन अभेदे वा तृतीया एवमत्रापि घट
त्वपटत्वाभ्यां किमपि नास्तीत्याशङ्क्य वस्तुतः घटो नास्ति इत्यादावुक्तरूपप्रत्याद्वित्वस्याभाव
प्रतियोगितावच्छेदकत्वेपि घटपटौ न स्तः इत्यादौ तस्य तत्त्वे मानाभावः पूर्वोक्तयुक्तीनां
मप्रयोजकत्वात् तथा हि प्रागुक्तरीत्या द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगि
ताकत्वसंबंधेन घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकत्वसंबंधेन वा द्वित्वाश्रयत्वे
त्वमेवाभावे तादृशप्रतीतिविषयः तादृशप्रतीतेः तद्विषयकत्वव्यतिरेके ऽनुभवासिद्ध
त्वस्य प्रायशो निर्देष्यत्वात् एवं च द्वित्वसामानाधिकरण्याभावे पीतस्य तरत्वाद्यनुगते
रेव पीत्याद्यद्भुषणस्य प्रयोजकं द्वित्वादेः घटादिवृत्तित्वानुपस्थितावपीत्यादिकमपि
मंद ।स्वपर्याप्त्यधिकरणघटपटसंयोगादिसंबंधावच्छिन्नद्वित्वसामान्याभाववत्त्वे वा तादृशा

प्रतीतिविषयत्वोपगमेन घटितत्वात् घटादिवृत्तित्वानुपस्थितेरकिंचित्करत्वात्। अत एवैक
विशिष्टेत्याद्यपि न सत्। सामानाधिकरण्यसंबंधेन घटविशिष्टसंयोगादिना घटा
भावस्यैव घटपटौ न स्त इत्यादिप्रतीतिविषयतया जलत्वविशिष्टसमवायादिना
पृथिवीत्वाद्यभावस्य च जलत्वपृथिवीत्वे न स्त इत्यादिप्रतीतिविषयतायामेकविशि
ष्टापरत्वस्योपस्थित्यनपेक्षणात्। विरोधपरिहारार्थं च। न चैवमपि घटपटयोर्जल
त्वपृथिवीत्वयोश्च प्रतियोगित्वेनोल्लेखानुपपत्तिरिति वाच्यं। घटविशिष्टसंयोगे
न पटाभावस्य पटविशिष्टसंयोगेन घटाभावाभिन्नतया जलत्वविशिष्टसमवायेन
पृथिवीत्वाभावस्य पृथिवीत्वविशिष्टसमवायेन जलत्वाभावाभिन्नतया उभयोरे
व प्रतियोगित्वेनोल्लेखोपपत्तेरिति चेन्न घटपटौ न स्त इत्यादावनेकाभावविष
यकत्वकल्पनामपेक्ष्यैकाभावविषयकत्वे लाघवेन घटितावच्छिन्नप्रतियोगि
ताकाभावसिद्धेरावश्यकत्वात्। अन्यथाधिकरणातिरिक्ताभावस्याप्यसिद्धेः

प्रसंगात्‌। किं च तद्धर्मावच्छिन्नविशिष्टबुद्धौ तद्धर्मावच्छिन्नप्रतियोगिताकाभावनिर्ण-
यप्रतिबंधकत्वस्य सर्वसिद्धतया धित्वावच्छिन्नविशिष्टबुद्धौ तदवच्छिन्नाभावनिर्ण-
यस्य प्रतिबंधकत्वानुरोधेन घटत्वादेरभावप्रतियोगितावच्छेदकत्ववत्तद्धित्वादेरभा-
वप्रतियोगितावच्छेदकत्वमावश्यकं। न चैतादृशप्रतिबंधकत्वमास्तामिति वाच्यं।
तद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारतावच्छेदकतासंबंधेन विशिष्टबुद्धौ त-
(द्धर्मावच्छि) न्नविषयभेदभिन्नतयान्यत्र तथाप्रतिबंधकत्वेपि प्रकृते उपदर्शितविष-
यताशालिनिर्णयस्यैव प्रतिबंधकत्वमास्तामिति वाच्यं। तद्धर्मावच्छिन्नविशेष्यता-
निरूपितप्रकारतावच्छेदकतासंबंधेन विशिष्टबुद्धौ तद्धर्मावच्छिन्नविशेष्यता-
निरूपिताभावप्रकारतानिरूपितप्रतियोगितावच्छेदकतासंबंधेनैकविधप्र-
तिबंधकत्वस्यैव लाघवेनांगीकारात्‌। अपि चाभावप्रतियोगितावच्छेदककोट्या-
मुपलक्षणस्य तथाभानाभावेनाभावबुद्धौ प्रतियोग्यंशे उपलक्षणस्याप्रकारत्व

नियमेन विशेषणतयाभावस्यावच्छेदकत्वनियमेन चोपदर्शितप्रकारासम्भवेन द्वि
त्वादेरभावप्रतियोगितावच्छेदकत्वं दुष्परिहरं । एतेन घटपटौ न स्त इत्यत्र घटत्वपट
त्वयोरेव प्रतियोगितावच्छेदकत्वं व्यासज्यवृत्ति न तु द्वित्वमन्तर्भाव्य । तस्योपल
क्षणतयैव प्रतियोग्यंशे भानात् विशेषणत्वे त्ववच्छेदकत्वस्वभावानाभावेनाक
ल्पनात् । घटत्वपटत्वपर्याप्तप्रकारतावच्छेदकताबुद्धेस्तत्पर्याप्तप्रतियोगितावच्छे
दकताकाभावनिर्णयस्य प्रतिबन्धकत्वसंभवात् घटपटौ न स्त इत्यत्र घटत्वपट
त्वपर्याप्तप्रतियोगितावच्छेदकताकैकाभावविषयकत्वसंभवाद्वेत्यपि केषाञ्चिन्म
तं निरस्तं । केचित्तु घटपटौ न स्त इत्यत्र घटपटोभयवृत्तिद्वित्वमेव प्रतियोगितावच्छे
दकं न तु घटत्वं पटत्वं च तथा च तत्र घटपटोभयवृत्तिद्वित्वविशेषावच्छिन्नप्रतियो
गिताकत्वं संसर्गविधया विषयस्तत्र च घटपटोभयवृत्तित्वानुपस्थितावपि
तस्य तत्संसर्गत्वे च तज्ज्ञानादित्याहुः । तन्नोक्तयुक्त्या घटत्वादिरूपेणत्वासंभ

भवानंदी
३९
३१

वेन प्रतियोगितावच्छेदकत्वावश्यकत्वात् । परंतु सामानाधिकरण्यसंबंधेन घटत्वपटत्व
रूपावच्छेदकतावच्छेदकधर्मैक्यात् तेनोभयत्वविशेषरवतत्र प्रतियोगितावच्छेदकइति
वदंति । तदप्यसत् तत्र घटत्वादिप्रकारेणोभयत्वस्याभानात् घटत्वादीनां प्रतियोगितावि
शेषणत्वेनैव भानेन प्रतियोगितावच्छेदकत्वस्यावश्यकत्वाच्चेति दिक् तदेतत्सर्वमभि
प्रेत्याह यथा तूभयवद्भूत्वमिति । तदुभयत्वमेवेतीति । एवं च दीधितौ तदुभयत्व
मेव प्रतियोगितावच्छेदकमिति पाठः तदुभयत्वमेवेत्यस्य वह्नित्वं हृदत्वं उभयत्वं चै
त्यर्थः प्रतियोगितावच्छेदकमित्यस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणमि
त्यर्थः । उभयत्वमेवेतिपाठेपि तदुभयत्वमेवेत्यर्थः । अन्यथोक्तरीत्योभयत्वमात्र
स्य प्रतियोगितानवच्छेदकत्वेनासंगत्यापत्तेः । वस्तुतस्तु उभयत्वमेवेतिपाठ
श्रुतमेव सम्यक् न चोक्तदोषः वह्निहृदोभयाभावादेर्वह्निहृदमात्रवृत्तिपर्याप्त्य
धिकरणत्वादिसंबंधेनोभयत्वस्य प्रतियोगितावच्छेदकत्वोपगमे नादोषात् । न चैवं

राम
३९

वह्नि हेतौ नस्तदृत्याधाराधेयभावस्य व्यधिकरणधर्मावच्छिन्नाभावत्वप्रसंगात् इति वाच्यं। धर्म्यंशे वृत्तित्वे संयोगसंबंधावच्छिन्नप्रतियोगिता प्रत्येतव्या। स्वरूपसंबंधावच्छिन्नत्वस्य वा स्वसमानाधिकरणत्वविशिष्टस्य चाभावरूपस्य व्यधिकरणैकसंबंधावच्छिन्नप्रतियोगिताकाभावमादायातिव्याप्तिवारणाय घटत्वसंबंधावच्छिन्नत्वतन्त्रत्वसंबंधावच्छिन्नत्वयोर्निवेशनीयत्वाद्विशेषणताविशेषस्यापि निवेशेन लाघवात् स्येव निवेशउचितइत्याशयेनाह विशेषणतेति। यत्किंचित्स्वरूपस्येव भेदत्वस्य तद्घटकस्येव वा विषयितया तद्ज्ञानस्य विशेषणतयाऽभावस्य विषयितया यो गोलकभेदत्वव ज्ञानस्य विशेषणतयाभावस्य च समनियतत्वाद्विविधाभावः प्रतियोगितावच्छेदकतापीति न चैवमपि विषयितया यो गोलकभेदत्वं ज्ञानस्य विशेषणतयाभावमादायातिव्याप्तिर्दुरुद्धरैवेति वाच्यं। साधनसमानाधिकरणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानिरूपितयद्धर्मसंबंधावच्छिन्नावच्छेदकताश्रयायावन्तो धर्मास्तद्धर्मावच्छिन्नसमानाधिकरणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानिरूपिततत्संबंधावच्छिन्नावच्छेदकताश्र

यायावंतोधर्मायद्धर्मावच्छिन्नसामानाधिकरण्याभावीयविशेषणताविशेषावच्छिन्नप्रतियोगि
तानिरूपिततत्तत्संबंधावच्छिन्नावच्छेदकताश्रयास्तद्धर्मावत्त्वोक्तसामानाधिकरण्यस्य विव
क्षितत्वात्। वस्तुतस्तु। यद्यत्संबंधावच्छिन्नतत्तत्संबंधावच्छिन्नेत्यत्रापि लाघवाद्विशेष
णताविशेषावच्छिन्नत्वमेव निवेशनीयं। अधिकमुक्तं पूर्वपक्षग्रंथे। यथाश्रुते। यथा
श्रुतमूले। अभावे वेति इदं च मूले प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकात्यंता
भावेति समस्तपाठाभिप्रायेण बोध्यं। यावत्त्वाद्यनवच्छिन्नेति। आसज्यवृत्तिधर्मा
द्यनवच्छिन्नेत्यर्थः एवमग्रेपि उभयत्वादीति। आदिनाएतत्तद्रूपसामान्यरूपव्यवृत्तित्वविशि
ष्टत्वसंबंधविशेषादिपरिग्रहः रूपसामान्याभावाभावादिकमादायाप्रसिद्धिसंभवा
द्दाहाभावस्येति। ननु तादृशाविवक्षणेपि एतद्रूपानधिकरणतद्वृत्त्यत्वविशिष्टसत्तात्यं
ताभावे तद्रूपाधिकरणे तद्वृत्त्यत्वविशिष्टसत्तात्यंताभावो यत्तत्त्वावच्छिन्नाभावा
भावादेरप्रसिद्ध्यावश्यं गगनत्वमादायैव केवलयावद्भावाधिकरणाप्रसिद्धिर्दुर्वारैवेत्यत आह।

वक्ष्यमाणदिशेति मतान्तरे जलत्वस्येव वत्वादित्याशो वक्ष्यमाणमाक्षिवारणरीत्येवार्थः अप्र
सिद्धेरसंभवादिति। तद्धटे तद्घटान्यतरान्यत्वविशिष्टसत्ताद्देरेवतादृशान्यतरत्वावच्छिन्नाभा
वादिरूपतया तद्घटे तद्घटान्यतरान्यत्वविशिष्टसत्ताभावादेरेवतदभावादिरूपतया ता
दृशान्यतरत्वावच्छिन्नाभावादेरभावरूपत्वेपि तदभावत्वस्य कस्मिन्नेवोक्तविशिष्टाभावा
दौ लाघवेन कल्पयितुमुचिततया तदभावस्य यावदन्तर्गतत्वेपि तद्घटितयावदभावाधि ८५
करणत्वस्य तद्घटे एव प्रसिद्धेरिति भावः गुरुधर्मस्य हेत्वधिकरणवृत्तिपदभावप्र
तियोगितावच्छेदकावच्छिन्नप्रतियोगिताकायावत्तत्तदभावास्तत्समानाधिकरण
साध्यसामान्याधिकरण्यं आख्येरिस्युक्ते तन्नाप्रसिद्ध्यसंभवान्नापशङ्क्यमुक्तमित्याहुः
ननु वह्निमान्धूमादित्यादावपि चालनीन्यायेन धूमसमानाधिकरणतां। म
हानसीयवह्नित्वाद्यवच्छिन्नाभावानां यावदन्तर्गततया तद्घटितयावदभावसामा
नाधिकरण्यस्य क्वापि साध्येऽसंभवात्कुतो नोक्तमत आह वह्निमानिति। प्रतीकार

संभवादिति महानसीयधूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रति
योगिताकयावदभावसामानाधिकरण्यस्य महानसीयवह्न्यादौ संभवादिति भावः। तन्न
दधिकरणेति हृदादीत्यर्थः। अतिरिक्तत्वात्। अतिरिक्तत्वांगीकारसंभवात्। कस्यचित्
अभावे यावत्त्वहाने साध्ये ताद्दशयावदभावाधिकरणवृत्तित्वोक्तावेव ताद्दशयावदभा
वाधिकरणाप्रसिद्ध्यादिदोषो न तु ताद्दशयावदभावेषु साध्यसामानाधिकरण्योक्ता
वित्यभिप्रायेण तथा परिष्कुर्वतः। मूलानुसारेणेति स्वमते यथाश्रुतमूललभ्यवि
शेष्यविशेषणभावपरित्यागादित्यमतेन तद्परित्यागादिति भावः। न च तन्मतेऽपि
यावदभावेषु साध्यसामानाधिकरण्यं कथं मूललभ्यमत आह इत्थं चेति बोध्यमिति
।इदमुपलक्षणं यावदिति वाक्यं भिन्नपदं तन्नत्प्रतियोगिकात्यन्ताभावविशेषणा
र्थकमित्यपि द्रष्टव्यं। द्वितीयाभावे यावत्त्वविशेषणे पूर्वं परिनिष्ठितं रूपवान्पृथिवीत्वा
दित्यादाव्याप्तिं परिहरन्निरूपवान्निति। अत्रापि संबंधविवक्षादिकमग्रे वाच्यं। ते

ननुकोऽपिहेत्वभावइतिध्येयं। उक्तान्निकाल्लादइत्यजलत्वकालत्वद्रव्यपृथिवीध्वंसे तेनपृथिवीगंधादित्यग
परमाणौ रूपसामान्याभावाभावस्यत्र प्रतियोगिवैयधिकरण्यं। सम्बन्धेतसामान्याभा
वस्यो सन्निकाले इत्यधिकरणेऽसत्वेनतदभावमादायाव्याप्तिर्वन्ह्यादिसाध्यकेसंभव
तीत्यतआह। सम्बन्धेनेति। सन्निवेशेति तत्रचसाध्यसामान्याधिकरणसत्वात्राव्याप्ति
संभव इतिभावः अभावस्याभावमितिपाठः अभावस्याभाव इतिपाठे अभावस्या
भावोजात्यादिकमितितस्यादायेतिपूरणं संबलितोर्थः। केचित्तु दीधितावव्याप्तिपदसं
भवपदं कपिसंयोग्येतद्वृक्षत्वादिसाध्याहावव्याप्यभावेनप्रतियोगिवैयधिकरण्य
निवेशेप्रयोजनाभावात्कपितरोस्याव्याप्तिमात्रधर्मादिसाध्याहावपिलक्षणसमं
न्वयासंभवात्प्रमेयं वाच्यत्वादित्यादौतु द्रव्यसामान्याभावाभावात्मकेतादृशे
प्रावरंतर्गतेगगनादौप्रमेयत्वसामान्याधिकरण्याभावेनलक्षणसमन्वयासं
भवः प्रमेयंगुणत्वादित्यादावपिगगनादेस्तादृशगुणत्वद्रव्यसामान्यान्यतराभा

भवानं-दी
४२

वाभावात्मकत्वेन तत्त्वप्रत्यक्षसमन्वयादित्याहुः। दीधितौ अभाववत्त्वात्त्वभावभिन्नोऽत्यंताभाव

वीभ्यां हार्दमिति पाठः। अभाववत्त्वात्त्वस्य पर्यवसितोऽभावाभवत्त्वाभाववत्त्वेत्यर्थ इत्याशये

नात्यंतपदद्वयोपादानमिति व्याख्यातं। वाभावेति। रूपध्वंसप्रागभावयोः विनिरवित्त

योस्तयोरपि। रूपसामान्येति। प्राचीनमते रूपसामान्याभावस्य रूपध्वंसादिप्र

तियोगिकत्वादिति भावः। स एव। जलत्वेनेत्यत्रादित्याद्यवमाभिरूपरव। दोषइति

त्वेन समानाधिकरणरूपात्मकाभावप्रतियोगितावच्छेदकरूपसामान्याभाव

त्वावच्छिन्नाभावात्मकानां यावतां रूपध्वंसादीनां जलत्वासामानाधिकरण्या

दिति भावः। अत्यंतेतीति नन्वेवमपि रूपध्वंसादेर्भावभिन्नत्वात्स्वाभावात्यंताभाव

त्वान्न स एव दोष इति वाच्यं। अत्यंताभावत्वस्य वास्तविकात्यंताभावात्मकत्वस्य विव

क्षितत्वात्। अभावेति जलान्यत्वविशिष्टसत्तात्यंताभावात्मकाभावेत्यर्थः। विशि

ष्टसत्तात्यंताभावस्य। यावदंतर्गतस्यैतस्य। तदवच्छिन्नेति तादृशान्यतरत्वावच्छिन्नाभा

राम
४२

वत्त्वावच्छिन्नेत्यर्थः। तस्य च जलत्वतेजोन्यतरान्यत्वविशिष्टसत्ताभावस्य च। अभावरूपत्वे
पि। लाघवेनोक्तवैशिष्ट्यसत्ताया एव तत्त्वमुचितमित्यस्वरसोपि नास्फुचितः कल्पयि
तुमिति लाघवेनेत्यादिः। ननु जलत्वस्नेहवत्त्वादित्यादौ रूपसामान्याभावाभावमादाय स
प्रसक्ताव्याप्तेर्द्वितीयाभावे भावभिन्नत्वविवक्षणेनैव प्रथमयापत्तताभावे तद्विवक्षणेना
पि वारणसंभवे प्रथमोपस्थितत्वान्नैव तदुपात्तं नमुचितं न तु द्वितीयाभावे इत्याशंका
यामाह। अत्रेति। रूपध्वंसत्वमिति। इदमुपलक्षणं रूपप्रागभावत्वमित्यपि द्रष्टव्यं।।
एवमग्रेपि। प्राचां मते सामान्यतो रूपध्वंसत्वस्य प्रतियोगितावच्छेदकत्वासंभवादा
ह तद्रूपध्वंसत्वं वेति तत्तद्रूपध्वंसत्वं वेत्यर्थः। एवमग्रेपि। ननु रूपात्मकरूपध्वंसा
भावस्य भावभिन्नत्वाभावेन रूपसामान्याभावात्मकस्य च स्नेहसामानाधिकरण्या
भावेन व्याप्यविधस्य च तस्याभावेन कथं रूपध्वंसाभावमादायाव्याप्त्यभिधानमिति
चेद् अत्र केचित्। जलपरमाणौ रूपध्वंसो नास्तीत्यादिप्रतीतिविषयो न रूपसामान्याभा

भवानंदी
४३
43

कः तत्रासत्वात्। अतएव न अन्यरूपात्मकः नापि ध्वंसादिप्रतियोग्यनित्यरूपसजातीयनि
त्यरूपात्मकः। तेषामानंत्यात्। किंतु अन्यरूपत्वावच्छिन्नात्यंताभावएवेति तदात्मक
रूपध्वंसाभावप्रतियोगितावच्छेदकं रूपध्वंसत्वादिकमित्यव्याप्यभिधानसंगति
रित्याहुः। तत्राभावाभावस्यानंतप्रतियोगिरूपत्वमुपगच्छतां प्राचां रूपध्वंसाभा
वस्य नित्यरूपात्मकत्वे आनंत्यस्याबाधकत्वात्। वस्तुतस्तु। तत्र परमाण्वृत्ति
रूपध्वंसाभावो निरूपसामान्याभावात्मकः तस्य तत्रासत्वात् अतएव न ध्वंसप्र
तियोगिरूपात्मकः नापि तत्सजातीयनित्यरूपात्मकः तदभावाभावस्य तदभाव
प्रतियोगिरूपत्वानुपगच्छतां प्राचां तस्य तद्रूपात्मकत्वासंभवादित्यगत्यातिरिक्त एवा
भ्युपेयस्तत्प्रतियोगितावच्छेदकं रूपध्वंसत्वं संभवत्येव। ननु प्राचां तदभावाभावस्य
तदभावप्रतियोगितावच्छेदकावच्छिन्नरूपत्वाभ्युपगमेन रूपध्वंसाभावस्य नित्य
रूपात्मकत्वसंभवेनातिरिक्तत्वाभावात्कथमुपदर्शिताभावप्रतियोगितावच्छेदक

राम
४३

रूपध्वंसत्वमत आह तद्रूपध्वंसत्वमिति। तत्तद्रूपध्वंसत्वमित्यर्थः तथा च स्वेह समानाधि
करणपार्थिवादि तत्तद्रूपसामान्याभावस्य भावभिन्नात्यन्ताभावतया तादृशाभाव
प्रतियोगितावच्छेदक तत्तद्रूपध्वंसत्वाद्यवच्छिन्नाभावात्मकस्य पाकान्तर्गततत्पृथिवी
रूपादेर्जन्यत्वासामानाधिकरण्यादव्याप्तिरित्याखण्डलार्थः अत्र तत्तद्रूपसामान्या
भावप्रतियोगितावच्छेदकतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकतत्तद्रूपध्वंसप्राग
भावादि रूपाभावस्यात्यन्ताभावत्वाभावादेव न लक्षणघटकतयाभावभिन्न
त्वेनावारणं तत्समाहितयाव्याप्तिर्नाभिहितेति सारं। नोपादेयमिति प्रयोजना
भावादिति विशेषः एतेन रूपाभावाभावमादायाव्याप्तेरुभयथापि वारणसंभवे
नविनिगमनाविरहादुभयत्रापि तदुपादेयमिति केषांचिन्मतमपि निरस्तं।
उक्तरीत्या द्वितीयाभावेन तद्वारकत्वस्यैव ~~जन्यत्वात्मकाभावस्य प्रतियोगिता~~
~~वच्छेदकं यत्तेन उत्पत्तिजन्यत्वाभावान्यतरत्वावच्छिन्नाभावत्वं तदवच्छिन्नाभावात्म~~

भवानं·टी·
४४

वि निगमकत्वात्। अत्र केचित् प्रथमाभावे घटाव भिन्नत्वानुपादाने जलं स्नेहवत्त्वा
दित्यादौ हेतुसमानाधिकरणस्येतजलत्वात्मकाभावस्य प्रतियोगितावच्छे
दकं यद्देतजलत्व जलत्वाभावान्यतरत्वावच्छिन्नाभावत्वं तदवच्छिन्नाभावात्म
कयावदंतर्गत जलत्वाभावे जलत्वसामानाधिकरण्याभावाद्व्याप्तिः एवं द्वितीया
भावे तद्धेतुपादाने हेतुसमानाधिकरणभावभिन्न घटत्वाभावप्रतियोगितावच्छे
दकं यद्देतद्घटत्व घटत्वाभावान्यतरत्वावच्छिन्नाभावत्वं तदवच्छिन्नाभावात्मक
यावदंतर्गतएतद्घटत्वे जलत्वसामानाधिकरण्याभावान्नतेवाव्याप्तिरित्यथा
वद्घयवत्व भिन्नत्वं। विशेषणमावश्यकमिति प्रथमाभावांताभावे तत्रोपादेय
मित्यसंगतमिति दूषणमुन्नावयंति। तदसत्। उभयत्राभावभिन्नत्वस्यनिवेशे
पि जलत्वान्यत्वविशिष्टसत्ताभावतेजोन्यत्वविशिष्टसत्ताभावान्यतरत्वावच्छिन्ना
भावाभावात्मकयावदंतर्गत तेजोन्यत्वविशिष्टसत्तात्यंताभावेताद्दशि जलत्वसा

राम
४४

मात्राधिकरणत्वाभावेनाव्याप्तिस्तदवस्थैवेति तादृशान्यतरत्वावच्छिन्नाभावो जलतेजो
ऽन्यतरान्यत्वविशिष्टसत्त्वैवाभावरूपो वास्तु तथापि तदभावत्वं लाघवेन जलतेजो
ऽन्यतरान्यत्वविशिष्टसत्त्वाभावे कल्प्यते तत्र च जलत्वसामान्याधिकरण्यसत्त्वान्ना
व्याप्तिरित्येवं पूर्वोपदर्शितव्यतिरेकानुसरणस्यावश्यकत्वे उक्तैतज्जलत्वजलत्वाभावा
ऽन्यतरत्वावच्छिन्नाभावोऽप्येतज्जलान्यजलत्वं अभावरूपो वास्तु तथापि तदभाव
त्वं लाघवेन एतज्जलान्यत्वविशिष्टजलत्वाभाव एव कल्प्यते तत्र च जलत्वसामा
नाधिकरण्यसंभवेनाव्याप्त्यसंभवात् ॥ ८ ॥ प्रथमाभावे व्याप्तित्रैवोपादानस्य निष्प्र
योजनकत्वात् ॥ ९ ॥ एवं एतद्घटत्वघटत्वाभावान्यतरत्वावच्छिन्नाभावाभावमादाया
व्याप्तिवारणाय द्वितीयाभावे तदुपादानमित्यप्यसमंजसमेव एतद्घटत्वघटत्वा
भावान्यतरत्वावच्छिन्नाभावोऽप्येतद्घटान्यघटत्वं अभावरूपो वास्तु तथापि तदभा
वस्य लाघवेनैतद्घटान्यघटत्वाभाव एव कल्प्यपि तु मुचित तया तत्र च जलत्वसामा

भवानं·टी०
४५
45

नाधिकरणत्वसंभवे नाव्याप्यसंभवात्। एवं चोपदर्शितरीत्या रूपध्वंसाद्यभावस्याहार्या
व्याप्तिवारणायैव द्वितीयाभावे तदुपादानमावश्यकमिति सूक्ष्मं प्रथमात्यंता
भावे तत्त्वोपादेयमिति दिक्। अभावात्मकमेदेति। अभावाधिकरणकाभावप्रति
योगिकाभावस्याधिकरणात्मकत्वादिति भावः। स एव उक्तस्थलाव्याप्तिरूप एव
यथाश्रुत प्रथमात्यंताभावपदेनोक्तदोषवारणासंभवादाह साधनेति प्रथमा
त्यंताभावपदमिति। केचित्तु भावभिन्नात्यंताभावेत्यादि। घट इति द्वितीयात्यंताभावप
दमपि अत्यंताभावत्वनिरूपकप्रतियोगितात्वाभावअव्यथास्त्रेहवत्त्वस्यानाधि
करणजलत्वात्मकात्यंताभावप्रतियोगितावच्छेदकजलत्वात्यंताभावत्वाद्यवच्छि
न्नप्रतियोगिताकस्य तत्त्वावच्छिन्नभेदात्मकस्य अत्यंताभावादेर्यावदंतर्गतस्य जल
त्वासामानाधिकरण्यादव्याप्त्यापत्तेरितिरितिवदंति तद्रूप्यमाणनिष्कर्षे श्लोकाव्या
प्तिवारणासंभवाद्प्रयोजकमित्याशयेन तद्रूप्यमाणनिष्कर्षभूमिकामाह नचेति। अव

राम
४५

च्छेदकतयोरप्यीति अपि नाप्रतियोगितयोः समुच्चयः न वा तत्र संबंधांतरावच्छिन्नाभावसा
धारणाभावाभिप्रायां क्यप्रतियोगितयोरप्रीत्या वेवं वक्तुमुचितं अपि शब्देनावच्छेदकतयोः
समुच्चयसंभवादिति वाच्यं । वह्निमान् धूमादित्यादौ धूमसमानाधिकरणसमवा
याद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकावच्छिन्नयावदभावांतर्गतसंयोगा
द्यवच्छिन्नवह्न्याद्यभावस्य वह्न्याद्यसामानाधिकरण्येन प्रसिद्धानुमाने व्याप्तिवार
णायैवप्रतियोगितयोरेकसंबंधावच्छिन्नत्वविवक्षणस्यावश्यकत्वेन तस्य सर्वेषां
सुप्रतिपन्नत्वात्कुरुतावच्छेदकतयोरेकसंबंधावच्छिन्नत्वविवक्षणस्य मुख्यत्वेनाभि
धानस्यैवौचित्यात् । यत्संबंधेत्यादि वस्तुतोत्र विनिगमनाविरहेण विशेषणता
विशेषस्यापि निविष्टतया लाघवेन सर्वत्र तस्यैव निवेश उचित इति ध्येयं । निरूपि
त इति । तथा चोक्तरीत्येन निष्कर्षस्यावश्यकत्वेन विशेषणताविशेषावच्छिन्नप्रति
योगितावच्छेदकजलत्वाद्येताभाववत्ताद्यवच्छिन्नविशेषणताविशेषावच्छिन्नप्राति

योगिताकत्वं नरस्वत्वात्संताभावादेरित्युपदर्शितरीत्यात्यान्तरसंभवेन द्वितीयात्यंताभा
वपदमपि अभावत्वनिरूपितप्रतियोगिताकाभावेति केषांचिदुक्तिरनालोचनवि
जृंभितैवेति भावः । अभावश्चात्र भावभिन्नो ग्राह्य इत्येव पाठः पूर्वमपि साधनसमा
नाधिकरणाभावेत्येव पाठः । भावभिन्नत्वं प्रथमाभावविशेषणं तदपि न यथाश्रुता
र्थकमिति वदतां मतमाह केचित्त्विति इत्यर्थ इति तथा चाभावो भावभिन्नो ग्राह्य इत्य
स्याभावप्रतियोगिकोभावो ग्राह्य इत्यर्थ इति भावः । उक्तान्यतरत्वेति । जलान्यत्व
विशिष्टात्यंताभाववत्तेजोन्यत्वविशिष्टसत्तात्यंताभावान्यतरत्वेत्यर्थः । भावश्चेत्र । जल
ते जोन्यतरान्यत्वविशिष्टसत्तात्मकश्चेत्र अभावः ताद्दशाविशिष्टसत्ताभावः । वारित
इति तथा चोक्तान्यतरत्वावच्छिन्नाभावस्याभावरूपत्वे तदभावमादाय व्याप्त्यर्थ्यथाश्रु
तभावभिन्नत्वेनावारणान्नद्वारणाय भावप्रतियोगिकत्वं तदर्थो वाच्य इति भावः ।
आहुरिति अस्वरसस्तु वचं तद्बीजं तु उक्तान्यतरत्वावच्छिन्नाभावस्याभावरूपत्वेपिय

वोपदर्शितरीत्या व्याप्तिवारणसंभवेऽप्यव्याप्तितादवस्थ्यं गगनोच्चित्वं साध्यसमानाधि
करणत्वं सत्ताभावप्रतियोगिन उपाधेरार्द्रेंधनादेर्वीत्वं तताभाववृत्तित्वमूलत्वं यथ्यविरो
धाभ्व घटध्वंसत्वाभावस्य वक्ष्यमाणरीत्याऽभावप्रतियोगिकत्वेन तमादायातिव्या
प्तिवारकस्य घटध्वंसइत्यादेरव्यंपस्यासंगतिश्चैवं स्नेहत्वत्वविच्छाभावीयपार्थिव
रूपात्मकभाववृत्ति प्रतियोगितावच्छेदकतत्त्वच्छिन्नत्वावच्छिन्नप्रतियोगिताकध्वं
सप्रागभावानोयावदंतर्गतत्वांजलत्वत्वासामानाधिकरण्यादव्याप्तितादवस्थ्यं
। एतेन भावमात्रप्रतियोगिकत्वमभावे विशेषणं तेन स्नेहत्वत्वसामानाधिकरण्य
स्वहिमावृत्तिस्वरूपस्याभावस्य प्रतियोगितावच्छेदकं यद्धिमावृत्तेरभावत्वं तद
वच्छिन्नप्रतियोगिताकयावद्धिमावृत्त्यंतर्गतस्य जलत्वाभावस्य जलत्वसामाना
धिकरण्येपि नाव्याप्तिः हिमावृत्त्यभावत्वस्याभावइवाभावेपि सत्त्वेन तदवच्छिन्ना
भावस्य भावमात्रप्रतियोगिकत्वाभावात् इत्येवमव्यवहितो क्रमतत्वद्योध्यमित्यपि

परास्तं। हिमवानु स्वभावस्य हिमत्वरूपतया तदभावस्य अभावरूपत्वेपि तदभावत्वस्याना
घत्वेन हिमत्वाभाव एव कल्पयितुमुचितत्वेन तस्य जलत्वसमानाधिकरणतयोक्तरीत्या
त्याद्युक्तेर संभवाच्च अतएव यद्धर्मावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वं हेतुमन्निष्ठाभा
वप्रतियोगितावच्छेदकीभूत तद्धर्मावच्छिन्नाभावोऽथाघटत्वेन भावभिन्नोऽन्यादृ
इत्यस्यतात्पर्यं न हि रूपसामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वं
रूपत्वव्यभिचारादिति रूपध्वंसाद्यात्मकरूपसामान्याभावाभावसाध्याप्र
सिद्धिरसंभवेनात्यन्ताभावत्वनिवेशोऽप्रयोजन इति विरह इत्यपि निरस्तं। उपदर्शितमूलं
ग्रन्थविरोधात् ध्वंसादिनिवेशानपेक्षागौरवाच्च। ननु ध्वंसत्वस्य जन्याभावत्वरूपता
मते अभावत्वस्य भावभेदरूपतया घटध्वंसत्वाभावस्याभावप्रतियोगिकत्वेपि त
स्याखंड धर्मस्वरूपत्वमते उक्ताभावस्य तथात्वेनाधिकरणात्मकतया समाना
धिकरण्यमात्मानि त्याप्यसंगतिरत आहाभाववृत्तिप्रतियोगिकोवेति। घटध्वंसत्वभि

ति घटध्वंसान्यत्वस्याप्युपलक्षकं त्वमग्रेपि तेन घटध्वंसान्यत्वाभावव्याप्यत्वापि
नाति आप्युक्तारः घटध्वंसत्वेति । इदं चातिव्याप्तिवारकतायोग्यत्वसूचनाय । यत्तस्या
ताभावस्य चेति । न चैवं तस्य घटध्वंसेपि सत्त्वात्तत्र घटध्वंसत्वं नास्तीति प्रतीत्यापत्ति
रिति वाच्यं । तस्य यदात्मताभावत्वेन तत्रवृत्तित्वेपि घटध्वंसत्वाभावत्वेनावृत्तित्वा
त्वंगीकारात् । भाववृत्तेरिति अधिकरणभेदेनाभावभेद इति हृदयं । एतेन भाववृत्तेरपि
घटध्वंसत्वाभावस्याभावाधिकरणकत्वान्नाप्येतन्भावरूपाधिकरणरूपत्वेपि ना
तिरिक्तत्वसंभावना तस्य चात्यन्ताभावत्वाभावादेववारणेन नातिव्याप्त्यभावसंपा
दकत्वमिति दूषणावनं निरस्तं । भावेपीति । अधिकरणभेदेनाभावभेदे माना
भावादिति भावः । नाद्य इति घटध्वंसत्वं नास्तीत्यर्थः । तत्राप्यभावेपि तस्य । घटध्वं
सत्वाभावस्य । अनतिरिक्तत्वादिति । न चैवं निरुक्ताभावोऽधिकरणात्मक इति
प्राचां मतभंगप्रसंग इति वाच्यं अभावरूपाधिकरणात्मकत्वस्यैवेत्यधिकरण

त्मकत्वात् । न चैवं घटध्वंसस्यात्यंताभावत्वाभावादेव वारणं पूर्वोक्तमसंगतं पटाद्य
त्यंताभावात्वादिति तएव पटध्वंसेपि घटध्वंसत्वं नास्तीति प्रतीत्युपपत्तौ घटध्वंसत्वाभा
वस्य पटध्वंसरूपत्वानभ्युपगमात् पिपटध्वंसवारणसंभवात् पटध्वंसस्य घटात्यंता
भावात्मकत्वस्यापटाद्यत्यंताभावात्मेतादृशप्रतीतेः पटध्वंसेनानिर्वाहेण पटध्वंसरू
पत्वेव तदभावस्यास्तु न तु पटाद्यत्यंताभावरूपत्वं तस्य वक्तुमशक्यत्वादिति वाच्यं ।
अत्यंताभावत्वाभावादेवेत्यस्यात्यंताभावत्वाभावादपीत्यर्थकतया ऽदोषात्
अत एव घटध्वंसत्वत्वावच्छिन्नप्रतियोगिताकयावदंतर्गतस्याभावत्वाभावस्य
घटध्वंसत्वासमानाधिकरणतया कथमभिन्नाप्रिरितिशंका निरस्ता । अभावत्वा
भावात्मकत्वेपि पटाद्यत्यंताभावेनैव तादृशप्रतीत्युपपत्तौ तदभावस्याभावत्वाभाव
रूपत्वानभ्युपगमात् । पटाद्यत्यंताभावात्मकत्वाभावत्वाभावासत्वेन तादृशप्रतीत्यु
पपादनस्याभावत्वाभावेन कर्तुमशक्यतया तस्यैव घटध्वंसत्वाभावत्वमास्तीति वक्तु

मप्राक्यत्वात्तादात्म्येन घटध्वंसो ध्वंसत्वादित्यत्रातिव्याप्तिसंपादनायाभाववृत्तिधर्मप्र
तियोगिकोऽभावाधिकरणको भावो अधिकरणात्मक इति मतानुसरणस्यावश्यक
त्वे धूमवन्निष्ठघटाद्यभावप्रतियोगितावच्छेदकघटध्वंसत्वघटाभावत्वाद्यवच्छि
न्नाभावस्य स्वरूपत्वाभाववन्न्यभावादिनिष्ठस्यापि तुल्ययुक्त्या स्वरूपत्वाभाववन्न्यभा
वाद्यात्मकस्य वह्निसामानाधिकरण्याभावाद् वह्निमान् धूमादित्यादावव्याप्ति
संभवे तद्वारणमुपेक्ष्य केवलमतिव्याप्तिवारणमेव घटध्वंसत्वादिनोधीति पो ९६
कृतां संदर्भे विरुद्धमिति दूषणेन ग्रावनं परास्तं । द्रव्यत्वाभावादिना घटपर्वतना
दिषु घटध्वंसत्वाभाववत्त्वे तैरूप्य वादयितुमशक्यतया तन्निष्ठस्यापि तस्य स्वरूपत्वघ
टत्वं ताभावाद्यात्मकतया तत्र च वह्निसामानाधिकरण्यसत्त्वेनाव्याप्तेरसं
भवात् । अत एवोक्तप्राचीनमतमालंब्यातिव्याप्तिदाने अत्वं स्नेहवत्त्वादित्यादौ स्नेहा
वभिन्नत्वस्याभावविशेषणत्वविवक्षयैपि न निस्तारः स्नेहसमानाधिकरणभाव

प्रतियोगितावच्छेदकतद्रूपध्वंसत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य जलत्वाभावा
द्यधिकरणकस्य जलत्वाभावाद्यात्मकत्वेन यावदन्तर्गतजलत्वाद्यभावे जलत्वा
सामानाधिकरण्येन पूर्वोक्ताव्याप्तेरपरीहारादिति तद्वारणायैव भावाभावदृत्तेर्भा
वस्यातिरिक्तत्वव्यवस्थापनं दीधितिकृतामनुचितं न तत्तिव्याप्तिवारणायेति संदर्भ
विरोधोद्भावनमपि निरस्तं वेदितव्यं। जलादिषु जलत्वाभावाद्यनात्तद्रूपध्वंसत्वा
द्यभावव्यक्तीत्यनिर्वाहेण तन्निष्ठस्यापि तस्य तद्रूपघटाद्यत्यन्ताभावरूपत्वेन तत्र
जलत्वसामानाधिकरण्येनाव्याप्त्यभावात्। प्रतियोगितावच्छेदकत्वयोरे
कसंबंधावच्छिन्नत्वविवक्षणे तस्याश्चेत्यादिपूर्वोपदर्शितनिष्कर्षाश्रयणेनाव्या
प्त्यभावाच्च। तद्रूपध्वंसत्वाद्यभावस्यानतिरिक्ततामते तु तत्प्रयुक्ततद्रूपध्वंसत्वत्वा
द्यवच्छिन्नप्रतियोगिताया अप्यतिरिक्ताया अभावेनाव्याप्तिशंकाया अप्यभावाच्च।
नन्वभावमात्रवृत्तिप्रतियोगिकोऽभावाधिकरणकोऽभावोऽधिकरणात्मकस्तथा च घट

ध्वंसत्वासमानाधिकरणत्वान्नातिव्याप्तिरत आह एवमिति घटध्वंसेऽति। इत्यमुपलक्षणं
घटध्वंसवृत्तित्वविशिष्टवाच्यत्वाभावादिरपीत्यपि द्रष्टव्यं। ननु तादृशाभावमादाय
नातिव्याप्तिवारणं अन्यतरवृत्तित्वेति। अत्र वृत्तित्वं घटध्वंसत्वीयविशेषणतासंयो
गान्यतरसंबंधेन। तेन संबंधसामान्येनान्यतरवृत्तित्वावच्छिन्नाभावाप्रसिद्धाव
पि न क्षतिः। अत्रान्यतरत्वस्य भेदावच्छिन्नभेदात्मकतया तद्घटाभावस्याधिकरणा
नात्मकत्वेऽपि प्रतियोगितावच्छेदकभेदस्वरूपत्वेन लघुतया तस्यात्यंताभावत्वाभा
वेन तद्धर्मी पादातिव्याप्तिवारणस्याप्रसक्त्या तत्परित्यागः। अधिकरणेति घटा
त्यंताभावेत्यर्थः मात्रपदानंतर्भावेणाभाववृत्तिप्रतियोगिकत्वस्यैव लाघवे
नाधिकरणात्मकत्वे तंत्रत्वादिति भावः। दीधितौ भावाभाववृत्तिरतिरिक्ता इति न
व्याच घटध्वंसत्वं नास्तीत्यादिप्रतीतीनामनंताभावाधिकरणविषयकत्वकल्प
नापेक्षया लाघवेनातिरिक्ताभावविषयकत्वकल्पनमुचितमिति निरुक्ता

भावत्वमधिकरणस्वरूपत्वेऽतंत्रमित्युक्तप्राचीनमतमप्रयोजकं अन्यथाऽभावत्वमात्रस्यै
वाधिकरणस्वरूपत्वे तंत्रत्वमुपेत्याभावमात्रस्यैवाधिकरणस्वरूपत्वप्रसंगः। न च तत्रा
भावत्वप्रकारकप्रत्ययानुपपत्तिरेव बाधिकेति वाच्यं तदुल्लेखिप्रतीतिविषयत्वादि
रूपभावाभावसाधारणभावत्वेनैव तदुपपत्तेरित्याशयः। यत्तु नवीनैरुक्तय घपिड
क्तप्राचीनमतमवलंब्य घटध्वंसत्वाद्यभावस्यानतिरिक्तत्वेपि नातिव्याप्तिः। घटध्वंस
त्वाद्यभावस्य गोत्वाद्यभावरूपत्वेपि घटध्वंसान्यत्वविशिष्टभावत्वाद्यभावस्य गोत्वा
भावावृत्तितया गोत्वाभावानात्मकस्य घटध्वंसात्मकस्य साध्याभावसामानाधिकरण्या
वृत्त्यापि सत्त्वाधिसौकर्येण घटध्वंसत्वाद्यभावस्यातिरिक्तत्वं व्यवस्थाप्यातिव्याप्ति
वारितेति तन्न चिंत्यं। तस्यास्यैताभावत्वाभावादेव लक्षणघटकत्वेन तन्माहात्म्यादति
व्याप्तिवारणसंभवात्। आख्यायां अतिरिक्त इति अन्यथा घटध्वंसात्मकस्य तस्या
साध्यसामानाधिकरण्येनातिव्याप्तेरिति भावः। अभावमात्रवृत्तेरप्यभावस्यातिरि

क्तत्वेऽप्यसिद्धांतइत्यत आह एतदिति घटध्वंसभेदसाध्यकात्तिव्याप्तीत्यर्थः। अस्वरसे
नैव अस्वरसे नापि तथाच वद्वृत्तीत्यनेनायमप्यस्वरसः सूचित इत्याशयः अपिरा
दस्सूचितास्वरसांतरं चम् लोकविशेष्यविशेषणभावव्यत्यासेन स्वीकृरीत्या लक्ष
ण व्याख्याने दोषासंस्पर्शाद्भाव भिन्नत्वोपादानमनुचितं घटध्वंसत्वाद्यभावस्या
तिरिक्तत्वं व्यवस्थाप्याति आप्तिवारणप्रयासस्यानुचितइति। जलान्यत्वेति जला
न्यत्वविशिष्टसत्तात्यंताभाव आदिर्यस्य तेन जलान्यत्वविशिष्टसत्ताभावत्तेजो
न्यत्वविशिष्टसत्ताभावान्यतराभावाभावेनेति यावत् पूर्वोक्तेति अव्याप्तीत्यर्थः
तादृशान्यतराभावाभावस्य तादृशान्यतररूपत्वादित्याशयः लक्षणघटे
ति। यावत्वस्य व्यापकतावच्छेदकतानिरूपणया तादृशाभावत्वे व्यापकत्वं साध्यसामानाधि
करण्ये च यथाक्रुतलक्षणे लक्षणतत्तथा सति तादृशाभावतावाक्रांतत्तेजोन्यत्ववि
शिष्टसत्ताभावे जलत्वासामानाधिकरण्येन पूर्वोक्तदोषइति तादृशाभावत्वव्याप

कत्वं साध्यसमानाधिकरणवृत्तित्वे विवक्षितं एवं च न पूर्वोक्तदोषः तादृशान्यतराभावाभाववति
जलत्वसमानाधिकरणजलान्यत्वविशिष्टसत्ताभाववृत्तित्वात् एतन्मते पूर्वोक्तसंदर्भ
विरोधसंभावनापि नास्ति घटध्वंसत्वाभाववत्त्वतद्रूपध्वंसत्वाभाववत्त्वयोर्वह्नि जलत्व
समानाधिकरणघटाभावादिवृत्तित्वाद्वह्निमाञ्जलत्वादित्यादावव्याप्तेः कथ
मप्यसंभवादित्याखंडलार्थः। नन्वेवमुक्तप्राचीनमतावलंबनेपि घटध्वंसइत्यादि
ग्रंथानुपपत्तिः अभावत्वस्य स्वरूपसंबंधात्मकतया घटाभावादिनिष्ठघटध्वंस
त्वाभाववत्त्वस्याभावभेदेन भिन्नतयाननुगतत्वेन तादृशाभाववत्त्वाक्रांतघटध्वंस
निष्ठतादात्म्यकघटध्वंसत्वाभाववत्त्वे घटध्वंसत्वसमानाधिकरणवृत्तित्वस्याभावे
नातिव्याप्तिरसंभवादिति तत्तद्वतारणिकाम्यातनन्विति। परंपरासंबंधेन स्वाश्रय
प्रतियोगिकत्वविशिष्टध्वंसत्वाभाववत्तादात्म्येनानुगतमिति। एवं चोक्तान्यतराभा
वाभाववत्त्वादिकमप्यन्यतरत्वादिरूपमनुगतं तेन न पूर्वोक्तदोषतादवस्थ्यमिति ध्येयं।

श्रीमन्मङ्गलमूर्तये नमः । सहस्रारे अतिदुर्बोधे भवानं लिङ्गकार्पानेकरोतु ममसामर्थ्यं शिवासह-
चराचरेश्वरः ॥१॥ व्याप्तिग्रहोपाये कथनीय इति पूर्वं व्याप्तिग्रहोपायमनुद्दृष्टम् तदुत्पन्नेनसमारभ्या-
नुमानप्रामाण्यं एव परिशोधकारणीभूतव्याप्तिग्रहोपायनिरूपणे प्रतिज्ञाते तत्कारणीभूतव्या-
प्तिस्वरूपजिज्ञासया व्याप्तिस्वरूपे निरूपिते ऽवसरसंगत्या व्याप्तिग्रहोपायनिरूपणे खेदौ-
चित्यादिति भावः संगमयति ति अर्थान्तरदोषनिराकरणे त्यादि। आह सेयमित्यादि मूलावतारणा-
माह। एतेन चार्वाकः प्राभाकरमुखेन भूयोदर्शनस्य व्याप्तिग्राहकतावादिरत्रैयापि कमतखण्डय-
ति सेयमित्यादिनेति। मि आवतारणमुपेक्ष्या स्वकं व्याख्यातारे वीजमनुक्तं। तथावतारे लेहि। अ-
र्थान्तरनिराकरणेन प्राभाकरमतोपन्यासासंगतेर्दुर्वारत्वादिति भावः। मूले सेयमित्यादि व्या-
प्तिप्रकारतयानुमितिजनकतावच्छेदको धर्मः। अपेक्ष्याबुद्धि। द्विविधो विशेषरूपभूयस्त्वत्साध्य-
साधनसहचारदर्शनत्वावच्छेद्यत्वाभावव्यजनकतानिरूपितजन्यतावच्छेदकीभूतविषयता-
कत्वेन साध्यं; न वा तादृशावच्छेद्यत्वाप्रसिद्धेरिति वाच्यं। भूयोदर्शनं नास्तीति प्रतीतेः सिद्धामा-
वभावप्रतियोगितायां तादृशावच्छेद्यत्वाप्रसिद्धेः संभवात्। यद्वा जनकतानि-
ष्ठावच्छेद्यत्वापेक्षया प्रतियोगितानिष्ठावच्छेद्यत्वस्य विलक्षण्येन तयानोक्तदोषस्याप्रसिद्धि

मवानं०टी

संभव इति विभाव्यते तथापि न क्षतिः तादृशावच्छेदकत्वसंबंधावच्छिन्नप्रतियोगिताकभूयोदर्शनत्वा
भावत्वजनकतेस्यादेस्साध्यतया तादृशव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकभूयोदर्शन
त्वाभावस्य जनकतायां संभवेनाप्रसिद्ध्यभावात्। अत्र च विधिकोटिः प्राभाकराणां निषे
धकोटिर्जरन्नैयायिकानां। न च तन्मते तादृशदर्शनत्वाभाववज्जनकांतरवृत्तिजनकताया
ण्यप्रतियोगिसत्त्वेन निषेधसाधने बाध इति वाच्यं। व्यभिचारज्ञानाभावस्य तन्मते ज
नकतया जनकांतरसाध्यसाधनग्राहकनिरूपितजन्यतायां विषयितया साध्येऽनवच्छे
दकत्वात्। न च तन्मते तर्कस्य जनकत्वेन निरूपितजन्यतायां विषयितया साध्येऽवच्छेदकत्वे
न स्वरूपबाध इति वाच्यं। तथा सति जनकतायां तर्कत्वानवच्छेदकत्वस्यापि निवेश्यत्वात्। वस्तु
तस्तु स्वावच्छिन्नजन्यतानिरूपितजनकतात्वव्यापकभूयोदर्शनत्वावच्छिन्नत्वाभावकत्व
मेव तादृशजनकतात्वव्यापकावच्छिन्नत्वसंबंधावच्छिन्नप्रतियोगिताकभूयोदर्शनत्वाभाव
कत्वमेव वा साध्यं एवं च तन्मते व्यभिचारज्ञानाभावस्य तर्कस्य च जनकत्वाभ्युपगमेऽपि न दो
षः अत्र भूयोदर्शनत्वावच्छिन्नाभावाधिकरणक्षणस्य क्षणध्वंसवति तोत्तरक्षणस्य तत्राग्रहविषय

राम

पत्वादिति हेतुः। नचैवं दर्शनामित्यादि हेतुप्रदर्शनविरोध इति वाच्यं। प्रत्येकमहेतुत्वादित्यस्य प्रत्ये
कं व्याप्तिग्रहाव्यवहितपूर्ववृत्तित्वे सत्वानियमादित्यर्थकतया। तावद्दर्शनानां व्याप्तिग्रहाव्यव
हितपूर्ववृत्तित्वे सत्वानियमेनव्यभिचारेण भूयोदर्शनत्वेनाजनकतया तदवच्छिन्नाभावघटित
हेतुसिद्धिरप्रत्यूहेत्येवं रीत्या तादृशहेतुसंपादकतयैव तस्योपयोगात्। नन्वेकदेशेनावच्छि
न्नेकान्तवृत्तित्वविशिष्टतावद्दर्शनस्य त्रित्वपर्याप्त्यधिकरणदर्शनत्वेन हेतुत्वं तादृशत्रित्वप
र्याप्त्यधिकरणदर्शनविशिष्टप्रत्यक्षत्वेन कार्यत्वमतो न व्यभिचार इत्यत आह क्वचिन्ना
शिनामिति तथा च तेषां मिलनासंभवेन त्रित्वपर्याप्त्यधिकरणदर्शनस्य कार्याव्यवहितपूर्ववृत्तित्वेऽसत्वनियमे
नव्यभिचार एवेति भावः। सोऽधितिकाराणां विकल्प्यदर्शनामित्यादि ग्रंथव्याख्यानमपि विवक्षितविवे
केनैतत्पर्यवसायी वेति। नतद्विरोधः यद्वा भूयोदर्शनत्वं न व्याप्तिप्रत्यक्षत्वावच्छिन्नजन्यतानिरूपित
जनकतावच्छेदकं व्याप्तिग्रहस्याव्यवहितपूर्वक्षणवृत्त्यभावप्रतियोगितावच्छेदकत्वादिति प्रयोगः

१

शेषं पूर्ववत्। एतेनात्र यथाश्रुते व्याप्तित्वस्य सर्वव्याप्तिसाधारण्यैकस्याभावेनोभयसाधारणपक्षासंभ
वः व्यापकसामानाधिकरण्यरूपव्याप्तेः पक्षतायां सकृद्दर्शनगम्यत्वस्योपसंहारविरोधः। उपाध्यभा
वरूपव्याप्तेः पक्षतायां तस्या भूयोदर्शनगम्यत्वस्य जरन्नैयायिकैरनङ्गीकारेण तत्खण्डनासंगतिः
एवं यत्रापि तथात्वं आत्मकप्रथमदर्शनोत्तरदर्शनद्वयेन व्याप्तिग्रह इत्यादि तत्तत्र भूयोदर्शनव्या
प्यत्वसंभवेन तदभावसाधने बाधः भूयोदर्शनत्वेन न ग्राह्यत्वं च प्राभाकराणामप्रसिद्धमिति तद
भावसाधनमपि न संभवति एवं दर्शनानामित्यादि हेतोः साध्यवैयधिकरण्यमित्यादिदोषाणामनवका
शः यत्तु अनुमितिजनकतावच्छेदकीभूतधर्मः न भूयोदर्शननिष्ठप्रत्येकदर्शनत्वावच्छिन्नजनकतानिरूपितजन्यताव
च्छेदकीभूतविषयताकः स्वानुभवजनकतावच्छेदकीभूततत्प्रत्येकदर्शनत्वकत्वादिति प्रयोगः हेतुमेवोप
पादयति दर्शनानामिति प्रत्येकं तत्तद्दर्शनत्वेन। अहेतुत्वादिति। तथा च हेतुतानवच्छेदकीभूततत्तद्दर्शन
कत्वादिति भावः अत्र हेतुमाहाश्चेति। तथा च दर्शनानां प्रातिस्विकरूपेण हेतुत्वपक्षे यावद्भिर्दर्शनैर्यत्र व्या
प्तिर्गृह्यते तावतां प्रत्येकरूपेण दण्डचक्रादिन्यायेन हेतुत्वं वाच्यं न चैतत्संभवति तत्तत्प्रत्येकव्यक्तित्वावच्छिन्नकूटस्य व्याप्यत्वानु
भवे प्राक्त्वेन

राम

घटध्वंसत्वाभावाधिकरणेति। इत्थं च घटध्वंसत्वाभावात्मकत्वहेतुगर्भपदाभावादिविशेषणं। वै
यर्थ्यादिति। न चोक्तनिष्कर्षे तात्पर्यं आह कृतमित्येव सार्थक्यमिति वाच्यं भूयोपि दर्शितरीत्या पूर्वो
क्तदोषाभावेनोक्तनिष्कर्षे वैयर्थ्यात्॥ एतेन हेतुसमानाधिकरणयादृशाभावप्रतियोगिता
वच्छेदकं यद्धर्मावच्छिन्नप्रतियोगिताकतादृशतादृशाभावे यावति साध्यसामानाधिकर
ण्यं लक्षणार्थः। इत्थं च स्नेहसमानाधिकरणजलान्यत्वविशिष्टसत्ताभावप्रतियोगिता
वच्छेदके तादृशतादृशान्यतराभावत्वं तदवच्छिन्नप्रतियोगिताकतादृशाभावो जलान्यत्ववि
शिष्टसत्ताभाव एव तत्र तु जलत्वसामानाधिकरण्यसत्त्वान्नोक्तक्रमेण व्याप्तिर्न वा एतज्जलत्व
जलत्वाभावान्यतरत्वावच्छिन्नाभावाभावमेतद्घटत्वघटत्वाभावान्यतरत्वावच्छिन्नाभावामा
वं चादाय व्याप्तिलाभवरूप्यं यादृशेत्यादिविवक्षयैव तन्निरासात्। अत एव दीधितिकृतामव्याप्ति
विरहायातिव्याप्तिमेवावलंब्य तदुद्धारप्रयासः यादृशेत्यादिविवक्षयैव स्वत्वाभावादिक
मादाय व्याप्तिवारणासंभवात्। न चैवमभावस्वान्नेत्यादिग्रंथेन भावाभिन्नत्वविवक्षणमफ
लं यादृशेत्यादिविवक्षयैव रूपसामान्याभावाभावमादाय जलत्वस्नेहवत्वादिस्थले व्या

प्यसंभवादिति वाच्यं। न च धूमस्येतरत्र धूमे वस्तुगत्याभावभिन्नएवाभावः प्रविष्ट इति स्वरूपा
ख्यानपरत्वेन तद्विवक्षणेनास्य यथाभावात्। न च तदैवरूप्यमिति वाच्यं। धूमवान्वह्नेरि
त्यादौ सर्वस्यैवाभावस्य कालिकसंबंधेन धूमादिसामानाधिकरण्येनाव्याप्त्यासा
ध्यसामानाधिकरण्यमभावीयविशेषणतया वाच्यं। तथा च वह्निमान् धूमादित्यादौ
कालिकादिसंबंधेन हेतुमन्निष्ठवन्ह्याद्यभावस्याभावीयविशेषणतया साध्यसामा
नाधिकरण्याभावेनाव्याप्त्यापत्त्या हेतुसामानाधिकरण्यमप्यभावीयविशेषणत
यैव वाच्यमित्यव्याप्त्याभावभिन्नाभावस्यैव प्रविष्टत्वादिति केषांचिदुक्तिरपि निरस्ता
। उक्तरीत्योक्तदोषासंस्पर्शेन यादृशसाध्यविवक्षणीयपर्याप्तहेतुसमानाधिकरणाभा
वानां यादृशतादृशप्रातिस्विकरूपेण प्रवेशो हेतुसमानाधिकरणयादृशयादृशा
भावास्तादृशतादृशाभावायावंतत्साध्यसमानाधिकरण्यमित्यस्यैव सम्यक्त्वे दोषवैयर्थ्या
दिस्पष्टत्वं वहुजल्पनेन असंगतिः अव्याप्तिः एकव्यक्तीत्तियावत्वविशेषितव्याभिचारित्वे
ऽभेदेन साध्यान्वयित्वापत्तेर्यावत्वस्य साध्ये निवेशादिति भावः यावत्त्वं नाने

राम

काशेषत्वं किं तच्छेषत्वमेवेत्यत आह वह्निमानिति प्रत्येकाधिकरणाविवक्षणेनाप्रसिद्धिर
त आह अतिव्याप्तिश्चेति अतिव्याप्तिरिति अव्याप्तिरपि द्रष्टव्या। प्रथमयत्पदस्य साध
न परत्वे अग्रिमयत्पदस्य साध्यपरत्वेन यावत्साधनव्यापकव्याप्यत्वस्य साध्ये लाभा
दिति भावः दीधितौ यत्पदं प्रथमयत्पदं। एवं चाग्रिमयत्पदं हेतुपरमिति भावः या
वदिति नीलिपदमिति शेषः अत्यन्ताभावस्य तु प्रसप्रमीकत्वासंभवादाह व्याख्यायां दि
नीयेति। पदस्य विशेषणत्वाभावादाह विशेषणमिति असंभव इति तादृश यावतां
प्रत्येकमप्रतियोगित्वनिवेशे च साध्यव्यापकयत्किंचित्प्रतियोगिकात्यन्ताभावासा
मानाधिकरण्यसत्त्वादव्यभिचारिण्यतिव्याप्तिर्द्रष्टव्या। यावत्त्वस्येति इदमुपलक्षणं
वस्तुमात्रस्यैव साध्यवन्निष्ठाभावप्रतियोगित्वेन तादृशप्रतियोगिताप्रसिद्धेर्व्याप्तेर्वि
रहे कार्यरूपत्वासंभवाद्वेत्यपि द्रष्टव्यं। दीधितौ व्यापकतेत्यादि व्याप्यतावच्छेदकता
वच्छेदकस्वसामानाधिकरण्यत्वावच्छिन्नाभाववत्त्वकत्वमित्यर्थः व्याख्यायां तथा चेतीति

एवं च स्वत्वेऽप्रतियोगिपदं प्रतियोगितानवच्छेदकावच्छिन्नपरं प्रतियोगिपदं च प्रतियोगिता
परमिति भावः तादृशाभाववत्त्वव्यापकेति अत्रापि पूर्ववरीत्या व्यापकतावच्छेदकेत्यादि
रर्थः विवक्षायां विनैवोपपत्तिमाह । वस्तुतस्त्विति अनुपादेयत्वादिति एतन्मतेऽपि च
लक्षणप्रामुक्तप्रायं । नानात्वादिति संबंधभेदनिवंधनदोषवारणाय तत्तत्संबंधा
घटितव्यापकतावच्छेदकावच्छिन्नतत्तत्संबंधावच्छिन्नप्रतियोगिताकाभावत्वनि
वेशादिति भावः असंगत्यापत्तेः एकसाध्यसाधनस्थलेऽपि व्याप्तेरननुगतत्वा
पत्तेः विशेषणताविशेषणव्यापकत्वनिवेशे तु प्रतियोगितायामपि विशेषणता
विशेषावच्छिन्नत्वनिवेशेन संबंधभेदनिवंधनदोषाभावादननुगमाभावाच्चेति भा
वः स्वरूपसंबंधेनेति व्यापकताग्राहकस्यानुषंगेणान्वयः । तादृशाभावाप्रसिद्धेरि
ति । आकाशाभावादेस्तेन संबंधेनाव्यापकतया प्रमेयत्वादेरेव तथात्वेन तत्सं
बंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः । अत एव साध्यतावच्छेदकसंबंधेना

राम

पिनव्यापकत्वनिवेश इति भावः अभावासंभवादिति केवलान्वयिग्रंथे चैतदस्फुटीभवि
ष्यति साध्यव्यापकतेति। तत्तत्संबंधघटितव्यापकतावच्छेदकावच्छिन्नतत्संबंधा नर
वच्छिन्नप्रतियोगिताकयावदभावाद्यर्थसत्त्वेन न संबंधभेदनिबंधनो दोषः नतु वि
शेषणताविशेषो निवेश्यस्तादृशानामिंधनादीनामित्युत्तरग्रंथविरोधात् नापि
साध्यतावच्छेदकसंबंधः केवलान्वयिन्यप्रसिद्ध्यापत्तेः। तेनात्र यावत्पदोपादानं
साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाभावत्वाभिप्रा
येति निरस्तं व्यापकत्वस्य संबंधभेदेन भिन्नतया तादृशाभावत्वस्यैकस्याभावा
त्। तच्छून्यत्वं प्रतियोगितावच्छेदकसंबंधेन तच्छून्यत्वं। तेन न संबंधांतरमादाय
न दोषः दीधितौ यावन्तादृशाश्रयत्वमिति। तत्तत्संबंधघटितव्यापकतावच्छे
दकवतां प्रत्येकं तत्तत्संबंधेनाश्रयत्वमित्यर्थः। तेन न संबंधभेदनिबंधनदोषः
। न तु विशेषणताविशेषघटितं तत्र उक्तयुक्तेः नापि साध्यतावच्छेदकसंबंधघ

भवानं·

रितं केवलान्वयिन्य प्रसिद्धिविरहेपि सत्ताद्येवायोगोलकभेदस्यापीति व्याख्याग्रंथवि
रोधात् । आख्यायां किंचिदिति । साध्यानधिकरणेत्यर्थः । अत्रेति पूर्वोक्तसंग्रहपद्य
तात्स्वरसोपि द्रष्टव्यः तादृशेति दीधितिकारस्य यावदित्यादिलक्षणवाक्यार्थोयमेव
संमतः अत एव पूर्वपक्षग्रंथे अनौपाधिकत्वलक्षणार्थोऽयमेव वर्णितः अभा
वद्वयेति उक्तरीत्येत्यादि । स्फुचित इति क्वचित्तु आदुरित्यनंतरं एतदस्वरसप्रतिपादकः
साध्यसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं यावत्तियत्समानाधि
करणात्यंताभावप्रतियोगितावच्छेदकत्वं नास्ति तत्वमर्थ इत्तिरव्याइतिपाठएव
दीधितेर्पाठोस्तिलक्षणद्वयस्येति । यत्संबंधितेति यत्सामानाधिकरण्येतिलक्षण
द्वयस्येत्यर्थः येनेत्युक्तेति अर्थ येनरूपेणेत्यर्थः कारणतायानियतपूर्ववर्तित्वात्मक
त्वेनावच्छेदकाभेद इत्यत आह नियतेति । आत्माश्रयेति अवच्छेदकज्ञानस्या
वच्छेद्यज्ञाने हेतुः तथा च ज्ञानात्माश्रय इति भावः तुल्यवदिति भावप्रधानो निर्दे

राम

शः तुल्यमितिफलितार्थः। अनुगमकधर्मत्वमिति। तथा चानुगतस्य ज्ञानादिविशिष्टस्य ज्ञानाभि
न्नभिन्नत्वमेवेति नात्माश्रय इति भावः। केचित्तु नन्वभेदेनावच्छेद्यावच्छेदकभावो न
स्वीक्रियत इति व्यवहारो विलुप्येतेत्यत आह दीधितौ उपलितेति। तथा चाभेदेनाव
च्छेद्यावच्छेदकभावो न स्वीक्रियत इत्यस्याभेदेनैकरूपेणावच्छेद्यावच्छेदकभावो न
स्वीक्रियत इति भाव इत्याहुः। नन्वत्र साध्यव्याप्तिरित्यत्र तत्पदार्थः साध्यमेव पक्षसंबंधि
तेत्यत्र साध्यस्यैव यत्पदार्थत्वात् यत्तदोरेकपदार्थयोर्व्यापकत्वनियमात् तथा
च साध्यव्याप्तिरित्यनन्वय इत्यत आह दीधितौ सेति। तथा च पक्षसंबंधितेत्यत्र कर्म
धारय एव न तु यस्य संबंधितेति षष्ठीतत्पुरुषः संबंधित्वपदार्थस्तु साध्यसामाना
धिकरण्यमेव तथा च पूर्वसंबंधितायाः एव यत्पदार्थतया साध्यव्याप्तिरित्यत्रापि
तत्पदार्थः संबंधितैवेति नानन्वय इति भावः। यथाश्रुतसामानाधिकरण्यस्यागे
न स्वयं संबंधिसंबंधितारूपेत्यर्थ इत्युक्तौ वीजमाह व्याख्यायामधिकरणताया इति

।आधेयतायाऽपत्तेश्चेत्यं व्याप्यसंग्रहादिति पाठः। तथा च यथाश्रुतसामानाधि-
करण्योपादाने तादात्म्येन साध्यसाधनभावस्थले ऽव्याप्तिः स्यादिति भावः। अत्र
पाठान्तरमसांप्रदायिकत्वादसंबद्धार्थकत्वाच्चोपेक्ष्यं प्रतियोगिकत्वादीति आदिना
ऽन्यत्वप्रतियोगित्वादिपरिग्रहः। तेन घटादौ न दण्डाभावादिव्याप्यत्वापत्तिरिति
भावः। आद्यत्वस्थलत्यागे वीजमाह दीधितौ अत्र चेति। आद्यत्वस्थले चेत्यर्थः। तादृ-
श सामानाधिकरण्यमुपलक्षणं विशेषणं वा आद्याभिप्रायेणाह विशिष्टेति क-
र्मधाराविति कर्मत्वे चेति मूलानुसारात् गुणधाराविति मोऽक्षरं वमग्रेऽपि आदिना गुण
परिग्रहः। परामर्शात् तादृशसत्तादेः कर्मधारावपि सत्वेन प्रमात्मकपरामर्शात् गुणा-
द्यनुमित्यापत्तिः गुणादेः प्रमानुमित्यापत्तिः सल्लिंगपरामर्शरूपगुणसत्वादिति
भावः। सामानाधिकरण्यावच्छेदकसम्बन्धाभिन्नत्वेन तस्य विशेषणे तथा तादृशाविशि-
ष्टसत्ताया विशिष्टसत्तायाः कर्मधारावसत्वेन तादृशपरामर्शस्य भ्रमत्वनियमात् नोक्तापत्ति

राम

रिति भावः। अन्यथाभिप्रायेणाह साध्येति व्याख्यायां तथा च वैशिष्ट्यावच्छेदकत्वेन केवल साध्यसा
मानाधिकरण्यविशिष्टज्ञानत्वनिर्णयः पक्षताविरहे नैव तदुत्पन्ने रिति भावः। निश्चयत्वनि
वेशो गौरवादाह। तद्धर्माभावग्रहेति। संशयोत्पत्तिकाले तादृशनिर्णयाभावस्यानुभ
वसिद्धतया पक्षताविरहे मानाभावादाह। तद्धर्माभावग्राहकेति। अनन्यगतिकतया
अनुभवानुरोधेन कल्पनीयमिति तथा च सिषाधयिषां विनापि स्वव्याप्यपरामर्शादनु
मितिर्न स्यादिति भावः। एतेनोक्तकार्यकारणभावे मानाभावात् प्रसमाशयदर्शनं
सम्यक् किंतु प्रकारांतरेण तथा हि ननु यादृशव्याप्तिप्रकारकपक्षधर्मताज्ञानमनु
मितिकारणं तादृशव्याप्यत्वमिह निर्वाच्यं प्रकारत्वं च तस्य तत्र विशेषणतया वाच्यं
न च उक्तरूपलक्षणे तथा अन्यथा सत्तात्वादिना द्रव्यत्वादिव्यभिचारिण्यपि विशिष्ट
सत्तात्वादिना तद्व्याप्यस्य सत्वे सोपलक्षणेन तया व्याप्तिप्रकारकपरामर्शो विशिष्टस
त्तात्वेनासिद्धिज्ञानकाले सत्तात्वेन ज्ञानकाले च गुणत्वे संभवतीत्यसति बाधादेतदा

भवानं-दी

5

ताद्दशपरामर्शात् गुणान्तेऽभ्यत्वानुमितिः स्यात् न चैवं। अनुभवविरोधात् तद्व्याप्य
त्वं न ताद्दशसामानाधिकरण्यं पक्षे साध्यसंशयदशायां हेतौ विशेषणतयाप्रत्यक्षेण
तन्निश्चयसाधारणः पक्षधर्मतांशे निश्चयस्वरूपः परामर्शः कारणमस्तु तथा च ला
घवमपि केवलसाध्यसामानाधिकरण्यांशे संशयात्मकस्य परामर्शस्य कारण
त्वं त्वनुभवविरुद्धं न तु वच्छिन्नसामानाधिकरण्यांशे व्यापकसामानाधिकरण्यां
शेऽपि वेति वाच्यं। संशयव्यावृत्तायाः विशिष्टवैशिष्ट्यबोधविषयिताया एकस्या
एव तत्राघवेन कारणतावच्छेदकत्वेन ताद्दशसंशयाद्नुमित्यनुत्पादात् किं तु साध्य
सामानाधिकरण्यावच्छेदकत्वविशिष्टधर्मवत्त्वादिकं तस्य सर्वत्र परामर्शे विशेषण
तया हेतौ निश्चयसंभवात् अतो द्वितीयस्यैव कारणीभूतज्ञानविषयव्याप्तित्वं
अवस्यायपत्ति अत्र वे[illegible]त्यादिनाप्रागसंभव[illegible]वीति भावार्थस्फुट एवेति परास्तं।
अनुभवानुरोधेन ताद्दशकार्यकारणभावस्यावश्यकत्वात्। विशिष्टवैशिष्ट्यबो

राम

धविषयितायाः कारणतावच्छेदकत्वस्यानुमितिलक्षणेनिराकरणेनोक्तरीत्याशय
वर्णनस्यासंभवाच्च। नन्वेवं पर्वतमात्रालोको धूमो वोभयव्यापिवह्निव्याप्य इति प
रामर्शीयग्राह्यस्यसाध्यसंबंधितावच्छेदकरूपव्याप्तिपरस्यानुपपत्तिर्धूमत्वत्वा
दिनाधूमत्वादिसंशयसत्वेनां तद्वन्निष्ठ्वयाहित्यत आह दीधितावपमितिपक्ष्यवृत्ति
रित्यर्थः। विशिष्यधूमत्वत्वादिनासामान्यत इति साध्यसंबंधितावच्छेदकत्वेनेत्यर्थः
तथा च वह्निसामानाधिकरण्यावच्छेदकवद्गृह्यते इति निर्णयएवैतन्मते हेतुरिति
भावः। हृदयमित्यनेनैतन्मते ऽस्वरसः सूचितस्तमेवाह व्याख्यायां अवच्छेदकत्व
मितिर्हृदयमिति। तथा च साध्यवद्व्याप्तिरूपव्याप्तिपरएवसग्रन्थ इति भावः। [illegible]
केचित्तु। नत्वधूमत्वे आलोकत्वे वा साध्यसामानाधिकरण्यावच्छेदकत्वग्रहसत्वे
धूमालोकवत्तीयं त्वादौ साध्यसामानाधिकरण्यावच्छेदकत्वाग्रहेऽपि इदंत्वविशिष्टधूमत्वा
लोकत्वसंदेहकाले इदंत्वविशिष्टधूमत्वालोकत्वसंदेहकाले इदंत्वविशिष्टपक्षधर्मतांशा

भवानं·दी

नाऽनुमित्यनुपपत्तिः साध्यसामानाधिकरण्यावच्छेदकधूमत्वविशिष्टे दंत्वविशिष्टवान्प
र्वत इति निर्णयासंभवादित्यत आह अथमिति। तथा च तत्र दंत्वविशिष्टे साध्यसामा
नाधिकरण्यावच्छेदकधूमत्वत्वरूपेण तथाविधधूमत्वानिर्णयेपि सामान्यतस्ता
दृशावच्छेदकत्वरूपेण दंत्वविशिष्टे धूमत्वनिर्णये बाधकाभावेन साध्यसामाना
धिकरण्यरूपावच्छेदकविशिष्टदंत्वाश्रयवान्पर्वत इति परामर्शसंभवात्तत्रानुमित्युत्प
त्तौ बाधकाभाव इति भावः शेषं पूर्ववदित्याहुः अन्ये तु ननु धूमत्वादिनरूपधर्मावच्छि
न्नसाध्यसामानाधिकरण्यं व्याप्तिस्तद्धर्मप्रकारेण पक्षधर्मतानिश्चयोनुमितौ
हेतुर्वाच्यः। तथा च कर्मणि तादृशाद्विशिष्टसत्त्वाज्ञातत्वरूपेण पक्षधर्मत्वानिर्णयात्तोक्ता राम
नुशयस्संभवतीत्यत आह यमिति। विशिष्टेति। तथा च धूमत्वादिप्रकारेण पक्ष
धर्मतासंदेहे तादृशापामुक्तप्रकारासंभवात्तदानीमनुमित्यर्थमपि द्वितीयकल्पानु
सरणमिति भावः शेषं पूर्ववदित्याहुः। दीधितौ अतिप्रसंगात् अवच्छेदकत्वाति

प्रसंगात् एवं यथायोग्यमग्रेपि। सामानाधिकरण्यव्याप्यवृत्तित्ववादिसार्वभौमम

तमाल्लं आशंकते नचेति कर्मादिवृत्तित्वेति नच वृत्तित्व पदं व्यर्थं कर्माद्यवच्छेदेने

त्यस्यैव सम्यक्त्वादिति वाच्यं। कर्मत्वएवैतत्कालतयाकर्मणि सत्तायां नगुण

सामानाधिकरण्यमिति प्रतीतिवदितरत्री सत्तायां नगुणसामानाधिकरण्य

मिति प्रतीतिवारणाय समवेतत्व संबंधेन कर्मादिरवच्छेदकत्वलाभाय तदुपा

दानं। एतेन कर्मादिवृत्तित्वं कर्मण्येव पलक्षणमिति कस्य चित्प्रलपनमपास्तं

यं विशिष्टसत्त्वइति गुणे साध्य इत्यादिः अव्याप्तिः प्रसंगादित्यग्रिमेण न्वयः

धूमत्वादावितिवन्द्यादौ साध्य इत्यादिः अव्याप्तीति। नच हेतुतावच्छेदकसंबंधेन हे

त्वधिकरणावच्छेदेन साध्यसामानाधिकरण्याभाववत्त्व निवेशान्नायं दोषः इती

पि समवेतत्व संबंधेनावच्छेदकत्वलाभाय वृत्तित्व पदं प्रागुक्तमिति वाच्यं महाका

लमात्रवृत्तिविशेषणतयासद्धेतावव्याप्तेः महाकालावच्छिन्नसाध्यसामानाधिकर

न्याभावाप्रसिद्धेः आख्यायां साध्यसामानाधिकरण्येति साध्यसंबंधितापदस्य संवलना
देतल्लाभः। दीधितौ यद्धर्मविशिष्टेति। अत्र यद्धर्मपदं हेतुतावच्छेदकपरं हेतुपदं
यद्धर्मपदस्य तत्परत्वलाभाय आख्यायां तादृशेति हेतुतावच्छेदकविशिष्टहेत्वधि
करणेत्यर्थः वृत्तित्वाभावः वृत्तित्वत्वावच्छिन्नाभावः। तेन धूमादिसामानाधिकरण्या
भाववति महानसीयवह्न्यादिमद्वृत्तित्वाभावसत्त्वेपि धूमवान्वह्नेरित्यादौ नातिव्या
प्तिः अव्याप्तिः रिति। द्रव्यवृत्तित्वाभावस्य सत्तानिष्ठद्रव्यवृत्तित्वात्मकाभावप्र
तियोगित्वेन तादृशातिरिक्तत्वव्यापकत्वपर्यवसितस्य तादृशातिरिक्तत्वावच्छिन्नत्व.
स्य द्रव्यवृत्तित्वाभावेऽसंभवादितिभावः। केवलान्वयिसाध्यके साध्यसामाना(धि) साम
करण्याभाववद्वृत्तिहेत्वधिकरणवृत्तित्वासंभवेन लक्षणसत्त्वादसंभवो नोक्त इति
बोध्यं। नन्वतिरिक्तत्वं न साध्यसामानाधिकरण्याभाववत्त्वमपि तु साध्यसमा
नाधिकरणभिन्नत्वं तथा च नोक्ताव्याप्तिः अन्योन्याभावस्याव्याप्यवृत्तित्वादत आह।

व्याप्तेरितिसाध्यासमानाधिकरणेत्यतीति अत्रानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशानु
रोधेननञ्द्वयघटना। तेनतत्राप्यवास्साध्यसमानाधिकरणेवर्त्ततइत्याद्येवसम्य
गितिप्रत्युक्तं। तस्यतत्रप्रयोजनत्वात्। सत्वादिति असंभवइतीतिशेषः तद्वृत्ति
त्वानां। संयोगादिरूपधूमाधिकरणवृत्तित्वानांवृत्तित्वंवन्ह्यसमानाधिकरणवृ
त्तित्वंवाच्यं। निषेधप्रतियोगितयावाच्यं। संयोगादिरूपधूमाधिकरणवृत्तित्वेवन्ह्य
समानाधिकरणसमवेतत्वाद्यभावोवाच्यइतिफलितोर्थः। तद्वृत्तित्वस्य। संयोगरूप
धूमाधिकरणवृत्तित्वस्यतादृशजात्यवृत्तित्वाभावात्। वन्ह्यसमानाधिकरण
जातिसमवेतत्वाभावस्यासंभवात्। संयोगरूपवन्ह्यधिकरणवृत्तित्वेधूमासमा
नाधिकरणहृदादिसमवेतत्वाभावस्यसत्वेनधूमवान्वन्हेरित्यत्राप्तिव्याप्त्याप
त्त्यासाध्यासमानाधिकरणसामान्यवृत्तित्वाभावस्यैवनिवेशनीयत्वादितिभावः
असंभवः असंभवोतादृशस्यैवं। यावदितीति। तथाचस्वविशिष्टाधिकरणवृत्तित्व

व्याप्यसाध्यतावच्छेदकावच्छेदकावच्छिन्नसाध्यासमानाधिकरणत्वकत्वमिति निष्कर्षो
न्नोक्तासंभव इति भावः अत्र वन्ह्यादिसमानाधिकरणायोगोलकत्वादौ धूमत्वा
दिविशिष्टाधिकरणवृत्तित्वस्यासत्वेनासंभववारणाय न च रूपघटे निष्कर्षे
यद्यपि स्वविशिष्टाधिकरणवृत्यवृत्तिसाध्यासमानाधिकरणत्वकत्वं यावत्वाघ
टितत्वलक्षणं संभवति । तथापि प्रकृते तस्याप्रवेशेन लक्षणं तरलतया न दोषः
फलं गुणवान्विशिष्टसत्वादित्यत्राव्याप्तिनिरासरूपं संबंधसामान्येनेति । न
च यत्किंचित्संबंधेन साध्याधिकरणत्वं वाच्यं तथा च समवायेन वन्ह्यधिकरण
समवेते महानसत्वादौ धूमाधिकरणसमवेतत्वाभावासत्वान्न दोष इति । वा राम
च्यं । एतद्रीत्या वन्हिमान् धूमादित्यादावव्याप्त्यापत्तेः समवायेन वन्हेरिति । धूम
वान् वन्हेरित्यादौ तु नास्ति व्याप्तिसंभवः सकलधूमाधिकरणनाशानंतरं वन्ह्य
धिकरणे व्यक्तिसंभावनया संबंधसामान्येन धूमाधिकरणवृत्तौ चरमवन्हौ हे

त्वधिकरणवृत्तित्वाभावासत्वात् धूमकालीनवह्निहेतोरनुसरणेनुप्रयासगौर
वमिति तत्परित्यागः संबंधसामान्येनेति । नच साध्याधिकरणे यत्किंचित्सं
बंधेन वृत्तित्वोक्तौ नायं दोषइतिवाच्यं । संबंधसामान्येनहेत्वधिकरणवृत्तित्वो
क्तौ वह्निमान् धूमादित्यादौ अव्याप्तेः यत्किंचित्संबंधेन तदुक्तौ च सर्वत्रातिव्या
प्तेः येन येनेतीति द्रव्यत्ववत्संयुक्तरूपादौ सद्भाववत्संयुक्तत्वाभावसत्वादुक्तरी
त्या एव सम्यगतो वीप्साद्वयं लाघवाद्ध वस्तुतस्त्विति । प्राचां यत्तत्त्वयोरनु
गमाद्यद्यावद्व्यापकत्वादिति विशेषणतावेिशेषस्यापि यद्यत्संबंधान्तर्गतत्वा
दिति भावः दीधितौ नैवं नैव । तेन तेन । तत्पात्वे । वर्तमानत्वं हेतुतावच्छेदकसं
बंधेन वर्तमानत्वघटितनिवेशे च एतद्रूपभिन्नं गुरुत्वादित्याद्यावदतिव्याप्तेः स्या
दिति तत्परित्यागः ननु पारिभाषिकावच्छेदकत्वघटितोक्तलक्षणस्य गुरुध
र्मे नीलधूमत्वादावपि सत्वेन नीलधूमत्वादिना व्याप्यत्वासिद्धिर्न स्यादित्य

न आह नीलधूमत्वादेरिति पूर्वोक्तस्वव्यापकसमानाधिकरणपदार्थविलक्षणानि
पक्षत्वेऽपि वैयर्थ्यं तुल्यमेवातः । नचात्र प्रमेयधूमत्वादिकमेव कुतो नोक्तमिति
वाच्यं । न समनियतधूमत्वादिविशिष्टाधिकरणवृत्तित्वत्वादेरप्यगुरोः
प्रमेयधूमत्वादिविशिष्टाधिकरणवृत्तित्वत्वस्यानवच्छेदकतया तदवच्छिन्ना
भावाप्रसिद्ध्या तत्रोक्तलक्षणासंभवेनातिप्रसंगानवकाशात् धूमत्वनी
लधूमत्वाद्योस्तु समनैयत्याभिमतत्रोरप्यसंभवात् । वारणीयत्वे
त्विति तु यादृशस्य वित्तास्वरसमाह व्याप्यत्वार्थावसेतु तस्त्विति गुरुधर्मतुल्यव्या
पनया वारणीयस्य वस्तुगत्या धूममात्रवृत्ति यन्नीलरूपादि तद्वता
देः स्वसमानाधिकरणाव्याप्यवृत्तिमत्त्वविशेषणेनापि वारणासंभ
वेनैव तत्रीत्यैव अभिग्रहोपपादनस्यावश्यकत्वादिति भावः निरुक्तेति स्वविशि
ष्टव्याप्यवृत्तिमत्त्वार्थः । तेन तत्ताहशत्वविशेषणोपादानेन । नह्यतिरिक्तमा

राम

व्याप्तिरित्यर्थः द्रव्यत्वासमानाधिकरणगुणत्वादेः सत्तात्वविशिष्टाधिकरण-
वृत्तित्वासत्त्वेन सत्तात्वस्य तादृशत्वादिति भावः। अथ समवायघटितसामा-
नाधिकरण्यस्य समवेतत्वपर्यवसन्नतया गुणकर्मान्यसमवेतत्वरूपतादृश-
धर्मघटिततया विशिष्टसत्तात्वस्यासंग्रहापत्तिस्तादृशपदोपादानेपि दुर्वारेति
विशिष्टसत्तात्वस्य नीलधूमत्वादिवत्संग्राह्यत्वमेवोपेयमिति तादृशपदं व्य-
र्थमेवेति चेन्न। यत्र गुणकर्मान्यत्ववत्तिसंबंधसामान्येन वृत्तित्वरूपसामाना-
धिकरण्यसंबंधेन गुणकर्मान्यत्वविशिष्टसत्तादिकं समवायेन हेतुस्तत्र तादृ-
शपदसार्थक्यात्। गुणकर्मान्यत्वाधिकरणमहाकालनिरूपितकालिक-
संबंधावच्छिन्नवृत्तित्वस्य गुणत्वेपि सत्त्वेन तादृशविशिष्टगुणत्वस्य समवा-
येन गुणवृत्तितया तत्र गुणकर्मान्यत्वविशिष्टस्य तादृशत्वात्। न चैवं तादृश-
विशिष्टसत्ताया समवायेन गुणेपि सत्त्वाद्व्याप्तेः साध्ये तस्य व्यभिचारित्व-

10

मेवेति वाच्यं। संबंधसामान्यांतर्गतसमवायावच्छिन्नवृत्तित्वरूपसामानाधिकरण्य
संबंधेन गुणकर्मान्यत्वविशिष्टसत्तायाः गुणेऽसत्त्वेन व्यभिचारित्वासंभवात्
एवं च समवायघटितसामानाधिकरण्येन गुणकर्मान्यत्वविशिष्टसत्तायां यत्र
हेतुत्वं तत्र तादृशविशिष्टसत्तात्वस्य नीलधूमत्वादिवत् संग्राह्यत्वमेव गतत्व
भावादिति ध्येयं। धूमत्वस्येति न च तस्य स्वाश्रयप्रतियोगिकत्वसंबंधेन धूम
प्रागभावत्वसामानाधिकरण्यमस्त्येवेति वाच्यं। प्रकृतहेतुतावच्छेदकत्वाघट
कसंबंधेन स्वाधिकरणे तादृशत्वनियामकसंबंधेन वृत्तित्वस्य स्वसामानाधि
करण्यपदार्थत्वे न तादृशत्वनियामकसमवायेन धूमत्वस्य तत्रासत्त्वेन स्वसामा
नाधिकरण्याभावात् अथात्र वह्निमान् धूमवद्व्यासंगकृत्वविशिष्टप्रागभा
वादित्यत्र तादृशप्रागभावत्वस्य स्वसमानाधिकरणे तादृशधूमवद्व्यासंग
कृत्वघटितत्वे नाव्याप्तिरिति प्रकृतहेतुतावच्छेदकसंबंधेन तादृशत्वघटकस्ववि

राम

शिष्टाधिकरणत्वं विवक्षणीयं प्रागभाववन्निष्ठहेतुतावच्छेदकविशेषणताविशेषेणास्व
विशिष्टाधिकरणत्वघटिततादृशत्वस्य धूमवद्व्यासंयुक्तत्वेऽसत्त्वान्नोक्ताव्या
प्तिरेवं च प्रागभाववन्निष्ठहेतुतावच्छेदकविशेषणतया धूमत्वविशिष्टाधिकरण
प्रसिद्ध्या धूमत्वस्य तादृशतया स्वसमानाधिकरणपदवैयर्थ्यमिति चेन्न
भावाभावसाधारणविशेषणतास्वीकारे धूमत्वस्य तादृशत्वसंभवात् ।
तत्स्वीकारेऽपि वह्निमान् धूमध्वंसविशिष्टधूमप्रागभावादित्यत्र विशेष
णतया स्वविशिष्टाधिकरणत्वघटिततादृशत्वं धूमध्वंसत्वे न तद्घटिततया
निरुक्तप्रागभाववत्त्वसंग्रहाय तत्सार्थक्यात् अस्मिन् कल्पे दीधितौ धूम
प्रागभाववत्त्वपदं तद्विशेषधूमध्वंसविशिष्टधूमप्रागभावत्वपरमिति ध्ये
यं । ननु तथापि वाच्यं प्रमेयादित्यादौ प्रमेयत्वादावव्याप्तिस्तस्य तादृशप्रमात्व
घटितत्वात् । एवं वह्निमान् धूमाव्यभिचारिण इत्यत्र धूमाव्यभिचारित्वादेः

व्याप्तिस्तस्य ताहृशधूमत्वघटितत्वात् एवं वह्निमान् धूमात्यंताभावादित्यत्र धूमा
त्यंताभावाभाववत्वे धूमतत्ध्वंसतत्प्रागभावसाधारण्येऽव्याप्तिस्तस्य ताहृशधू
मत्वघटितत्वात् । न च धूमत्वस्य हेतुतावच्छेदकविशेषणतासंबंधेन स्वविशिष्टा
धिकरणत्वघटितताहृशत्वाभावान्नेयमव्याप्तिरिति वाच्यं भावाभावसाधार
णविशेषणतास्वीकारे महाकालीयविशेषणतया साध्यहेतुभावेवातत्सं
भवादिति चेन्मैवं । स्वसामानाधिकरण्यस्वव्यापकत्वार्थकत्वेनोक्ताव्याप्य
भावात् । न चैवं धूमात्लोकान्यतरत्वादेः संग्रहापत्तिर्धूमत्वादेस्स्वाव्यापकत्वा
दिति वाच्यं । स्वघटकस्वघटितान्यतरसाध्यसंबंधितावच्छेदकधर्मान्तरत्वेन स्व
व्यापकत्वस्य विवक्षणेन तद्दोषात् । यत्तु स्वघटकसाध्यसंबंधितावच्छेदकधर्मा
न्तरत्वेनैव स्वव्यापकत्वं विवक्षणीयमतो नोक्तदोष इति तच्चिंत्यं तथा सति व
ह्निमान्धूमादित्यादौ धूमवद्वृत्तियावत्वचक्षुःकटुजनकद्रव्यत्वादेर्धूमत्वघट

राम

कत्वाभावेन निरुक्तरूपेण स्वव्यापकत्वस्याप्रसिद्धेः अस्मन्मते च धूमवृत्तियावत्त्व
चस्तुः कटुजनकद्रव्यत्वादेर्धूमत्वघटकत्वाभावेन निरुक्तरूपेण स्वव्यापक
त्वस्याप्रसिद्धेः अस्मन्मते च धूमवृत्तियावत्त्वादेर्धूमत्वाघटकत्वेपि धूमत्व
घटितत्वेनाप्रसिद्ध्यभावात् न च स्वघटकसाध्यसंबंधितावच्छेदकधर्मान्त
रत्वेन स्वव्यापकधर्मघटितेप्यघनीलधूमत्वादिकं तद्भिन्नत्वस्य धूम
त्वादौ सत्त्वान्न दोष इति वाच्यं । तथासति तद्घटितत्वं च तद्विषयकप्रतीति
विषयत्वमिति दीधितिविरोधापत्तेरिति संक्षेपः न च धर्मान्तरत्वस्य स्वा
विषयकप्रतीति । विषयत्वरूपत्वेन न क्षतिः नवीनधूमत्वादेः संग्रहाप
त्तेः न च धूमत्वस्य नीलधूमत्वाभेदे स्वाविषयकप्रतीतिविषयत्वमपि
दुरूपपादमिति वाच्यं स्वावच्छिन्नप्रकारताभिन्नप्रकारतावच्छेदकत्वस्यैव त
त्वात् एतेन वाच्यमेयत्वत्वादौ मेयाविषयकप्रतीतिविषयाप्रसिद्ध्या मेये

मकरंदी-टी०

12

ऽव्याप्तिः एवं वह्निमान् धूमादित्यादावपि तादृशधर्मान्तराप्रसिद्धिरिति स्वविषयक
प्रतीतिविषयो यः स्वसमानाधिकरणस्तादृशो धर्मस्तद्विषयकप्रतीत्यवि
षोयस्त्वन्न हि तन्मित्यघटितान्तार्थोऽवश्यं वाच्य इति नञर्थद्वयगर्भतया आ
वश्यकतया तद्घटितत्वमिति दीधितिग्रन्थोऽसंगत एवेति दूषणं प्रावनंप
रास्तं। मेयत्वविशिष्टावच्छिन्नप्रकारताभिन्नप्रकारतावच्छेदकत्वस्याप्रसिद्ध्य
भावात्। वह्निमान् धूमादित्यादावपि तादृशधर्मान्तरस्य धूमनिष्ठद्रव्यत्वा
देरेव प्रसिद्धत्वाच्च। न च तथापि वाच्यमेयवतद्व्यत्वमेये व्याप्तिर्दुर्वारैव तादृश

राम

धर्मान्तराभिधेयत्वाद्यविषयकप्रतीतिविषयत्वस्य तत्राभावादिति वाच्यं
तद्विषयकप्रतीतिविषयत्वस्यापि तद्वच्छिन्नप्रकारताभिन्नप्रकारतावच्छेद
कत्वरूपत्वात्। इदं तु बोध्यं। वाच्यं। प्रमेयादित्यादौ प्रमेयत्वादेर्नीलधूमत्वा
दिवत् संग्राह्यत्वमेव। तस्य तादृशविषयत्वरूपधर्मान्तरघटितत्वादिति। ऽकेति।

संबंधविशेषघटितसविशिष्टेत्यादीत्यर्थः वाच्यत्वासमानाधिकरणस्य संबंधविशेषघटितवा
च्यत्वसामानाधिकरण्याभाववतः। एवमग्रेपि अन्यथा संबंधसामान्यघटितवाच्यत्वासा
मानाधिकरण्यादेरेवाप्रसिद्ध्यासंगतेः एवं च दीधितौ नाप्रसंग इत्यनंतरमेवं चेत्यादिनि
प्रसंगादित्यंतस्त्वनुसाध्यतावच्छेदकसंबंधेन साध्यादिविषयत्वमित्यंतः पाठः क्वाचित्को
सांप्रदायिकस्त्वेति ध्येयं। अत्रेदं बोध्यं। एवं च सति न ह्यतिप्रसक्तमवच्छेदकमित्यादि
मूलं न ह्यतिप्रसक्तं न हि साध्यसामानाधिकरण्यातिरिक्तवृत्तिस्वविशिष्टाधिकरण
वृत्तित्वकवह्नित्वादिकं अवच्छेदकं स्वविशिष्टाधिकरणवृत्तियावत्साध्यासमानाधि
करणकं संभवतीति शेषः संयोगादेः साध्यासमानाधिकरणायोगोलकवृत्तिसं
योगादेस्तथात्वादर्शनात् वह्नित्वविशिष्टाधिकरणवृत्तित्वादर्शनादित्यर्थकतया व्या
ख्येयं एतेन मेयत्वादेरवच्छेदकत्वस्य स्वरूपपरत्वेपि न ह्यतिप्रसक्तमवच्छेदकमित्यादि
मूलं। दुरुपपादं मेयत्वस्य वाच्यत्वसामानाधिकरण्यातिप्रसक्तस्यैवावच्छेदकत्वादि

भवानं.टी

दिति शंकायाना वकाशः इति । मैथिलमतं । यत्प्रयुक्ता अतिरिक्तवृत्तित्वादि मिश्रमतं । एतन्म
ते हि साध्यसामानाधिकरण्याभाववद्वृत्तित्वमेव साध्यसामानाधिकरण्यावच्छेदकत्वं
मेयादिहेतुके च वृत्तिमत्वमेव व्याप्तिर्व्याप्यतावच्छेदकमपि तदेव न तु मेयत्वादिकमिति
न तत्राव्याप्तिः विशिष्टस्यातिरिक्तत्वात् सामानाधिकरण्यस्य चाव्याप्यवृत्तित्वान्न पूर्वोक्त
दोषः दूषयति दूषयितुमुपन्यस्यति । परमतोपन्यासस्यापि दूषणानुकूलत्वाद् घट्या
श्रुतमेवेवासम्यक् । दीधितौ वृत्तिमत्वादिकमिति आदिना मेयादि हेतुत्वे तत्संबंध
परिग्रहः । वृत्तिमत्त्वं च हेतुतावच्छेदकसंबंधेन बोध्यं अन्यसंबंधावच्छिन्न वृत्तिमत्वस्या
ति प्रसक्तत्वादिति ध्येयं । ननु मिश्रैर्वृत्तिमत्प्रमेयत्वमेव व्याप्तिरित्युक्तं तत्कथमत्र
वृत्तिमत्वमात्रं व्याप्तित्वेनोक्तमत आह । व्याख्यायां वृत्तिमदिति इत्यत्र इति मिश्रोक्ते
वैयर्थ्यादिति । इदमुपलक्षणं एतन्मते पिनीलधूमत्वादेर्वारणाय स्वसमाना
धिकरणेत्यादिविशेषणस्यावश्यकतया वृत्तिमत्प्रमेयत्वस्य वृत्तिमत्वरूपताद

राम

शधर्मान्तरघटितत्तया व्याप्तित्वासंभवादित्यपि दूषयं दर्शितं व्याप्तिरूपत्वयेत्यादिः ननु व
स्तुगत्या व्याप्यतावच्छेदकरूपेण हेतुप्रयोगस्य संप्रदायसिद्धतयामेयत्वादिति प्रयो
गानुपपत्तिरत आह। तीधितौ तत्रत्यस्त्विति व्याप्तिग्रहस्त्वित्यर्थः मेयत्वादिने ति
तृतीयाप्रकारे तेन मेयत्वादेर्व्याप्तिग्रहविषयतावच्छेदकत्वेन प्रयोगोपपत्तिरिति
व्याप्तिग्रहविषयतावच्छेदकरूपेणैव हेतुप्रयोगस्याभ्युपगमादिति भावः व्याप्तिग्रह
संभवादिति तथा च व्याप्तिग्रहविषयतावच्छेदकत्वमपि न मेयत्वादेरिति तेन रूपेण
प्रयोगानुपपत्तिरेवेति भावः ननु व्याप्तिविरहविवृत्तितया गृह्यमाणस्यापि व्याप्ति
ग्रहविषयतावच्छेदकत्वे किं बाधकमत आह अन्यथेति तादृशस्यापि व्याप्तिग्रह
विषयतावच्छेदकत्वे अतिप्रसंगादिति व्याप्तिविरहविवृत्तितया गृह्यमाणत्वस्या वि
शेषेण द्रव्यत्वादेरपि वह्न्यादिव्याप्तिग्रहविषयतावच्छेदकत्वसंभवेन वह्निमा
न् द्रव्यादित्यादिप्रयोगापत्तितया गृह्यमाणत्वस्याविशेषेण द्रव्यत्वादेरपि

14

वन्ह्यादिव्याप्तिग्रहविषयतावच्छेदकत्वसंभवेन वह्निमान् द्रव्यादित्यादिप्रयोगापत्तिरि
ति भावः। यत्तु द्रव्यत्वादौ वन्ह्यादिव्यभिचारिवृत्तितया गृह्यमाणत्वमेव विशेष इति
न तस्य व्याप्तिग्रहविषयतावच्छेदकत्वं मेयत्वादेस्तु न वाच्यत्वादिव्यभिचारिवृत्तित
या गृह्यमाणत्वमिति तस्य तत्त्वे बाधकाभाव इति पूर्वपक्षयति तन्न व्याप्तिग्रहा
संभवादित्यादिग्रंथस्य शंकअन्यव्याप्तिग्रहासंभवाभिप्रायकत्वान्न परस्परव्या
घातो दोषाद्। नव्यादि व्याप्तिग्रहासंभवादिति। मेयादि वाच्यत्वादिव्याप्यमिति
शंकायां मेयत्वावच्छेदेन व्याप्तिग्रहो न संभवति व्याप्तिविरहि हि वृत्तित्वज्ञानस्य प्रतिबं
धकस्य सत्त्वात् शंका तु न धर्मितावच्छेदकसामानाधिकरण्ये न तद्ग्रहसंभव इति न त
स्य शंकअन्यव्याप्तिग्रहविषयतावच्छेदकत्वसंभव इति भावः। शंकायां धर्मितावच्छेदक
सामानाधिकरण्येन व्याप्तिग्रहसंभवे नोक्तदोष इत्यत आह। अन्यथेति शंका धर्मि
तावच्छेदकसामानाधिकरण्येन व्याप्तिसंभवे इत्यर्थः। अतिप्रसंगात् द्रव्यादि वन्ह्या

राम

दिव्याप्यमित्यादिशंका द्रव्यत्वादिसामानाधिकरण्येन वह्न्यादिव्याप्तिग्रहप्रसंगात्। तथा
च द्रव्यत्वादौ व्यभिचारिवृत्तित्वग्रहस्य तदवच्छेदेन व्याप्तिग्रहविरोधित्वेपि तत्सा
मानाधिकरण्येन व्याप्तिग्रहाविरोधितया तस्य व्याप्तिग्रहविषयतावच्छेदकत्वसंभ
वेन वह्निमान् द्रव्यादित्यादिप्रयोगापत्तिरेवाच तेन इति नोक्तपूर्वपक्षावकाश इति
सारं। केचित्तु दीधितेरुक्तिमत्त्वादिकमिति आदिना तादृशावृत्तिप्रकारकप्रमावि
शेष्यत्वपरिग्रहः तत्र व्याप्तिः तत्र साध्यसामानाधिकरण्यावच्छेदकं तत्र हेतुसा
मानाधिकरण्यावच्छेदकवत्ताग्रहस्तु मेयत्वादिनेति मेयत्वादिकं विशेष्यताव
च्छेदकं कृत्वेत्यर्थः अतो न प्रमेयं वाच्यत्वव्याप्यमिति व्यवहारानुपपत्तिरि
ति शेषः न चैवं वह्निधूमव्याप्य इत्यपि व्यवहारापत्तिस्तत्रापि वह्नित्वविशिष्टसा
ध्यसामानाधिकरण्यावच्छेदकस्यार्द्रेन्धनप्रभववह्नित्वादेर्ग्रहसंभवादिति
वाच्यं इष्टत्वात् लाघवात्साध्याभाववदवृत्तित्वस्यैव व्याप्तित्वपक्षेपि तत्र विशि

भवानं॰टी॰ 15

ष्टस्यानतिरिक्तत्वमते-एवंविशिष्टसत्वादित्यादेरलक्ष्यत्ववारिनांस्वतंत्रानांमतेचहेतु
तावच्छेदकप्रवेशाविरहेणवन्हित्वसामानाधिकरण्येनताद्दशव्यवहाराभ्युपगमात्।
नचैवंप्रमेयत्वादिरूपेणगमनाविशेष्यकायांवाच्यत्वादिव्याप्यत्वधियामप्रामा
ण्यापत्तिरितिवाच्यंतत्रापीष्टापत्तेः व्याप्तिविरहिवृत्तितयागृह्यमाणेनव्याप्तिविरहि
वृत्तिताश्रयेणरूपेणेतितृतीयार्थोऽवच्छेदकत्वंव्याप्तिग्रहासंभवात् व्याप्तिग्रह
स्यप्रमात्वासंभवात्तथाचवृत्तिमत्वस्यैवतत्रावच्छेदकत्वेगगनादाविववृत्तिम
त्यपिप्रमेयत्वाद्यवच्छेदेनप्रमेयंवाच्यत्वव्याप्यमितिप्रतीतेरप्रमात्वप्रसंगइति
भावः।ननुतत्रप्रमात्वमेवासिद्धमित्यतआहअन्यथेतिअनुभवसिद्धेपिप्रमात्वे राम
विवादसंभवेइत्यर्थः।अतिप्रसंगादितिअनुभववलापात् धर्ममात्रस्यैवासिद्धि
प्रसंगादित्यर्थः एवंचनोक्तदूषणसंभावनापीतिप्राहुः।अत्रवदंतियत्वि
त्यादेरयमाशयः यथाश्रुतानतिरिक्तवृत्तित्वोक्तावपिनमेयादिहेतुकेऽव्याप्तिःतत्र

वाच्यत्वादिसामानाधिकरण्यानतिरिक्तवृत्तिवृत्तित्वोभयेदेरेव व्याप्तित्वात् तस्याश्च व्या
प्तेः स्वरूपसंबंधरूपसंबंधरूपमवच्छेदकत्वं प्रमेयत्वे व्यस्तीत्यतो मेयादिति प्रयो
गोन विरुद्धः न चातिप्रसक्तस्य मेयत्वस्य कथं व्याप्यवच्छेदकत्वमिति वाच्यं । अवच्छे
द्य समानाधिकरणत्वे सति अवच्छेद्यविशिष्टाधिकरणतासमव्याप्यस्य विशिष्टा
धिकरणताकत्वस्यैवावच्छेदकत्वव्यवस्थापकत्वेनानतिरिक्तवृत्तित्वस्यावच्छेदक
त्वेऽतंत्रत्वात् अत एव विशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकतां सत्त्वादिकं घटत्वं । द्रव्य
सत्तात्वादिकं वा नावच्छेदकं अवच्छेदकतानियामकनिरुक्तरूपज्ञानं तद्व्यंजकं
तद्भाववत्तानेव च तत्र प्रतिबंधकं न चातिप्रसक्तमित्यादि मूलमप्येतन्मतस्थिति
वृत्तिमत्त्वादिकमेवेत्यादि नागगनादिना गगनादिभिन्नत्वपरिग्रहः एवका
रेण च प्रमेयत्वं मा वृत्तमतेतत्र मेये तद्धटत्वेत्यादि मेयत्वे कथंचित् स्वीयव्या
प्यवच्छेदकत्वसंभवात् तत्प्रतिबंधकीभूतस्य ज्ञानस्यासंभवाद्भूतेदवच्छेदेन

भवानं·टी

16

व्याप्तिग्रहस्तेन स्वरूपेण प्रमेयादिहेतुप्रयोगश्च न विरुद्ध इति भावः अतिरिक्तवृत्तिधर्मेऽ
वच्छेदकत्वस्यादृष्टचरत्वात् व्याप्यतिरिक्तवृत्तौ कथं व्याप्यतावच्छेदकत्वं स्यादित्या
शयेन दूषयति व्याप्तीत्यादि अन्यथा अतिरिक्तवृत्तेरवच्छेदकत्वस्य तदवच्छेदेन त
ग्रहस्य च स्वीकारे अतिप्रसंगादिति द्रव्यत्वादौ धूमनिष्ठव्याप्यवच्छेदकत्वस्य द्रव्य
त्वावच्छेदेन तग्रहस्य च प्रसंगादित्यर्थः। न चावच्छेदकतानियामकस्य प्रागुक्तरू
पस्य प्रमेयत्वे सत्त्वात् द्रव्यत्वादौ चासत्त्वात् द्रव्यत्वादौ न तत्प्रतिबंधकीभूतस्य
ज्ञानस्य सत्त्वाच्च नैष दोष इति वाच्यं। अतिरिक्तवृत्तेरपि तादृशस्यावच्छेदकत्वस्वीका
रे वा व्यत्वसामानाधिकरण्यावच्छेदकत्वमपि तादृशं प्रमेयत्वे निराबाधमिति तत्स
मानाधिकरण्यानतिरिक्तवृत्तित्वोभयोरपि धर्मांतर्भावप्रयासो वृथैव स्यादाशयात्। वस्तु
तस्तु तादृशावच्छेदकत्वघटितलक्षणान्तरसंभवस्यादोषत्वात्। यथाश्रुतानति
रिक्तवृत्तित्वघटितलक्षणस्योक्तरीत्या व्याप्युद्धारप्रकारकथनं न विरुद्धं परं तु विशि

राम

घ्रस्यातिरिक्तत्वे सामानाधिकरण्यस्याव्याप्यवृत्तित्वे च मानाभावेन गुणत्वादिसत्त्वा

दिस्माद्यावृत्तिप्रसक्तिः सत्त्वसत्त्वेषु पदार्थेतिरीत्या वह्निमान्धूमादित्यादावप्रसक्तेरे

वात्र दोषो वसेयः इति व्याख्यायां मिश्रमतं मिश्रस्य मतान्तरं स्वरूपसंबंधविशेष

एवेति इत्यादि नानेतत्त्वमित्यंतेन। दीधितौ अत एव एतत्तल्लक्षणे स्वरूपसंबं

धरूपावच्छेदकत्वस्य निवेशादेवासंगच्छते। अतिप्रसक्तेः संसर्गतावच्छेदकत्व

वत्त्वसाध्यसामानाधिकरण्यस्य स्वरूपसंबंधरूपावच्छेदकत्वप्रसक्त्या तन्नि

राकरणसंगतेरिति भावः अतिप्रसक्तेऽतिप्रसक्तत्वविशिष्टे अप्रसक्ततया

अनाहार्यशेषाविषयतया निराकरणेति। प्राचां मतेऽभावबुद्धौ प्रतियो

ग्यारोपस्य हेतुत्वादिति भावः यत्त्ववच्छेदकमित्यस्यावच्छेदकव्यवहारविषय

इत्यर्थकतया निराकरणसंगतिरेवेति तदसत् उक्तस्य रत्नापत्तेः एतन्मते म

लेन व्यतिप्रसक्तमिति अतिप्रसक्तत्वस्वरूपसंबंधरूपावच्छेदकत्वाभावव्याप्य

17

तयाविरोधादितिभावः संयोगादेस्तथात्वादर्शनात् ततः संयोगातिप्रसक्तेरध्वांतरी
याग्राहोत्तत्संयोगावच्छेदकत्वादर्शनात्। अतिप्रसक्तत्वं च समवायित्वसंबंधेनवी
ध्वं। न चैतद्धर्मीयाग्राहिकमपि संयोगाभाववद्वृत्तितयातिप्रसक्तमेवेति वाच्यं प्र
तियोगिवैयधिकरण्यस्याप्येतद्घटकत्वात्। न चैवमेतद्धर्मीयमूलमप्यनतिप्र
सक्तमिति तस्यावच्छेदकत्वापत्तिरिति वाच्यं। तस्यावच्छेदकताग्राहकप्रमाणाभावा
देवानवच्छेदकत्वात्। प्रकृतग्रंथस्यचातिप्रसक्तस्वरूपसंबंधरूपावच्छेदकत्वाभाव
मात्रे तात्पर्यं न तु अनतिप्रसक्तस्यावच्छेदकत्वेऽपीति न दोषः यद्वा नन्वतिप्रसक्तमि राम
त्यादिर्बलवत्तरप्रत्यक्षादिप्रमाणं विनानातिप्रसक्तमवच्छेदकमित्यर्थः संयोगा
द्यवित्त्वस्य च संयोगित्वाद्यवृत्तिप्रसक्तेर्घटत्वावच्छिन्नप्रतियोगित्वादीनामव
च्छेदकत्वादर्शनादित्यर्थः कपिसंयोगादेस्तु बलवत्तरप्रमाणसंभवादति
प्रसक्तमप्यवच्छेदकं स्वीक्रियते अत एव। भूतले घटः भूतलं घटवदित्याद्य

वत्तिप्रसक्तस्याधिघटत्वादेर्भूतलवृत्तितावच्छेदकत्वं संगच्छतइतिभावः । ननु विशि
ष्टसत्ताजातित्वस्यैवावच्छेदकत्वमस्त्वत आह व्याख्यायां लघुत्वाच्चेति । दण्डुपलक्ष्य सत्ताजाते
र्न सत्तायां गुणसामानाधिकरण्यमितिमवच्छेदकताग्राहकप्रमाणसत्वाच्चेति
द्रष्टव्यं आह सत्ताजातित्वस्यानवच्छेदकत्वेयुक्तिमाह । यत्तु एतस्याप्युक्तेः स्वयं व [illegible] माणुसे
वादेवतुष्टतयास्वजातित्वस्यानवच्छेदकत्वसाधकतर्कयोपन्यासा नोचितमितितुच्छ । तुच्छ
या अपि परोक्तयुक्तेः परमतत्वेन साधकतर्कयोपन्यासे बाधकाभावात् । केचित्तु । ननु
संयोगतद्वै विरुद्धयोः प्रतियोग्यभावयोरेकत्रवृत्तिनिर्वाहार्थमवच्छेदकस्वीकारे
स्तु साध्यसामानाधिकरण्यावच्छेदकत्वस्वीकारे किं मानमित्याशंकायामाह
विरुद्धयोरित्यादि एकधर्मावच्छिन्ने विरुद्धयोर्भावाभावयोर्वृत्तिनिर्वाहार्थमव
च्छेदकभेदापेक्षेतिसद्धेतावपि व्यभिचारिहेतुसाधारणधर्मावच्छिन्नेतियो
र्वृत्तिनिर्वाहायावश्यमवच्छेदकभेदापेक्षेति तत्र साधनतावच्छेदकमेव साध्यसं

वं धितावच्छेदकमितिभावः दूषणांतरं योग्यसंभव परोनास्तित्याति पर इत्याह॥ नह्यपतिः
नावच्छेदकभेदादवच्यात्यपतिः उपाधिः साध्यसमव्याप्यरूपमुपाधिः प्रसूतेः विरुद्धयो
रित्यत्र तत्र एकधर्म्यवृत्तित्वरूपविरुद्धत्वं वस्तुतस्तु तदित्यस्य एकधर्मिवृत्तित्वरू
पं सामान्यतअविरोधित्वमित्यर्थः दर्शयितेति प्रथमकल्पे विरुद्धयोरित्यत्रवि
वक्षणीयतयेत्यादिः द्वितीये यथाश्रुतमेव। परमार्थतस्तु इत्नित दर्शमित्येत्यस्य
इतियत्र दर्शयित्वेति पूरणसंचालितोर्थस्सम्यक्॥ एकस्य एकरूपावच्छिन्नस्य अनुमि
तिविरोधीति अनुमित्यनुत्पादप्रयोजकेत्यर्थः। नैतदिति तथाच व्यभिचारस्य
हेत्वाभासत्वानुपपत्तिरितिभावः स्वरूपतोविरोधस्येति तथाचतत्सामानाधि
करण्येन व्यभिचारग्रहस्यभिन्नविषयकस्यापिविरोधित्वमनुभवबलात्कल्पनी
यमितिभावः शाखाविशिष्टेतिशाखासामानाधिकरण्येनेत्यर्थः वृत्तित्वग्रहेपि
।तादृशवृत्तित्वात्मकव्यभिचारग्रहेपिनानुपपत्तइतिअनुभवेमानाभावेनभिन्न

राम

विषयकस्याविरोधित्वादितिभावः न व्यभिचार इतियेनानुभववलं स्यादितिभावः
। केचित्तु दीधितौ व्यभिचारेति तथा च यद्धर्मविशिष्टे साध्याभाववद्वृत्तित्वं निश्चितं ता
दृशधर्मस्य स्वसाध्यसामानाधिकरण्यावच्छेदकत्वाभावव्याप्यतया व्यभिचारज्ञा
नं तदभावव्याप्यवत्ताज्ञानमुद्रया तादृशव्याप्तिबुद्धिप्रतिप्रतिबंधकमितिभा
वः । ननु वस्तुगत्या यस्तदभावव्याप्यस्तद्वत्ताज्ञानं न प्रतिबंधकं किंतु तदभा
वव्याप्यत्वरूपेण तदभावव्याप्यवत्ताज्ञानमेव तथा च साध्यसामानाधिकरण्या
वच्छेदकत्वाभावव्याप्यत्वरूपेण वह्नित्वादेरग्रहकाले धूमाभाववद्वृत्तिर्व
ह्निरिति व्यभिचारज्ञानकाले तादृशव्याप्तिग्रहासंभवेन तद्दशायामनुमितिस्तु स्यादि
ति दुर्वारेत्यस्वरसादाहास्तु वेतीत्याहुः व्याप्यत्वासिद्धिमिति स्वसमानाधिकर
णेत्यादि विशेषणं विनैव स्यादिः । तथा च तन्मते तद्विशेषणेन निवेशेनापि ला
घवमिति भावः तुल्ययुक्त्या संभवदवच्छेदकताकत्वधर्मापेक्षया गौरव रू

पयुक्त्या आह। व्याप्यत्वासिद्धिमित्यादि। सहचरितत्वमवच्छेदकत्वाभावे न तत्रं घटत्वसह
चरितत्वघटकत्वादेरवच्छेदकत्वादत आह। तत्समनियतत्वमिति। एवं। गुरोरूपेण व्या
प्त्यभावे परार्थानुमानाभिप्रायेणाह नीलेनेति। नायं दोष इति। गुरुरूपेण व्याप्ति
सत्त्वादिति भावः दीधितौ व्याप्तिग्रह इति अनुयोग इत्यनेनान्वयः। अनुयोगस्य
क्रमेण व्याप्तिग्रहासंभवापादनं नियमहापादनं च व्याख्यायां अविशिष्टत्वादि
ति। गुरुरूपस्य मन्मते गौरवेण साध्यसामानाधिकरण्यस्यैव तन्मतेपि व्या
प्ततया अनवच्छेदकत्वेनानुयोगसंभवादिति भावः। तत्र तत्र व्याप्तिग्रहे कथायां
हेत्वोक्तप्यासे च प्रकृत व्याप्तिवादिनीतिपूरणं समान इति रतन्मते प्रकारांतर
व्याप्तिं वादिकर्तृकानुयोगस्यैव प्रकारांतरव्याप्तिवादिमते प्रकृतव्याप्तिवादिकर्तृ
कानुयोगस्यापि संभवादिति भावः अत्र हेतुमाह गुरुरूपस्येति व्याचक्रुरित्य
स्वरसोद्भावनं तद्बीजं तु अपेर्भिन्नक्रमत्वं पूरणे नयोजना क्लेशाच्च। व्यक्तिवाहुल्ये

राम

रूर

त्ति। तऔरवेत्यर्थः दीधितौ सकलगुणेति। तथा च गुणत्वस्य रूपत्वादिसमशरीर
त्वेपि संग्राहकत्वमेव विशेष इति भावः अधिकसंग्राहकत्वाशयेनाह द्रव्यादीति
व्याख्यायां सत्त्वेति तस्या द्रव्यत्वव्यभिचारित्वाद्वारणीयत्वं एवमग्रेपि विनि
गमनाविरहेणेति नच व्यक्तिबाहुल्यमेव विनिगमकमिति वाच्यं। प्रत्येकमाप
प विनिगमनाविरहे तात्पर्यात् एवमग्रेपि गौरवात् व्यक्तिबाहुल्यकृतगौरव
स्य तादवस्थ्यात् उचितमिति व्यक्तिबाहुल्यगौरवस्य साम्येपि शरीरलाघवे
न रूपत्वादेरेवावच्छेदकत्वौचित्यमित्याशयः संग्राहकलाघवस्यैव विनिग
मकत्वे तत्र प्रत्येकमापाद्यापि विनिगमनाविरह इत्याशयेनाह विनिगम
नाविरहेणेत्यादि तत्संग्राहकस्वरूपासमवेतत्वादिग्राहकस्य एतस्य गुण
समवेतत्वस्यैवेत्यनेनान्वयः गुणसमवेतत्वस्यैव गुणसमवेतत्वत्वा
वच्छिन्नस्यैव हेतुप्रवेशौचित्यादिति हेतुतावच्छेदकतावच्छेदकस्य गुणसमवेत

त्वत्वस्य रूपासमवेतत्वादि सकलहेतुतावच्छेदकसंग्राहकत्वादिति भावः। तत्संग्राह-
कस्येति। रूपादिचतुर्विंशति संग्राहकस्येत्यर्थः। इदं च गुणत्वस्यैवेत्यत्रैवान्वे-
तीति यथाश्रुतमेव वहवो वदंति अतएव संग्राहकलाघवस्य विनिगमकत्वा-
देवशब्दत्वे मेव। विनिगमकाभावेन सकलशब्दांशकयत्नावच्छेदकतया
तत्संग्राहकत्वादितिभावः। ननु कत्वादि नतु विनिगमनाविरहेण कत्वादि-
कं शक्यतावच्छेदकतावच्छेदकं इमुक्तमिति अन्यथाविनिगमनाविरहेण कत्वा-
देरवच्छेदकत्वे एतदुक्तेरसंगतेरिति। ननु शब्दत्वस्य सकलशब्दवृत्तितयात् त-
त्संग्राहकत्वं संभवति गुणसमवेतत्व रूपासमवेतत्वादीनामखंडाभावत-
या गुणसमवेतत्वत्वस्य न रूपासमवेतत्वादिसंग्राहकत्वसंभवः एवं कर्म-
त्वनिरूपणयत्नसमवेतत्वनिवेशेविनिगमनाविरहेण कर्मासमवेतत्वो-
पेपणसमवेतत्वादीनां निवेशनीयतया गुणसमवेतत्वस्य नावच्छेदकत्वसंभ

राम

वः द्रव्यसमवेतत्वसहितानां तेषामेवावच्छेदकत्वसंभवात् गुणसमवेतत्वस्य तेषां
कथमप्यसंग्राहकत्वादित्यत आह । यद्वेति भाष्यास्तु गुणसमवेतत्वे सतीत्य
स्य सत्तायास्तत्त्व्यक्तित्वावच्छिन्नभेदवत्त्वे सतीत्यर्थः अतो न विनिगमनाविरहेण
रूपासमवेतत्वादीनां हेतुप्रवेशाद्यापत्तिः । वस्तुतस्तु गुणसमवेतत्वे सति द्रव्य
समवेतत्वस्येत्यस्य द्रव्येतरासमवेतत्वे तात्पर्यमतो नोक्तदोषः अत एव ला
घवाद् द्रव्येतरासमवेतत्वस्यावच्छेदकत्वसंभवति गुणसमवेतत्वे सति द्रव्य
समवेतत्वं गौरवान्नावच्छेदकमिति चिंत्यमेतदित्यपि निरस्तमिति प्रति
भाति । तादृशव्याप्यो विरुद्धयोरेकत्र त्यादिव्याप्तेर्मानाभावादिति तत्समाना
धिकरणपदत्वसामानाधिकरण्याभावयोरेव विरोधे न तत्र द्रव्यभावसामानाधि
करणयोर्विरोधे मानाभावात् तथा च सत्तात्वावच्छेदे नैव गुणत्वद्रव्यभा
वादिसामानाधिकरणसत्वात् । गुणवान् सत्वादित्यादावतिव्याप्तिर्दुर्वारे

वेतिभावः। दीधितौ विभावनीयमिति प्रकारांतरव्याप्तिवादिमते तद्रूपत्वादिघटितत्वारवं
अभावस्यातिरिक्ततयास्वरूपत्वादीनां व्याप्यतावच्छेदकत्वसंभवेन तन्मतेन कोपिदो
षइति भावः। दीधितिकारीयेतल्लक्षणमारव्यायपक्षे चयथा न घटेति प्रसक्तमित्यादि
ग्रंथस्यसंगच्छतेतथोक्तं प्राक्। अत्र मिश्रमतानुयायिनः कारणताकार्यताप्रतियोगि
ताशक्यतादीनामिवानुभवबलादेवसाध्यसंबंधितायाअपि स्वरूपसंबंध
विशेषरूपमवच्छेदकत्वमुपेयते अन्यथाकारणतावच्छेदकत्वादेरपि विलोपा
पत्तेः एतादृशावच्छेदकत्वेच शरीरगौरवमेवबाधकं ननु व्यक्तिबाहुल्यगौरवमपिनि
रूपत्वादीनामपिनावच्छेदकत्वानुपपत्तिः नवागुणवान्सत्वादित्यादावतिव्या
प्तिः अवच्छेदसमानाधिकरणत्वेसत्यवच्छेद्यविशिष्टाधिकरणतासमव्याप्यस्व
विशिष्टाधिकरणताकत्वस्यावच्छेदकत्वव्यंजकत्वतयासत्तात्वादेस्साध्यसंबंधिता
नवच्छेदकत्वात्। एवं यथाश्रुतानतिरिक्तवृत्तित्वघटितप्रथममिश्रमतमपि

राम

यत्विस्मादिनापूर्वोक्तसम्बन्धेनउक्तरूपस्यातिरिक्तवह्नित्वरूपावछेदकत्वस्यापि व्यंज
कस्य मेयत्वे सत्वात् द्रव्यत्वाद्यावसत्वात्त्वोक्तदोषाभावात् गुरुणा वान्यत्वादित्याश
वत्ति व्याप्यभावात् न स्यलिङ्गसक्तमित्यादिमूलस्यापि निरुक्तरूपाभाववत्ताव
छेदकमित्यर्थकतया न तद्विरोधः एतेन वह्निमति धूम इति प्रतीत्या धूमत्वे वह्नि
संबंधितावछेदकत्वावगाहनेन धूमवति वह्निरिति प्रतीत्यातिप्रसक्तेऽपि वह्नित्वे धूम
संबंधितावछेदकत्वभानस्याविशेषेण सिद्ध्यायत्या साध्यसंबंधितावछेदकत्वं
स्वरूपसंबंधविशेषरूपं विवादास्पदं तया नाभ्युपगमार्हमिति नवीनोक्तिरपि
परास्ता अवछेदकताव्यंजकनिरुक्तरूपस्य धूमत्ववह्नित्वयोस्सत्वात् सत्वस्यै
वविशेषादित्यवधेयं ति। सार्वभौममतमाह। परे त्विति सार्वभौममते विशिष्ट
स्यातिरिक्ततया परं व्यंविशिष्टसत्वादित्यत्र नाव्याप्तिरित्यत आह का व्याप्यं आ
दीति आदिनास्पर्शवतद्भूतत्वमूर्तत्वोभयस्मादित्यादिपरिग्रहः। न तु लक्ष्य

ण घटरूपपदार्थ आरभ्यायेव ग्रंथविरोधपरिहरणस्यसांप्रदायिकतयाकथमवच्छेदकत्व
मआरभ्यायेवतत्परिहरणमतआह अवच्छेदकत्वमितिउल्लंघनं।पुरःस्फूर्त्तिकं विरो
धमितिशेषः तनेनान्वयः अन्योन्याश्रयात् स्थितावन्योन्याश्रयात्।नेकमपीतिनया
चलक्षणेऽसंभवइतिभावः।ननुउत्पत्तिज्ञप्त्योरन्योन्याश्रयस्यतयोरनिर्वाह एवदूष
कता बीजमुत्तरवर्त्तिनांकारणत्वासंभवात् एवं स्थितावन्योन्याश्रयस्यापिस्थित्य
निर्वाहएवदूषकतावीजंसचपूर्वोत्तरवर्त्तिनोः परस्परमवच्छेदकत्वाभ्युपगमएवभ
वति अवच्छेदकसत्त्वंविनाऽवच्छेद्यसत्वासंभवात्।ननुसमानकालीनयोःपरस्पर
मवच्छेदकत्वाभ्युपगमे।पूर्वकालेवच्छेदकसत्वस्यावच्छेद्यसत्वं प्रत्यप्रयोजकत्वा
दतआह उत्पत्तिज्ञप्त्योरिवेति एतादृशेतिसमानकालीनयोःस्थितावित्यर्थः
वस्तुतस्तुअवश्यंवेति अवच्छेदकसत्वस्यावच्छेद्यसत्वंप्रतिप्रयोजकत्वएवप्रयोजकता
स्यान्यथासिद्धत्वाघटितनियतपूर्ववर्त्तित्वात्मकतयापूर्वकालेऽवच्छेदकसत्व

राम

स्यावच्छेद्यसत्त्वेऽवच्छेद्यत्वान्न तस्य तदन्यात्मकत्वेपि अवच्छेदकसत्त्वस्यावच्छेद्यसत्त्वेऽपे
क्षणमात्रादेव सिद्धतावश्यो व्याप्यस्यान्वयव्यतिरेकाभ्यां वस्तुव्यवस्थाप्रतिबंधक
त्वाद्वेति भावः । न चैवं युगपदुत्पन्नस्पंदद्वयोः कालविधया परस्परासमिन्
परस्परावच्छेदकत्वस्य सर्वसिद्धस्यापलापप्रसंग इति वाच्यं । तस्मिन्सर्वसि
द्धत्वस्यैवासिद्धत्वात् अवच्छेद्यत्वग्रहं प्रत्यवच्छेदकत्वज्ञानस्य हेतुतया परस्प
रास्मिन् परस्परावच्छेदकत्वाभ्युपगमे ज्ञप्त्यावश्यो व्याप्ययपपर्यवसायित्वस्य
तावन्यो व्याप्यप्रसक्त्याभ्युपेत्यवाह ध्येयमिति यथाश्रुते गति अत्र वदंति दीधितिका
रमतेपि पूर्वोपदर्शितरीत्या न तत्प्रतिप्रसक्तमित्यादिग्रंथव्याख्याने तद्रूपस्य
यथाश्रुतार्थासंगतेस्तु न्यूनतया सार्वभौममतमपि सम्यंजसमेवेति मू
लेऽप्याधिनेति साध्यसामानाधिकरण्यमितिशेषः अवच्छिद्यत इत्यन्तेष व्य
तेव्याख्यायां । साधनावृत्तित्वे निजव्याप्याशयः अवच्छेद्याधिकरणासंबद्धस्यान

वच्छेदकतया साधनावृत्तेरुपाधेर्न साधननिष्ठसाध्यसामानाधिकरण्यावच्छेदकत्व
संभवः साधनेऽपाधिसामानाधिकरण्यस्योपाधिविशिष्टबुद्धिनियामकत्वाभा
वेन तस्य संबंधत्वाभावात् संबंधत्वे वा वृत्त्यनियामकत्वात् तेन संबंधेन ताद
शावच्छेदकत्वमुपाधेः संभवति। अत एवार्द्रेन्धनप्रभववह्नेरुपाधेस्तादात्म्येन
वह्निरूपसाधनसंबंधत्वेऽपि न तादृशावच्छेदकत्वं तादात्म्यस्य वृत्त्यनियामक
त्वात्। प्रागुक्तवृत्तिनियामकसंबंधेनावच्छेद्याधिकरणसंबंधस्यैवावच्छेदकत्वात्
अत एव तन्मते शाखादि वृत्तित्वमेव कपिसंयोगाद्यवच्छेदकं न तु शाखादिकं
एतत्सूचनायैव साधनासंबद्धतयेति विहाय साधनावृत्तितयेत्युक्तं विशेष राम
णतामितीति तथा च दीधितौ विशेषणतामित्यादिग्रन्थे विशेषणतामित्यस्य
साधननिष्ठसाध्यसामानाधिकरण्यावच्छेदके विशेषणतामित्यर्थः अत्रोपा
धेर्विशेषणतयावच्छेदकत्वपर्यन्तलाभाय विशेषणेनेत्याद्युक्ता विशेषणता

मित्याद्युक्तं। एवं च सोपाधौ तूपाधिनेति मूलस्य सोपाधौ विशेषण विधयोपाधिः सा
धननिष्ठसाध्यसंबंधितावच्छेदको भवतीत्यर्थः आर्द्रेंधनप्रभववह्नित्वं हि आ
धेयतया आर्द्रेंधनप्रभववह्नि विशिष्टवह्नित्वं तत्रार्द्रेंधनप्रभववह्नेर्विशेषणतया
तदवच्छेदकत्वं साध्याद्यवच्छेदकत्वं एव वृत्तिनियामकसंबंधेनावच्छेद्याधिकरण
संबद्धत्वस्य तंत्रत्वादिति भावः। वस्तुतस्तु मूलकृता पूर्वमार्द्रेंधनप्रभ
ववह्नित्वस्यावच्छेदकत्वोक्त्या तद्विरोधापत्तीधिति कृतो विशेषणतामापन्ने
नेत्याद्युक्तिरिति ध्येयं। अवच्छेदको। साधननिष्ठसाध्यसामानाधिकरण्या
वच्छेदके विशेषणतापन्नस्यापीति अपिना विशेष्यतापन्नस्यावच्छेदकता
भावसमुच्चयः न देवोपपाद्यमिति किंतु वह्न्यादित्यादिना वह्नित्वमिति आ
धेयतयार्द्रेंधनप्रभववह्निविशिष्टवह्नित्वापेक्षया लाघवादिति भावः। वि
शेषणतामित्यादि न पूरणीयं उपाधिनेत्यस्य सोपाध्यननुप्रवेशेनेति व्याख्यानं त

स्वव्योपाधेरनुप्रवेशोपपन्नेति कुत्यत्योपाध्यनुप्रविष्टधर्मेऽस्तीत्यर्थः अनुप्रवेशाद्यारो
पाधेरवच्छेदकत्वलाभायोपाध्यनुप्रविष्टेनेत्युक्तोपाध्यनुप्रवेशेनेत्युक्तं ए
वं च सोपाधावित्यादिमूलस्य सोपाधावनुपाध्यनुप्रविष्टधर्मः साधननि
निर्निष्ठसाध्यसंबंधितावच्छेदको भवतीत्यर्थ इत्याशयेनाह। तथा चेति। नर्हि वि
षयकेति येन रूपेण उपाधिता तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतानवच्छे
दकत्वमित्यर्थः। तेन प्रमेयत्वादिना प्रतीतिमादाय नासंभवः न वा सर्वासा
मुपाधिविषयतानां निवेशेन गौरवं समूहालंबनमादायातिप्रसंगो वा। एवं च नरू
द्रव्य घटनेति ध्येयं प्रथमे। वन्हेः। इतरयोस्तु। रासभार्द्रेंधनयोस्तु। आर्द्रेंधनत्वस्य
धूमवत्त्वानार्द्रेंधनादित्यत्र साधनतावच्छेदकार्द्रेंधनत्वस्य विशेष्यतयेति। उपाध्य
नुप्रविष्टं धर्ममित्यादि। विशेषणतयेति पाठेऽपि विशेष्यतयैवेत्यर्थः दर्शयितुमिति
। न च तद्दर्शनस्यैव किं प्रयोजनमिति वाच्यं। आर्द्रेंधनप्रभववह्नित्ववत्सर्वत्र किंचि

द्विशेषणविशिष्टसाधनतावच्छेदकमेवोपाध्यनुप्रविष्टधर्म इति भ्रमनिरासस्यैव तत्प्रयोज
नत्वात्। तस्य आर्द्रेन्धनत्वस्य। पृथग्युक्तिः हेतुतावच्छेदकतया रासभत्वापेक्षया भिन्नत्वे नोक्तिः
तथा चोद्धृतः शब्दः समधिकमर्थं याचष्टे इति न्यायेन पृथग्युक्त्या तल्लाभः अन्यथा रासभाद
विस्तुतैवादिपदादार्द्रेन्धनलाभे पृथग्युक्तिर्व्यर्थैव स्यादिति भावः। वस्तुतस्तु विशेषणतये
त्तिपाठे तद्ग्रंथास्फुटार्थकमेव ग्रंथस्यैवं व्याख्येयः इतरयोर्विशेषणतयानुप्रवेशोक्तेः फ
लमाह आर्द्रेन्धनत्वस्येति प्रथममित्यादि। उपाधिः घटकतया। उपाध्यनुप्रविष्टधर्मघटका
र्द्रेन्धनप्रभवत्वघटकतया। निवेशोपि। विशेषणतया निवेशोपि। विशेषणतयाताद
र्श धर्मविशेषणतया निवेशाभावमिति। उपाधेरित्यादि। दर्शयितुमिति दर्शनफलं
चेतरयोरिव सर्वत्र व्यभिचारिणि उपाधिविशेषणकधर्मस्यैव साध्यसामानाधिकर
ण्यावच्छेदकत्वमिति भ्रमनिरासः तस्य इतरयोर्विशेषणतयानुप्रवेशस्य विशेष्यतये ति
पाठेपि आर्द्रेन्धनत्वस्येति ग्रन्थास्फुटमेव तस्यैतस्यापि विशेषणतयानुप्रवेशस्यैतस्यर्थे

इति यथाश्रुतार्थमेव वदंतो वर्णयंति। नवेति वाकारस्य पूर्वेकत्वास्वरससूचकत्वाभावा
त्तह वाकार इति ननु रासभादिनिष्ठ ईंधनप्रभववह्निसामानाधिकरण्यरूपतन्निविशि
ष्टत्वस्यैवार्वच्छेदकत्वसंभवेन वैयर्थ्येन रासभत्वादेर्न निवेशो कथं मनास्यापि रासभत्वादेर्नि
वेशः एवान्नास्यासंभवादत आह रासभत्वादाविति। समानाधिकरणस्य सामानाधि
करण्यसंबंधघटिततदात्मकविशिष्टत्वस्य एतदनंतरं क्वचित्पुस्तके सामानाधिकरण्य
संबंधेनेति पाठः एवपाठोस्ति तत्र सामानाधिकरण्यान्वितं घटितत्वं तृतीयार्थः वैयर्थ्या
भावादिति। रासभत्वादेरित्यादिः सामानाधिकरण्यसंबंधेनाईंधनप्रभववह्निसामा
नाधिकरण्यस्य धूमासमानाधिकरणस्याधारण्येन तन्निवेशस्यावश्यकत्वादितिभा
वः। पंचम वैयर्थ्याभावात्। यथासंनिवेशे वैयर्थ्याभावात् सामानाधिकरण्यसंबंधेन

रासभत्वादिनिष्ठाईंधनप्रववह्निसामानाधिकरण्यस्यैव निवेशे न रासभादिनिष्ठ
ईंधनप्रभववह्निसामानाधिकरण्यस्यानिवेशेन तस्यावच्छेदकत्वासंभवात्तस्या

च्छेदकत्वे चोक्तरीत्यासंभवादिति विशेषस्यावश्यकत्वादिति भावः। उभयथापि। निवेशेऽनि-
वेशे च। नियमेति सोपाधौ त्वित्यवधारणार्थकतुशब्दबललभ्यनियमेत्यर्थः यद्वा सर्वं
वाक्यं सावधारणमिति न्यायलभ्यनियमेत्यर्थः। केचित्तु। एवकारपूरणलभ्यनिय-
मेत्यर्थः। न च सोपाधौ त्वितितुशब्दस्यावधारणार्थकस्योपाधिनेत्यनंतरं योजनये वो-
क्ता नियमलाभसंभवे एवकारपूरणं व्यर्थमिति वाच्यं। सोपाधौ त्वितितुशब्दस्य
निरूपाधावुपाधेरवच्छेदकत्वव्यवच्छेदार्थ व्याप्यभावसूचकतयातिव्याप्तिवारण-
प्रदर्शनपरत्वसूचनार्थे वकारपूरणस्यावश्यकत्वादित्याहुस्तन्न। निरूपाधावव्या-
प्यभावस्य वह्निसामानाधिकरण्यमित्यादिमूलेनैव प्रतिपादनात् निरूपाधावुपा-
धेरवच्छेदकत्वस्याप्रसक्त्या तद्व्यवच्छेदार्थ व्याप्यभावसूचकत्वस्य तुशब्देऽसंभवा-
त् अनवच्छेदकत्वे त्विति तादृशानवच्छेदकत्वेत्यर्थः अत्र चेत्यादि नेति। न्यायवद्दीधिता-
वत्र चेत्यस्य सोपाधौ त्वित्यादिग्रंथे चेत्यर्थः एतस्य च नियमेन तात्पर्यमित्याग्रिमे

भ.वा.मं.टी.

26

णान्वयः साध्येति। साधन निष्ठेत्यादिः। उपाधिपदस्योपाध्यनुप्रविष्टपरत्वाभिप्रायेण
ह उपाध्यनुप्रविष्टमिति। उपाधिवदस्य यथाश्रुतार्थाभिप्रायकत्वाभिप्रायेणाह पा
धिरिति। नियमं। नियमद्वयं। स्नेह सामानाधिकरण्येपि तिस्पर्श निष्ठेत्यादिः। शीतत्व
मिति। अत्र शीतपदं शीतस्पर्शपरं। एवमग्रेपि नोपाध्यनुप्रविष्टमिति। अत्रोपाध्य
नुप्रविष्टत्वाभावेनोपाधिभिन्नत्वमपि लब्धं अनुप्रविष्टत्वस्यैव तात्पर्ये साधारण्ये
नोपाधित्वेतदनुप्रविष्टत्वस्यापि संभवात् ततो द्वितीयनियमेपि व्यभिचारत्वाभावान्नस्य
नत्वमिति। ध्येयं। विशेषणत्वं विशेषणतामापन्नत्वं। तद्दलात्। न तीयार्थस्य तुश
क्तादिलभ्यावधारणस्य च प्रकृतस्योपाध्यावन्वयवत्त्वात्। अवच्छेदके तादृशावच्छे
दके। एवमग्रेपि। विशेषणतया विशेषणतामापन्नेन अवच्छिद्यत इति साधननिष्ठ
साध्यसामानाधिकरण्यमिति शेषः। एवमग्रेपि उपाधिरिति यथाश्रुताभिप्रायेण उ
पाध्यनुप्रविष्टं वेत्यपि बोध्यं। एवमग्रेपि केवलत्वे नैसप्रस्य स्वारस्यात्। व्यक्तीभविष्यति

राम

रुपदमेवैतत् नियमात् नियमद्वयात्। तस्य। शीतत्वस्य। विशेषणत्वेन विशेषणतापन्नतया। तत्र च सामानाधिकरण्यसंबंधेन साधननिष्ठसाध्यसामानाधिकरण्याव च्छेदके शीतान्यत्वविशिष्टस्पर्शत्वे च तादृशं। विशेषणतामापन्न। उक्त धर्मयोः शीतत्वशीतान्यत्वयोः तत्तीयावलात् अत्र धारणस्योक्ततृतीयार्थे तस्याश्च प्रकृत्यर्थो पाध्यावच्छेदकत्वेन हेतुना उपाधेरिति। उपाध्यनुप्रविष्टस्येत्यपि बोध्यं। पर्यवसितं पर्यवसितनियमद्वयं। तथा चोपाधित्वलक्ष्यनुप्रविष्टत्वयोः शीतान्यत्वेऽभावान्न व्यभि चार इति भावः। चकारः शीतान्यस्पर्शत्वेन चेति चकारः त्वर्थ इति समुच्चयार्थकत्वा संभवादिति भावः। ननु शीतान्यस्पर्शत्वस्य घटादौ साध्याव्यापकत्वात्कथमु पाधित्वमत आह। शीतान्येति। यत्तु शीतान्यस्पर्शत्वस्य तादृशान्यतरत्वावच्छि न्नसाध्यव्यापकत्वेपि साधनावच्छिन्नसाध्यव्यापकत्वरूपलक्षणाक्रान्ततया प्रकृतनियमेव तादृशोपाधित्वस्यैव प्रवेशे कथं तत्र व्यभिचारेण तादृशानियमस्वं

नमितिचिंत्यमेतदिति। तदुक्तं। स्वमतोपष्टंभकप्राभाकरमतोपष्टंभकनयात्तदीयत्व
प्रसक्तेश्चैव वक्ष्यमाणनयात्स्वमतेतादृशोपाधित्वप्रवेशासंभवात् अत एवाग्रे दीधि
तिकारोपि वक्ष्यति तत्र तादृशावच्छिन्नत्वे इदं लक्ष्यलक्षणमिति। अवच्छेदकोपाधित्वमिति।
अयोगोलकान्यत्वादेर्व्यभिचारवारणाय अवच्छेदके तितादृशावच्छेदके स्वार्थः तत्रानु
प्रविष्टत्वमिति तत्र तादृशावच्छेदकघटकत्वमित्यर्थः अयमत्र संक्षेपः इदं स्नेहवत्स्प
र्शादित्यत्र विनाप्युपाधिप्रवेशानंशीतत्वेन साध्यासमानाधिकरणतयास्वपम
नुपाधिनाकेवलेन साध्यसंबंधोवच्छिद्यत इत्येकोन्वयः निःस्नेहं स्पर्शादित्यत्र विना
प्युपाधिप्रवेशानंशीतान्यत्वेन साध्याव्यापकतयास्वपमनुपाधिनाविशेषणीभूय
साध्यसंबंधोवच्छिद्यत इति द्वितीयोन्वयः निःस्नेहं स्पर्शादित्यत्र शीतान्यस्पर्शत्वेन वो
पाधिनास्वतएव साध्यसंबंधावच्छिद्यत इति तृतीयोन्वयः एकेकान्वयेनोपाधित्वत
दनुप्रविष्टत्वघटितनिर्नियमघटेव्यभिचारप्रदर्शनेन तन्निर्नियमघटेव्यभिचारश्च

राम

दर्शनेन तत्र नियमद्वयखंडनमिति मिलित्वा नियमद्वयखंडनं । अत्र प्रथमे शीतत्वस्या
नुपाधित्वे साध्यासमानाधिकरण्यत्वमेवेति हेतुः द्वितीये शीतान्यत्वस्यानुपाधित्वे
साधनाव्यापकत्वमेवेति हेतुः शीतान्यत्वस्य साध्यसमानाधिकरण्यतया शीतत्वस्य
साधनाव्यापकतया द्वयोरनुपाधित्वे एकैकस्य हेतुत्वं न संभवतीति हेतुद्वयोपादा
नं । तत्र साध्यासमानाधिकरण्यत्वमेवेति साध्याव्यापकत्वप्रदर्शनद्वारानुपाधि
त्वे हेतुः साध्यव्यापकत्वस्योपाधित्वघटकतया तदभावस्यैव तत्प्रयुक्तत्वात् एवं च शीतान्य
त्वस्यापि साध्याव्यापकतया द्वयोरनुपाधित्वे साध्याव्यापकत्वमेवैकमेव हेतुः कुतो
नोक्तमिति वाच्यं । तस्य पृथिवीस्पर्शपर्यवसायितत्वावच्छिन्नसाध्यव्यापकत्वात् न
च तथापि शीतत्वस्यानुपाधित्वे साध्यासाध्याव्यापकत्वमेव हेतुस्तथा कुतो नोक्त
मिति वाच्यं । किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वमपि नास्तीति सर्वथा साध्याव्याप
कत्वप्रदर्शनाय साध्यासामानाधिकरण्यस्य हेतुत्वाभिधानात् अत्र विनेत्यादि

23

उपाध्यननुप्रविष्टत्वघटितनियमे व्यभिचारप्रदर्शकं स्वयमनुपाधिनेति । उपाधित्वघ
टिते तत्प्रदर्शकं स्वयमनुपाधिना केवलेनेत्युभयमपि मिलित्वा विनेत्यादिरूपया
एकं प्रथमेन स्वात्मकोपाध्यनुप्रवेशाभावस्य उक्तेनेत्यर्थकेन द्वितीयेनोपाध्यं
तरानुप्रवेशाभावस्य चोपपादनात् । एवं च केवलेनेत्यस्य न वैयर्थ्यं अत्र प्रथमो
क्तनियमद्वये आर्द्रेन्धनप्रभववह्नित्वे उपाधित्वघटितनियमे व्यभिचारेप्यनुप्रवेश
घटितनियमे व्यभिचाराभावेन तन्नियमद्वयसाधारण्येन व्यभिचारप्रदर्शनाय
तत्परित्यज्य स्पर्शीतत्वपर्यंतानुधावनं अत एव मध्यमनियमद्वयेप्यार्द्रेन्धनप्रभव
त्वं परित्यज्य स्पर्शीतान्यत्वे व्यभिचारप्रदर्शनं तृतीयनियमद्वये त्वार्द्रेन्धनप्रभववह्नि
त्वस्याधेयतया आर्द्रेन्धनप्रभववह्निविशिष्टवह्नित्वरूपत्वे आर्द्रेन्धनप्रभववह्नेर्नव्य
भिचारः आर्द्रेन्धनप्रभववह्नित्वे चानुप्रवेशघटितनियम एव व्यभिचार इति तन्नि
यमद्वयसाधारण्येन व्यभिचारप्रदर्शनाय तत्परित्यज्य स्पर्शीतान्यस्पर्शत्वपर्यंतानु

राम

धावनं। केचित्तु सर्वेसाध्यसमानाधिकरणेत्यादिग्रन्थे तत्पथ्यानुसारेण साध्य-
समानाधिकरणस्वसाधनाव्यापकस्योपाधितया आर्द्रेन्धनप्रभववह्नित्वस्यार्द्रेन्ध-
नप्रभवत्वस्य च धूमसमानाधिकरणतया साधनव्यापकतयेति दीधितिस्वा-
रस्यमपीत्याहुस्तदसत् तथा सत्यार्द्रेन्धनप्रभववह्नित्वस्याप्युपाधितयाऽतः शी-
यान्न नियमद्वये तत्रैव व्यभिचारसंभवेन तत्परित्यज्य शीतास्पर्शत्वपर्यन्ता-
नुधावनवैयर्थ्यस्य दुरुद्धरत्वात्। एतेनार्द्रेन्धनप्रभववह्नित्वे व्यभिचारसंभवे-
ऽपि पूर्वं प्रदर्शितशीतास्पर्शत्वे व्यभिचारोपपादकतयाशीतास्पर्शत्वस्योपक्षि-
प्तत्वात्तत्रैव व्यभिचारः प्रदर्शित इत्यपि परास्तं। तावता प्रदर्शितव्यभिचारस्यो-
पपादनेऽपि प्रकृतनायापादकप्रसिद्धपथि त्यागबीजस्यानुपपादनात्। अत्र शी-
तास्पर्शत्वस्य स्वात्मकोपाध्यनुप्रवेशेन साधनावच्छिन्नसाध्यव्यापकशीता-
स्पर्शरूपोपाध्यनुप्रवेशेन वानुप्रवेशघटितनियमे व्यभिचारो बोध्य इति दिक्

प्रथमनियमस्यैव प्रथमोक्तनियमद्वयस्यैव प्रकृतेति। साधनतावच्छेदकस्यानवच्छेदकत्व
स्यैव प्रकृतत्वादिति भावः। नेति प्रतानुपयोगादिति भावः प्रथमनियमेति प्रकृते।
योगीत्यादिः एवकारेतरार्थावधारणे आहेति नेतु शब्दस्यैवयथाश्रुतेपूर्वो
क्तरीत्यानुसारेन सर्वेवाक्यंसावधारणमितिन्यायेन वावधारणलाभे एव
कारापूर्वपाभावात् सङ्गतेरितिध्येयं। सांप्रदायिकैमितिपरवाक्येमावन्तोऽर्था
स्संभवंतितावत्तांद्रूपणस्यैव सांप्रदायिकत्वादितिभावः। केचित्तु अत्रनेत्यादि
दीधितिग्रंथस्योपदर्शितरीत्यान व्याख्यानं किं तु प्रकारान्तरेण तथाहि सोपाधौ
नूपाधिनासाध्यसंबंधोवच्छिद्यतइतिपयथाश्रुतं न प्रकृतोपयोगि साधनताव
च्छेदकानवच्छेदकत्वप्रतिपादनस्यैव प्रकृतोपयोगित्वात् अतः उपाधिना तु सोपाधौ
साध्यसंबंधोवच्छिद्यत इतियोजना तथा च तु शब्दस्येतरव्यवच्छेदकतया सोपाधौ
तु उपाधिनैव साध्यसंबंधोवच्छिद्यत इति नियमस्य सोपाधौ साधननिष्ठसाध्यसंबं

यम

धितावच्छेदकत्वं उपाधिविशेषणकधर्मभिन्नेन वर्न्नत इति पर्यवसितस्य लाभात्
साधनतावच्छेदकस्य लक्ष्यावच्छेदकत्वस्यावच्छेदलाभ इति केचिदर्थं घटितं तन्मतं दूष
यति। अत्र चेत्तु। उपाधिर्नैवेति। नियमेन तात्पर्यमित्यग्रेतनेनान्वयः। तात्पर्या
भावे व्यभिचारहेतुमाह इदं स्नेहवदित्यादि उपाधिर्नैवेति यथाश्रुतनियमस्या
प्यत्र व्यभिचार इति बोधनाय साध्यासमानाधिकरणतया स्वयमनुपाधिर्ने
त्युक्तं। येन वाय्वोरपि शीतस्पर्शोऽभ्युपगम्यते तन्न ये शीतत्वस्य स्नेहसामानाधि
करण्यातिरिक्तवृत्तितया स्नेहसामानाधिकरण्यावच्छेदकत्वासंभवाद्व्यभिचा
रासंमतेरालम्ब्य स्नेहं वेति अत्रापि यथाश्रुतनियमस्याप्यत्र व्यभिचार इति बो
धनाय साधनव्यापकतया स्वयमनुपाधिर्नेत्युक्तं। विशेषणीभूतस्पर्शत्वे विशेष
णीभूतः इदं च स्नेहाभावासमानाधिकरणे जलपरमाणुरूपादावपि शीतान्य
त्वसत्त्वेन शीतान्यत्वस्य साध्यावच्छेदकत्वासंभवादुक्तं। ननु शीतान्यत्वादेर्विशेषणी

भ्रूयावच्छेदककोटिप्रविष्टत्वेप्यवच्छेदकत्वपर्याप्त्यधिकरणत्वस्य नियमे विवक्षितत्वे
न तद्दोषसत्त्वान्न व्यभिचार इत्यरुचेराह शीतान्यस्पर्शत्वेनचेति। शीतान्यत्ववत्स्पर्श
त्वेनेत्यर्थः सामानाधिकरण्यं मत्वर्थः उपाधिनास्त्यत एवेति। स्वयमेवोपाधिना
नत्पाधिविशेषणकेनेत्यर्थः तत्र शीतान्यस्पर्शस्य साधनावच्छिन्नसाध्यव्यापको
पाधेः सामानाधिकरण्यरूपसंसर्गघटकतया प्रवेशोपि विशेषणत्वेनाप्रवेशा
दिति भावः विनैवेति नियमे सोपाधेः साधननिष्ठसाध्यसंबंधितावच्छेदकत्वमुपा
धिभिन्नेन वर्त्तत इति नियमे उपाधिविशेषणकधर्मकभिन्नेन वर्त्तत इति नियमे चे
त्यर्थः तात्पर्य तु यादृशस्य तात्पर्यमित्याह स्पष्टं केवलेनेत्यस्य वैयर्थ्यात्। शीतान्यत्व
वदार्द्रेधनत्वादेरवच्छेदककोटिप्रविष्टत्वेनावच्छेदकतया व्यभिचारसंभवे शी
तान्यत्वपर्यंतानुधावनवैयर्थ्यात्। येन जलेष्णस्पर्शोभ्युपगम्यते तत्र येशी
तान्यस्पर्शत्वस्य स्नेहसामानाधिकरण्यातिरिक्तवृत्तितयानवच्छेदकत्वासंभवे

राम

न तत्र व्यभिचारप्रदर्शनासंगतेश्चेत्यतिरिक्तं नतु सोपाधावितिव्याप्तिग्रन्थस्य नियम
मात्रपरत्वे तस्य सोपाधावतिव्याप्तिवारणप्रदर्शकत्वानुपपत्तिरत आह धी
धितौ परं त्विति आर्द्रेन्धनप्रभववह्नित्वस्यावच्छेदकत्वे तद्घटकतया वह्नित्व
स्यापि साधनतावच्छेदकस्यावच्छेदकत्वादाह शुद्धस्येति तथा च दृष्टव्याख्यायां किं
चिद्विशेषणस्येति। तथा च वह्नित्वस्यार्द्रेन्धनप्रभवत्वरूपविशेषणविशिष्टस्यैवाव
च्छेदकतया नतु शुद्धस्येति भावः यद्वाऽनवच्छेदकत्वमवच्छेदकतापर्याप्त्यधिकरणत्वा
भावस्तेनार्द्रेन्धनप्रभववह्नित्वघटकतया वह्नित्वस्यावच्छेदकत्वेपि न क्षतिः
ननु विशिष्टस्यानतिरिक्ततयार्द्रेन्धनप्रभववह्नित्वस्य साधनतावच्छेदकस्या
वच्छेदकतापर्याप्त्यधिकरणत्वमेवेत्यत आह शुद्धस्येति। तथा च साधनता
वच्छेदकत्वमपि पर्याप्तिघटितमेवेत्याशयेन व्याख्येयं किंचिद्विशेषणेत्यादी धि
तौ अनवच्छेदकतामात्रमित्यनेन चैतदभिप्रेत्य शुद्धसाधनतावच्छेदकेत्यधि

त्वरूपोपाधेः सामानाधिकरण्यसंबंधेनावच्छेदकत्वात्संगतिर्वाच्यं। साधनतावच्छे
दकतावच्छेदकसंबंधेनावच्छेदकताया विवक्षितत्वात् अत्र तात्पर्यमित्यनुपप
त्ते। भावप्रत्ययेन चानियम्यवच्छेदः। यतएवेत्यादि न च पूर्वं सोपाधौ साधनतावच्छे
दकातिरिक्तावच्छेदकनैयत्यस्यानुक्ता कथमुपष्टंभसंगतिरिति वाच्यं। एवं
सोपाधौ साधनतावच्छेदकस्यानवच्छेदकत्वोक्तावर्थतस्तस्यापि लाभात् व्यापका
यां साधनतेतीति इदं च नियतांतप्रतीकं। साधनतावच्छेदकातिरिक्तमिति साध
ननिष्ठसाध्यसामानाधिकरण्यावच्छेदकमिति शेषः दीधितौ अवच्छेदकं साधन
निष्ठसाध्यसामानाधिकरण्यावच्छेदकं। अतएव सोपाधौ साधनतावच्छेदकाति
रिक्तस्य साधननिष्ठसाध्यसामानाधिकरण्यावच्छेदकस्यावश्यकत्वादेव। न स
धूमवान्मेयवत्वादित्यादौ साधनतावच्छेदकातिरिक्ताप्रसिद्धिरिति वाच्यं। यादृशी
साधनतावच्छेदकता साधनतावच्छेदकनिष्ठा तादृशप्रकारताभिन्नप्रकारताश्रय

राम

तत्स्वरूपपारिभाषिकातिरिक्तत्वस्य विवक्षितत्वात् । व्याख्यायां । साध्येति । तादृशेत्यादि
एवमग्रेपि विशेष्य इति तत्त्वं सोपाधिलक्षणे तत्र साधनेति विशेषणव्याप्तिलक्षणस्याधिक
स्य निवेशादि इति बोध्यं । भवतु पष्टंभकतेति । ननु सोपाधौ तत्पाधिनेति ग्रंथेन
व्याप्तिलक्षणस्य प्रविष्टमवच्छेदकत्वं साधनतावच्छेदकस्य निरस्य सोपाधेरनुमतं वक्ष्य
माणोपाधिलक्षणे तु न तादृशावच्छेदकत्वं प्रविष्टं दीधितिकारेणस्य विशिष्टा
धिकरणे व्याप्तिपारिभाषिकानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य व्याप्तिलक्षणे
निवेशितत्वात् वक्ष्यमाणोपाधिलक्षणे चाप्यनवृत्तित्वरूपावच्छेदकत्वस्य
निवेशनीयत्वात् । तथा च कथमुपष्टंभकतेति चेन्न यथाकथंचिदवच्छेदकत्वस्य
मात्रमुपादायोपष्टंभकताया एव दीधितिकाराभिप्रेतत्वात् । व्याख्या तु दीधिति
कारेणस्वमतेनानवच्छेदिग्रंथ उपष्टंभकतया न व्याख्यातः किंतु परमते
व्याप्तिलक्षणे स्वरूपसंबंधरूपमवच्छेदकत्वं निविष्टं वक्ष्यमाणोपाधिलक्ष

रे ऽपि तद्देवानिविष्टं तन्मतताभिप्रायेणैवेत्यत्तो नोपष्टंभकत्वानुपपत्तिरित्याहुस्तच्चिं
त्यं व्याप्तिलक्षणप्रविष्टस्वरूपसंबंधरूपावच्छेदकत्वस्यातिप्रसक्तत्वसम्भवेनोप
त्वेनोपाधिलक्षणप्रविष्टस्य च तस्य हृध्वंसत्वादित्यादौ घटत्वादावतिव्याप्ति
वारणाया न्यूनवृत्तित्वसमनैयत्येन तथाप्युपष्टंभकत्वानुपपत्तेः। केचित्तु उक्ती
रीत्योपष्टंभकत्वानुपपत्त्यैव दीधितिकारेण यद्वेत्यादिनोपाधिलक्षणं प्रकारांतरे
ण आख्येयं एवं च यत्तद्वस्तु साधनतावच्छेदकं सोपाधौ न कुत्रापि साध्यसंबंधि
तावच्छेदकं अत एव साधनतावच्छेदकानवच्छिन्नसाध्यसंबंधिताघटितमुक्तोपा
धिलक्षणं वदंति प्राभाकराः अन्यथा तल्लक्षणासंभवो दित्याहात एवैता
दृशीति। मूलताप्ये दीधितिकाराभिप्रेतः यद्यपि साधनतावच्छेदके व्याप्तिलक्षणप्र
विष्टावच्छेदकत्वाभावेनैतल्लक्षणघटकः। किंतु स्वविशिष्टसाधनवत्त्वसाध्याभा
ववत्त्वतरूपपारिभाषिकानवच्छेदकत्वमेवैतल्लक्षणघटकमिति वक्ष्यते। तथाच

राम

कथमुपष्टंभकतातथापिव्याप्तिनिरूपणप्रविष्टावच्छेदकत्वाभावनियतमित्यवच्छे
दकात्वमित्युपष्टंभकसंगतिर्वोध्येतिप्राहुः साधनताव्रृत्तितयेति। उक्ताभिप्रायमेतत्
साधनत्वस्यैवेति अत्रगच्छज्जाघारूढेत्यत्रापिगजायंगच्छतीतिप्रतीत्यासामा
नाधिकरण्यस्यापिविशिष्टबुद्धिनियामकत्वेनसंबंधत्वंगजाघारूढेनसा
मानाधिकरण्यतइतिप्रतीत्यावृत्तिनियामकत्वंचसंभवतीतिनतेनसंबंधेनसाधन
वृत्तित्वानुपपत्तिरित्याशयः मतत्वादेरितिसाधननिष्ठत्वाविशेषिनसाध्यसा
मानाधिकरण्यानतिप्रसक्तत्वोक्तावार्द्धेन्धनप्रभववन्हेरूपाधित्वंस्वरूपप
मितितत्परित्यागः। वस्तुतस्तुसाधननिष्ठत्वानुपादानेमहानसत्वादाव
तिप्रसंगेनतदुपादानेवानतिप्रसक्तत्वंवाच्यमिति वन्ह्यादिनिष्ठधूमादिसा
मानाधिकरण्याभाववत्तालोकादिवृत्तित्वात्तत्राप्युपाधित्वानुपपत्तिर्द्दष्टव्या
इतिध्येयावन्हेनवृत्तित्वमितिअत्रस्वरूपावच्छेदकत्वनिवेशेउपाधेः सामाना

धिकरणपसंबंधेनतत्वेमानाभावेनतत्रासंभवः तत्वेवाकंचुश्रीवादिमतत्वाघुपाध्यायव्या
प्तिः। भिन्नेनेत्यंतस्यतद्दनवच्छिन्नार्थकत्वेनैवसामंजस्येततत्रेत्यादेर्वैयर्थ्यंचेतितत्
स्यादि त्यागः व्याख्यायां। इत्थमपिव्यापकत्वोक्तावपिअतिव्याप्तिरितिद्रव्यंजन्य
त्वादित्यादौस्पर्शवत्वेऽव्याप्यवृत्त्यापाव्याप्तिरितिसाधनानिष्ठत्वोपादानस्यावश्य
कत्वादितिभावः यदधिकरणंतदभाववेत्ति यदधिकरणावच्छेदेनेत्यर्थः यदधि
करणे अवच्छेदकतासंबंधेनेतियावत् तथाचयद्यधिकरणेऽवच्छेदकतासंबंधेन
साधनेसाध्यसामानाधिकरण्यंतदधिकरणेऽवच्छेदकतासंबंधेनोपाधिसामाना
करण्यंभिन्निपर्यवसितोर्थः। पदेपिपदावच्छेदेनापि पर्यवसितेतिलाघवादि राम
स्यादिः। निरूक्तेतीति। अत्रव्यापकत्वंप्रतियोगितेयधिकरण्याघटितमेवउपा
ध्यभावस्यकालिकादिसंबंधेनसाधनवन्निष्ठत्वमादाया व्याप्तिस्तुयंवतन्न
द्व्यणुकादिरेवधारणीयाएतेनात्रकालोविभुत्वादित्यादौयद्धाकालनिरूपितावि

शेषस्तु तथाद्युपाधेरुपाधित्वसंपन्नये निरुक्तसाधनव्यापकाधिकरणताकत्वमेवोचित
मन्यथा तादृशसंबंधेन प्रतियोगिवैयधिकरण्याप्रसिद्ध्या तत्राव्याप्त्युपपत्तेरितिचिं
तनीयमेतदिति निरस्तं। साधनतावच्छेदकावच्छिन्नस्यस्य साधनपदार्थत्वेनाभिमत
स्येतिशेषः। साधनव्यापकतयेति साधनतावच्छिन्नसाध्यव्यापकत्वसंभवेन साध्य
व्यापकतापरित्यागः एतन्मतएव। एतल्लक्षणवादिमतएवइति एतद्विशेषणात्
उभयोपादानं प्रकृतेवतन्मतएव सार्थक्यमित्याह। यद्वेति यथाश्रुते। तत्र साध्य
नेविशेषणमपि। स्वस्य यथाश्रुतार्थे घटकत्वं समभ्यर्थं विहाय वह्निव्यापकार्थक
रणबीजं दर्शयितुमिदमभिहितमितिभावः। रहस्यमेवोपपादयति विशेषण
त्वंतीत्यादिनातन्त्रेति। व्यावर्त्तकत्वं चेत्यर्थः आश्रयतयासामानाधिकरण्येनवेति।
अत्राद्यं भेदानुमापकसंग्राहकं। द्वितीयमसंतताभावानुमापकसंग्राहकमि
तिविवेकः। अनुपदमेवेतद्व्यक्तं। अतएव शीतस्पर्शान्यत्वस्योपाधितापत्तेरेव। मि

35

व्याख्यानमिति। तत्र सोपाधौ तूपाधिर्नेत्यस्योपाधिसहितं साधनतावच्छेदकं साध्य
संबंधितावच्छेदकमित्यर्थः अत एव साधनतावच्छेदकेत्यादेः यत एवोपाधिसहितं
साधनतावच्छेदकं साध्यसंबंधितावच्छेदकं नियतमवच्छेदकं अत एवोपाधिविशिष्ट
साधनतावच्छेदके विशिष्टेऽवच्छेदकत्वं तत्र विशेष्यं साधनतावच्छेदकं शम ह। यद्विशेष
णं साधने उपाधिरित्यर्थः इत्याकारकं दूषणमेवाह शीतेत्यादिना। व्यावृत्तत्वादिति
। अयमाशयः यत्तु येन संबंधेन यद्वत्सामान्यनिष्ठ यत्संबंधावच्छिन्नप्रतियोगि
ताकाभावप्रतियोगित्वरूपमव्याप्तत्वं तत्संबंधावच्छिन्नविशेषणत्वं अति
प्रसंगसंपादकं द्विविधाविशेषणत्वं रक्षितुं संपादयितुं इदं। उभयोपादानं तथा
च यथाश्रुतार्थे प्रतियोगिताक तदभावानुमितौ तत्संबंधावच्छिन्नसाधनत्वरूप
तद्व्यावर्तकत्वं वद्वृत्तीति व्याप्तिः प्रकृते स्वरूपान्यत्वाविशिष्टसत्तायाः समवायि
त्वरूपवृत्तित्वविशिष्टसत्तावन्निष्ठसमवायावच्छिन्नप्रतियोगिताकाभावप्रतियो

रामः

गित्वरूपतद्व्याप्यत्ववत्तया समवायावच्छिन्नप्रतियोगिताकरूपवत्त्वविशिष्टसत्ता
भावानुमितौ समवायावच्छिन्नसाधनत्वरूपतद्व्यापकत्ववत्तया सामानाधि
करण्येन तद्व्यापकत्ववत्त्वरूपान्यत्वे विशेषणतामात्रयोक्तरीत्या सामा
नाधिकरण्येन तत्सत्त्वान्न व्याप्तिरिति। एतेन सत्ताघटैक्ये न विशिष्टस्या
नतिरिक्तत्वात्कथं व्याप्यत्वं एवमतिव्याप्तिसंपादकतद्व्यापकत्वस्यै
व वक्तुमुचितत्वाद्व्याप्यत्वाभिधानमनुपपन्नं एवं सत्ताया अभेदे तद्रूपान्य
त्वस्य भेदानुमापकत्वरूपव्यापकत्वासंभव इत्याशंकाया अनवकाशः
सत्ताघटैक्येऽपि विशिष्टस्यातिरिक्तत्वेऽपि निरुक्तव्याप्यत्वस्य तत्र सत्त्वात्त
द्व्यापकत्वोपपादकत्वेनैव व्याप्यत्वस्योक्तत्वाच्च व्यापकत्वस्य भेदानु
मापकत्वं नाभावानुमापकोभयसाधारणपात्तु अभेदे तद्रूपान्यत्वस्यैव प्रकृ
तत्वेऽपि तद्विशिष्टसत्ताघटयोस्तत्तया साधने सामानाधिकरण्येन व्यापकत्वप्र

त्तिपत्वर्थं चोक्तमिति ध्येयं। पञ्चम्याश्रुते तु व्यावर्त्तकत्वमात्ररूपे स्यार्थः। तत्र शीतस्पर्शा
न्यत्वरूपान्यत्वयोः साध्याभावविशिष्टात्साधनात्। स्नेहविशिष्टात्स्पर्शात् न
शीतस्पर्शादित्यादिवत्। व्यावर्त्तकत्वस्य सत्वादिति। तादात्म्येन शीतस्पर्शवद्भि
न्न विशेषणताविशेषावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वरूपशीतस्पर्श
त्वादृशत्वस्य शीतस्पर्शान्यत्वे सत्वेन तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताक
शीतस्पर्शाभावरूपशीतस्पर्शभेदानुपपत्तेर्विशेषणताविशेषसंबन्धावच्छिन्न
साधनत्वरूपतद्व्यावर्त्तकत्वस्य सत्वादिति भावः। तत्र शीतस्पर्शान्यत्वे। एवं
सत्वादित्यत्र रूपान्यत्वस्याश्रयतया द्रव्यत्वविशिष्टसत्तायां द्रव्यत्वाभाववि
शिष्टसत्तातो व्यावर्त्तकत्वासत्वान्न्यपरित्यागः सामानाधिकरण्येनेतीति।
तथाच निःस्नेहस्पर्शादित्यत्र शीतस्पर्शान्यत्वस्य सामानाधिकरण्येन शीत
स्पर्शलिङ्गत्वाद्यवच्छिन्नसत्वात् द्रव्यसत्वादित्यादौ रूपान्यत्वादेः सामानाधिकरण्येन

राम

गुणत्वरसत्वादावपि सत्वात् प्रोक्तरीत्या सामानाधिकरण्येन तद्व्यावर्तकत्वमिति
तद्युक्तमस्य इति भावः तद्व्यावर्तकं हि । तद्व्यावर्तकत्वं हि । तद्वद्वृत्त्येव भवति तद्वद्वृत्ति
त्वस्य मतिप्रयतं भवति । अयमाशयः तद्व्यावर्तकत्वं हि तदभावानुमाप्यकत्वं तच्च
तदभावप्रमानुमितिजननयोग्यत्वं धूमवान्वह्नेरित्यादौ व्यभिचारमेलधूमा
भाववद्विशिष्टवह्न्यभावं प्रमानुमितिजनकत्वस्यात्वादावपि प्रसंग इति प्रमात्वो
पादानं तत्र तदभावव्याप्यत्वपर्यवसन्नं तच्च तदभावाभाववदवृत्तित्वं तदभावा
भाववद्यत्तद्वृत्तेवेति रीत्या समनैयत्यं इति नियमेन पत्यादित्यर्थः एतस्य च व्य
भिचारित्वेनान्वयः साध्याभाववद्विशिष्टसाधनासामानाधिकरण्यं । तादृश
साधनासामानाधिकरण्यमपि । तादृशसाधनवदवृत्तित्वमपीति यावत् । व्य
भिचारित्वेन च तेन संबंधेनेत्यादिनाऽसामानाधिकरण्येन तादृशसाधनव्या
वर्तकत्वस्य सामानाधिकरण्येन तादृशसाधनवदवृत्तित्वसमनैयत्योक्त्या तादृश

साधनसामानाधिकरण्यसामानाधिकरण्यत्वाभेपितनादृशसाधनासामानाधि
करण्यत्वाभइति चेन्न। तेनसंबंधेन तद्धर्मवृत्त्येवेत्यत्र तेनसंबंधेनेति संयुग्याका
रत्निरवनेन सामानाधिकरण्यसंबंधेन तद्व्यावर्तकत्वस्य तत्संबंधघटकसंबं
धेन तद्धर्मवृत्तित्वसमनैयत्यस्याप्युक्त्या तल्लाभसंभवात् साधनस्यापितादृ
शसाधनसमानाधिकरणत्वेन तादृशसाधनसमानाधिकरणसामानाधि
करण्यस्यापितादृशासाधनासामानाधिकरण्यपर्यवसानसंभवाच्च। यद्वासा
मानाधिकरण्यसंबंधेन तद्व्यावर्तकत्वस्य तेनसंबंधेन तद्धर्मवृत्तित्वसमनैयत्यो
क्तेरुपलक्षणतया तुल्ययुक्त्या तद्घटकसंबंधेन तद्धर्मवृत्तित्वसमनैयत्यस्याप्य राम
र्थतो लाभः। अथवा तत्समनैयत्ये तु तरां न समनियतसमनैयत्यमिति
सामानाधिकरण्येन तद्व्यावर्तकत्वेन तत्संबंधेन तद्धर्मवृत्तित्वसमनैयत्येन तद्घ
टकसंबंधेन तद्धर्मवृत्तिसमनैयत्यस्याप्यर्थतो लाभः। वस्तुतस्तु सामानाधिकरण्य

नव्यावर्त्तकत्वमेकाधिकरणं तर्भावेन आवर्त्तकत्वं साध्यविशिष्टसाधनाधिकरणे साध्या
भाववद्विशिष्टसाधनाभावानुमापकत्वमिति यावत् एवं च तेन संबंधेनेत्यादिना ता
दृशसाधनासामानाधिकरण्यलाभः स्वरसत एव संगच्छते । न च तथापि तेन नेत्यादावे
कधेवसंबंधनिवेशात् । साधनतावच्छेदकसंबंधेन तादृशसाधनवत्तिउपाधिना घटसं
बंधेनावृत्तित्वरूपस्य विवक्षणीयस्य तादृशसाधनासामानाधिकरण्यस्य कथं ला
भ इति वाच्यं । तेन संबंधेनेत्यस्य व्यावृत्तिघटकाभावं व्यावर्त्तकत्वे च एवतद्धत्वे वृत्तित्वे चा
न्वयस्याभिप्रेतत्वेन तल्लाभसंभवात् । तथैव समर्थनेपत्यसंभवेन द्विधा निवेशस्या
वश्यकत्वात् । न च तथापि तादृशसाधनाभावप्रभावप्रयानुमितिजननयोग्यतायां
तादृशसाधनाभावव्याप्यत्वस्यैव साध्यविशिष्टसाधनवदवृत्तित्वरूपपक्षधर्मताया
अपि निवेशेन कथमुक्तरीत्या साध्याभावविशिष्टसाधनवदवृत्तित्वमात्रलाभ इति वाच्यं
। एतन्मते साधनावच्छिन्नसाध्यव्यापकस्यैवोपाधितया साधनसमानाधिकरणेपा

धोसाध्याभाव विशिष्टसाधनवद्वृत्तित्वरूपत्ताहशसाध्याभावव्याप्यत्वाक्रांतेसाध्यविशि
ष्टसाधनवद्वृत्तित्वरूपपक्षधर्मताया आवश्यकतयाताहशपक्षधर्मत्वाभावासंभवेन
ताहृशयोगपत्तायांताहृशपक्षधर्मतायानिवेशप्रयोजनाभावादितिसूधीभिः सूक्ष्म
दृशासर्वमवधातव्यमितिदिक्। व्यर्थमितितत्समनैयत्येनलघुभूततन्निवेशेनै
वोपपत्तौव्यावर्त्तकत्वनिवेशस्यव्यर्थत्वादितिभावः। ननुताहृशानुमित्युपधायकत्वं
रूपव्यावर्त्तकत्वस्यतत्समनैयत्येनताहृशव्यावर्त्तकत्वनिवेशेनमावश्यकमेवेत्य
तआह अव्याप्तिकरमितिफलोपधानुघटितव्यावर्त्तकत्वस्यसर्वत्रासंभवादितिभा
वः। क्वचित्पुस्तकेतद्धद्वृत्त्वेवेत्यत्रतद्वृत्त्येवेतिसांप्रदायिकः पाठोस्ति। तत्रायमाशयः राम
तेनसंबंधेनेत्यस्यसामानाधिकरण्येनेत्यर्थः। तद्व्यावर्त्तकत्वंहि तद्धेत्वनुमापकत्वं
तद्धेत्वभावव्याप्यत्वंतत्तद्धेत्वभाववद्वृत्तित्वंतद्वृत्तित्वपर्यवसितं। सामानाधि
करण्येनतद्वृत्तित्वंचतत्सामानाधिकरण्यपर्यवसन्नमितिसाध्याभावविशिष्ट

साधनासामानाधिकरण्यलाभः शेषमुक्तरीत्यावोध्यं तेनेत्यादि वह्न्यभाववद्धोवायोलसाध्याभा
वेत्यादि। निरुक्तेति साधनतावच्छेदकविशिष्टेत्यर्थः। एवमग्रेपि। साधनव्यापकतावच्छेदकर
त्ते। अत्र द्रव्यं सत्वादित्यादौ द्रव्यत्वाभावविशिष्टसत्तायाअव्यापके जातित्वादिना द्रव्य
त्वविशिष्टसत्ताव्यापके घटत्वाद्यावत्तिव्याप्तिरिति साधनव्यापके तादृशाभावप्रतियोगि
त्वं परित्यज्यावच्छेदकपर्यंतानुधावनं। उपाधितावच्छेदकेति साध्यविशिष्टसाधनव्या
पकतावच्छेदकेत्यर्थः एवमग्रेपि वृत्तेरिति धूमाभावविशिष्टवन्ह्यादिमत्ययोगोलका
द्यवच्छिकालिकादिसंबंधेनार्द्रेंधनप्रभववन्ह्यादेर्वृत्त्या तत्राव्याप्त्यापत्त्योपाधितावच्छेदक
संबंधेन वृत्तेर्विवक्षणीयत्वादिति भावः। केचित्तु उपाधितावच्छेदकसंबंधे साध्याभावविशि
ष्टसाधनवदनुयोगिकत्वप्रतियोगिकत्वोभयाभावस्तत्त्वं विवक्षितं तेनोक्तस्थ
ले सत्तादिना व्याप्तिरित्याहुः। साध्याभावेति साध्यविशिष्टसाधने सामानाधिकरण्येन
साध्याभावविशिष्टसाधनभेदस्य सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिता

भवानं.टी. ३४

कनिरुक्तसाधनाभावस्य व्याप्यमानुमितिजनकत्वरूपव्यावर्तकत्वे त्वर्थः व्यावर्तकत्वा
संभवादिति तादृशाभेदप्रमानुमितेरप्रसिद्धेरिति भावः वस्तुतस्तु विरोधिरूपत्वं हि
व्यावर्तकत्वमित्यादिग्रन्थो व्यावर्तकत्वं भेदानुमापकत्वमेवेत्यभिप्रायक एवं तच्च सा
दृश्यात्संबंधेन तद्दृश्येन चेति द्विविधमित्याह । आश्रयतया सामानाधिकरण्येन वेति
विशिष्टस्यातिरिक्ततया सत्ताभेदाभावेन रूपान्यत्वस्य सामानाधिकरण्येन भेदा
नुव्यापकत्वासंभवादाह रूपान्यत्वविशिष्टसत्ताया इति । रूपान्यत्वसमानाधिकरण
सत्ताया इत्यर्थः व्यावर्तत्वात् भिन्नतायाः । इत्यभिप्रायकमिति तथा च विशिष्टस्यातिरिक्त
तया सत्ताभेदाभिप्रायेण विशिष्टसत्तायाः शुद्धसत्तायाश्च अनतिरेकेपि विरुद्धधर्मद्वय
वैशिष्ट्यावच्छिन्नसत्तयोर्भेद इति प्राचीनमतानुसारेण वेदमिति भावः । लक्ष्यमिति सा
मानाधिकरण्येन तद्व्यावर्तकत्वे तेन तद्भेदानुमापकत्वं तच्च तेन तद्भेदव्याप्यत्वं तच्च त
द्भेदाभावासामानाधिकरण्यं तच्च तद्सामानाधिकरण्यमेवेत्याशयः अव्याप्तिकरं चेति

राम

वस्तुतो विशिष्टस्यानतिरिक्ततया उक्तप्राचीनमतस्याप्रयोजकतया च सत्ता या अभेदेन
एवं चेत्यादिना दीधितिकृता व्याप्तिकरं चेत्यर्थः तद्धेतुव्याप्यत्वं नान्वयव्याप्तिरूपं किंतु त
द्धेत्वभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिरूपं भेदानुमितौ व्यति
रेकव्याप्तेर्गमकत्वस्योक्तत्वात् एवं च सामानाधिकरण्येन तद्धेत्वभावव्यापकीभूता
भावप्रतियोगित्वस्य सामानाधिकरण्यघटकोपाधिताघटकसंबंधेन तद्व्यापकी
भूताभावप्रतियोगित्वसमनियतत्वेन तन्मात्रे सैव सामंजस्ये उक्तरीत्या अधिकं व्य
र्थमित्याशयेनाह साध्याभावविशिष्टेत्यादि। यथाश्रुतत्यागे। सामानाधिकरण्ये
न भेदानुमापकत्वरूपसामानाधिकरण्येनावच्छिन्नकत्वस्यागवी जं अव्याप्तिकरं
चेत्यादिना पूर्वसूचितं बीजं अभेदेनेति विशिष्टस्यातिरिक्तत्वे उक्तप्राचीनमते
वृमान्वाभावादिति भावः। एतदनुसारेण न्यायप्रसिद्धसुधीभिरूह्यमिति दिक्। परमा क्र २
र्थतस्तु आश्रयतयेति। साधने साधनांतरभेदानुमापकत्वेनेत्यर्थः सामानाधि

करण्येन। साधनाधिकरणे साधनाधिकरणं तद्भेदानुमापकत्वेन न तु सत्तायाः अभे
देन आश्रयतया व्यावर्तकत्वस्यैवाऽधिकरणभेदाभावेन सामानाधिकरण्येन व्यावर्तकत्व
मपि रूपान्यत्वेन संभवतीति कथं तत्राऽतिव्याप्तिरत आह। रूपान्यत्वेति। इत्थं व्या
वृत्तत्वात्। चित्ररूपस्यैकत्वात्। भिन्नाधिकरणकत्वादिति यावत्। तथा च सत्ताया अभे
देपि तद्धर्मावच्छिन्ननिरूपिताधिकरणतायाः भेदेन विभिन्नाधिकरणकत्वसंभवेन
रूपान्यत्वे निरुक्तसामानाधिकरण्येन व्यावर्तकत्वसंभवादतिव्याप्तिः संभवत्येवेति
भावः। यथाश्रुतेति। आश्रयतया व्यावर्तकत्वेत्यर्थः। बीजांतरं। तेन शीतस्पर्शान्य
त्वप्रसंगवारणरूपबीजस्योक्तत्वेपि नासंगतिः। शेषमुक्तदिशा बोध्यमिति संक्षे
पः। द्रव्यत्वमिति सद्धेतौ साध्याभाववद्विशिष्टसाधनाप्रसिद्ध्या साध्यविशिष्टसाधन
व्यापकस्य साध्यसामग्र्या निरुक्तविशेषणत्वाभावादेव वारणमिति भावः। इधि
त्वाभाव इति। परमाणोरधित्वस्वीकारे तुल्ययुक्त्या द्व्यणुकत्वस्यापि स्वीकरणीयतया

राम

सांकर्यापत्तेरिति द्रव्यत्वसाध्याभावाप्रसक्तेः परमाणत्वेनानंगीकारादिति भावः आह कल्पां
तरमाह। इत्यनन्तरमेव। निरुक्तव्याप्तिलक्षणार्थकोत्तरदलादेव। सद्धेतुनिरासः सद्धेतुस्थ
ले पूर्वदलाक्रान्तसाध्यसामान्याद्यरूपाधितत्व निरासः। तद्दलस्य विशेषणमित्यं
तोत्तरदलस्य सद्धेतुसाधारण्यतया। सद्धेतुस्थले साध्यसामान्यादिसाधारण्यत
या व्याख्यातत्वात्। व्याख्यास्यमानत्वात् व्याख्यास्यमानोत्तरदलस्य तत्साधारण्या
दिति यावत्। अनवच्छेदकान्तेति साधनतावच्छेदकसाध्यसंबंधितावच्छेदकत्वार्थ
कादी स्पर्शः दलेनैव। पूर्वदलेनैव तद्वारणं सद्धेतौ साध्यसामान्यादिवारणं। आ
र्द्रेन्धनप्रभववह्नित्वादेरपि क्वचित्साधनतावच्छेदकत्वात्तदाश्रयेऽव्याप्तिरत आ
ह। दीधितौ उक्तेति। अनवच्छेद्येति संबंधाकांक्षावधारणमिति न्यायेन मूले सा
धनतावच्छेदकभिन्नावच्छेद्यत्वं लभ्यं तत्र च विशेष्यांशे पर्यं साधनतावच्छेदक
भिन्नेतरत्वं साधनतावच्छेदकमेवेति प्रकृतार्थलाभ इत्याशयः। धूमत्वावच्छे

भवानं॰ दी॰

60

घा लोकादिनिष्ठसाध्यसंबंधितायाः वक्ष्यमाणावच्छेदकत्वस्य साध्यसामग्र्या दोस
त्वादतिप्रसंग नादरवस्यमत आह प्रकृतसाधननिष्ठेति। तथा च तत्र तादृशसा
ध्यसंबंधिताया अप्रसिद्धेव नातिप्रसंग इति भावः। एतेनेति। वक्ष्यमाणावाध
काद्दाह अनवच्छेदकत्वं चेति। वृत्तित्वपेत्ति। तृतीयाथोऽभेदः। एवमग्रेपि। व्याख्यायां
सएव दोष इति। गुरुधर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तायाः साध्यत्वाभाववद्गुणा
दिवृत्तित्वादिति भावः। न च साध्याभाववद्वृत्तितानवच्छेदकत्वमेव साधनतावच्छेदकस्या
नवच्छेदकत्वमास्त्विति वाच्यं विशिष्टस्यैव विशिष्टवृत्तित्वस्याप्यनतिरिक्तत्वात्तद्वि
शिष्टस्य साध्याभाववद्वृत्तित्वेतस्य साध्याभाववद्वृत्तितानवच्छेदकत्वासंभवेन तद्दो
षतादवस्थ्यात्। आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वाभावेनाधारतानिरूपक राम
त्वावच्छेदकस्यैवाधेयतावच्छेदकत्वनियमाभावात् सत्तात्वमपेक्ष्य गुरुतया विशिष्ट
सत्तात्वस्य गुणादिवृत्तितानवच्छेदकत्वे गुरुधर्मावच्छिन्नहेतुकोपाधावव्याप्यापत्तेः। पा

रिभाषिकावच्छेदकत्वनिवेशेऽच गौरवात् तद्दोषतादवस्थ्याच्च। न च साध्याभाववद्वृत्ति
त्त्याधारतानिरूपकतावच्छेदकत्वमेव साधनतावच्छेदकस्यानवच्छेदकत्वमास्ता
मिति वाच्यं। साध्याभाववत्तन्निविशिष्टसाधनवत्त्वे नेत्यनेनैतस्यैव वक्तुमशक्य
त्वात्। अत्र च एतादृशानवच्छेदकत्वविवक्षणे च विशिष्टनिरूपिताधिकरणता। वि

पि ४

शिष्टसत्तावत्त्वं। ननु विशिष्टस्यानतिरिक्ततया कथं न विशिष्टसत्तावत्त्वं गुणादावु
त इत्याह। इदं चेति इदं तु विशिष्टेति। दण्डावच्छिन्नेत्यर्थः एवमग्रेऽपि। विशिष्टस्य। स्वातंत्र्ये
ण सत्तायामविशेषणीभूयैवेति यावत्। अप्रकारत्वात् प्रकारत्वानुभवात्
तादृशधीविषयस्योपदर्शितरीत्यैव संभवादिति भावः। अनुभवे विवादस्तु
। अत एवेति गुणकर्मान्यत्वस्य परंपरासंबंधेनाप्रकारतादेव। समवायेन साध्य
त्वं समवायेन साध्यतायामसद्धेतुत्वं। तत्र तत्रोक्तेसिद्धांतलक्षणे प्रतियो
गितावच्छेदकविशिष्टप्रतियोगिवैयधिकरण्यघटितघटकप्रतियोगितावच्छेदक

विशिष्टेत्यादेः व्यावृत्तिप्रदर्शनावसरेउक्तं। एतस्य देहलीदीपकन्यायेन साध्यत्वं प्रतिपा
दनं चेत्युभयत्रान्वयः अत एव मध्ये निवेशः तदभावस्य। विशिष्टसत्ताभावस्याप्र
तिपादनं च गुणत्वे प्रतिपादनं चेद् इतरथा। मदुक्त प्रकारानुसरणे गुणकर्मा
न्यत्वस्य परंपरासंबंधेन प्रकारत्वे। दुर्घटं स्यादिति। मदुक्त प्रकारानुसरणे समवा
येन तत्त्वस्य साध्यतायां मम हेतुत्वस्य गुणत्वे तदभावस्य वासंभवात्। परंपरा
संबंधेन साध्यत्वे च तेन संबंधेन गुणकर्मान्यत्व साध्यत्वस्य तेन संबंधेन तद
भावप्रदर्शनस्यैवोचितत्वात् प्रतियोगितावच्छेदक विशिष्टत्वस्य विलक्षणे व्यापि
काभि। विरहे इत्यत्र दर्शनस्यानुपयुक्तत्वापातात् इति भावः अत्र वदंति। विशिष्टस्या
नतिरिक्ततया शुद्धसत्तासमवायस्य गुणत्वेसत्वेपि न विशिष्टसत्ताप्रतियोगि
कत्वमित्यसंगतं भूतलेपुरुषसत्वेपि पुरुषेदंडवैशिष्ट्यासंभवेन भूतलेपुरुष
संयोगस्य विशिष्टपुरुषप्रतियोगिकतासंभवेपि गुणत्वे सत्तासत्वे सत्तायां गुण

राम

कर्म्मात्वत्ववैशिष्ट्यासंभवस्यासंभवेन गुणत्वे सत्तासमवायस्य विशिष्टसत्ताप्र
तियोगिकत्वाभावस्यासंभवात् । सत्तायां सामानाधिकरण्यसंबंधेन गुणकर्म्मा
त्वस्य सर्वदा सत्त्वात् । न च समवायानुयोगि निर्गुणत्वे गुणकर्म्मात्वा
भावात् समवायस्य विशिष्टाप्रतियोगिकत्वमिति वाच्यं । संयोगानुयोगि
नि भूतले दंडविशिष्टपुरुषसत्त्वेपि दंडाभावात् संयोगस्य विशिष्टाप्रतियो
गिकत्वापत्तेः तस्माद्विशिष्टाधिकरणतातिरिक्तैवोपेयते इति तत्र भवन्मतेपि
विशिष्टस्यानतिरिक्ततया त्वदीयविशेषणसत्त्वस्य विशिष्टाधिकरणतानियाम
कत्वासंभवेन गुणत्वे विशिष्टाधिकरणत्वाभावासंभवस्य तुल्यत्वात् । न च म
न्मते यत्र वैशिष्ट्यस्य संयोगादिरूपत्वं तत्र वैशिष्ट्यानुयोगिनि विशेषणस
त्वं विशिष्टाधिकरणतानियामकं तस्य सामानाधिकरण्यरूपत्वे तच्छेदकवि
शेषणसंबंधानुयोगिनि विशेषणसत्त्वं तन्नियामकमित्यभ्युपगमात् न

५२

दोषः यत्र यत्र येन संबंधेन यद्धर्मावच्छिन्नत्वमनुभवसिद्धं तत्र तत्र तत्संबंधावच्छिन्न
तद्धर्मावच्छिन्नाधिकरणतायाः फलबलादभ्युपगमान्न दोष इति वाच्यं अतिरि
क्तविशिष्टाधिकरणतानियामकस्यैव संबंधो विशिष्टप्रतियोगिकतायां नियाम
कत्वाभ्युपगमेनैवोपपत्तावतिरिक्तविशिष्टाधिकरणतास्वीकारस्य निरर्थकत्वा
त्। त्वन्मते तादृशाधिकरणतासंबंधेन सत्तायाः साध्यत्व एव जात्यादेरसद्धेतुत्व
स्य गुणादौ तेन संबंधेन सत्ताभावस्यैव संभवेन विशिष्टसत्ताया विशिष्टस
त्तात्वेन समवायेन साध्यतायां जात्यादेरसद्धेतुत्वस्य गुणादौ समवायेन
विशिष्टसत्तात्वेन तदभावप्रतिपादनस्य च तत्र तत्रोक्तस्यासंगत्यापत्तेश्च किं च
त्वन्मते गुणादौ विशिष्टसत्तात्वावच्छिन्नाभावप्रतीतेरनुभवसिद्धाया अनु
पपत्तिः तादृशाधिकरणतासंबंधेन प्रतियोगितायां सत्तात्वावच्छिन्नाभावप्रतीते
रनुभवसिद्धाया अनुपपत्तिः तादृशाधिकरणतासंबंधेन प्रतियोगितायां सत्तात्व

राम

स्यैवावच्छेदकत्वेन विशिष्टसत्तात्वस्य गौरवेण नावच्छेदकत्वात् तस्माद्विशिष्टप्रति
योगिकसंबंधश्च विशिष्टाधिकरणता केचित्तु विशिष्टप्रमानियामकत्वमेव सं
बंधत्वं तथा च समवायेन गुणे विशिष्टधर्मावच्छिन्नसत्ताप्रमाविरहेपि सम
वायमात्रस्यैव गुणे विशिष्टधर्मावच्छिन्नसत्तासंबंधत्वं नास्तीति गुणे स
मवायेन विशिष्टसत्तावत्ताभावोपपादनसंभवेऽतिरिक्तविशिष्टाधिकरणतायां
मानाभावदित्याहुस्तस्याप्यत्रैव पर्यवसानं विशिष्टाधिकरणता अतिरिक्तेति
प्रवादोपि तस्याः स्वरूपविशेषाधिकरणतातो वैलक्षण्यपरो न त्वतिरिक्तपदार्थ
त्वपरस्तदेतत्सर्वमभिप्रेत्याप्युक्तमित्थं यथा सर्वं दुर्घटं स्यादिति। केचित्तु विशिष्टा
धिकरणताया अतिरिक्तत्वे विशिष्टस्यातिरिक्तत्वमेव किं नोपेयते विशिष्टमति
रिक्तेति विनिगमनाविरहेपि विशिष्टस्यातिरिक्तत्वसिद्धेरप्रत्यूहत्वादित्याहुस्तन्न
विशिष्टस्यातिरिक्तत्वे जगतः क्षणिकतापत्तेः अत्रेदं वदंति। तद्धर्मावच्छिन्नप्रतियोगि

भवानं.टी.

५३

मत्वस्य तद्धर्मावच्छिन्नप्रतियोगिताकाभावविरुद्धत्वपाद्विशिष्टाभावस्यातिरिक्तत्वेन
गुणादौ विशिष्टसत्ताभावोस्तीति न विशिष्टसत्ताप्रतियोगिकसंबंधरूपविशि
ष्टसत्तावत्त्वसंभवः विशिष्टस्यानतिरिक्ततया सत्तायां गुणादिवृत्तित्वसत्त्वे
न गुणादिवृत्तित्वाभावो विशिष्टसत्तायां न केनापि रूपेण संभवति अत एव सा
ध्यतावच्छेदके साध्याभाववद्वृत्तितावच्छेदकत्वरूपस्यानवच्छेदकत्वस्य परित्यागः
। विशिष्टैकदेशास्यावच्छेदकत्वे तत्र किंचिद्विशेषणवैशिष्ट्यावच्छेदेन तदभावासंभ
वात् । आसज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावस्यैव विशेषणावच्छिन्नानुयो
गिताकाभावस्याप्यनंगीकारात् आसज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभा
वस्यैव विशेषणावच्छिन्नप्रतियोगिताकाभावस्याप्यतिरिक्तस्यांगीकारादिति
। प्रमेयत्वरूपेणेति । गुरुस्पर्शादिमादौ गुरुत्वसंबंधितायाः स्पर्शादिनिष्ठाया
रसादिविशिष्टस्पर्शत्वाद्यवच्छेदकतया रसवत्त्वादावव्याप्यत्वायादृशीहेतुतावच्छे

राम

दकतातादृगवच्छेद्यत्वाभावस्यैवविवक्षणीयत्वादितिभावः प्रतिपादनासंभवइति
तथाचसमवेतत्वमात्रमवच्छेदककोटौनिवेशनीयमितिभावः दीधितावनवच्छेदक
तयासाध्यसंबंधितानवच्छेदकतयातेनभेदादिप्रतियोगितावच्छेदकत्वेपितन्न्यूनवृत्तेः
व्याख्यायावावश्यमिति। अन्यथागुरुधर्मावच्छिन्नहेतुकोपाधावव्याप्यापत्तेरितिभा
वः अतएवपूर्वमनवच्छेदकत्वंचतत्स्येस्यैवोक्तं नतुसाधनतावच्छेदकानवच्छेद्यत्वंचेति
ध्येयं तत्रैवसाध्यसंबंधितानवच्छेदकत्वंसाधनतावच्छेदकविशेषणंतयैव। केचि
त्तुसाधनतावच्छेदकानवच्छेद्यत्वंस्वावच्छेद्यत्वसंबंधेनसाधनतावच्छेदकाभाववत्
त्वमेवेर्थः अन्यथासाधनतावच्छेदकावच्छेद्यत्वाभावनिवेशेऽवच्छेद्यत्वादेः प्रका
रतयातत्संबंधनिवेशेनगौरवात्। तथाचगुणकर्मान्यत्वविशिष्टजातित्वाव
च्छेद्यत्वाप्रसिद्धावपिगुणकर्मान्यत्वविशिष्टजातित्वस्याधिकरणताएवासंबं
धावच्छिन्नप्रतियोगिताकाभावस्यसाध्यसंबंधितायांसत्त्वान्नातिव्याप्त्यसंगतिरिति

आहुः पारिभाषिकानवच्छेदकत्वमुपसंहरति साधनतावच्छेदक इत्यादिना। अग्रेऽवे
पक्षीत्येनरतश्चेत्पूर्वमितियावत्। कुक्षिस्थं पाठो नास्त्येव। प्रागुक्तानुपपत्तेः उपाधे
स्साधनावृत्तित्वात् तन्निष्ठसाध्यसंबंधितावच्छेदकत्वानुपपत्तेः आह पूर्वकल्पो
क्तमेवावच्छेदकत्वमाह। वारद्वयेति। अनवच्छेदकत्वघटकतया तद्विशिष्टसाध
नवत इत्यत्र साधननिष्ठसाध्यसंबंधितेत्यत्र च प्रवेशादिति भावः। साध्याविशिष्ट
स्येतीति। अत्र साध्याविशिष्टसाध्यसंबंधितेति समस्तकथने साध्यविशिष्टत्व
स्य साध्याद्विशेषणत्वभ्रमेण वैयर्थ्यशंकास्यादित्यसमस्ततया कथनं। संबंधितो
साध्यसंबंधितानवच्छेदकेति नवस्वविशिष्टसाधनवद्वृत्तिसाध्याभावकत्वस्यस्यैवा
नवच्छेदकत्वं तात्पर्यतया साधनस्य वारद्वयप्रवेशतात्पर्यं वैयर्थ्यमिति वाच्यं। साध्याभा
ववत्त्रिष्ठाधिकरणतानिरूपकतावच्छेदकत्वस्यैव नत्वाहत्य व्याख्यायां तत्रैव तद्गुण
कर्मान्यत्वए व स्पर्शवत्त्वादावतिव्याप्तेगगनाघटवृत्तितया द्रव्यत्वविशिष्टायाः साध

सम्य

नतावच्छेदकाश्रयसत्त्वायाअव्यापकत्वादितिभावः। गुणेपरत्वेइत्यत्रतस्यासत्त्वमपि
कालावच्छेदेनस्नेहाभावविशिष्टस्पर्शवज्जलान्यवृत्तित्वारीत्याव्यत्वस्यपूर्वदले
नैववारसंस्यादितिभावः। यथाश्रुतं। व्यावर्तकत्वमात्ररूपं। मिश्रव्याख्यातंपू
र्वोपदर्शितरीत्यामिश्रव्याख्यातं। शीतस्पर्शाभाववत्वेजलस्पर्शावृत्तित्वावच्छा
श्रुतविशेषणत्वसंभवस्यास्फुरणात्मिश्रव्याख्यातविशेषणत्वसंभवमुपपाद
यतिशीतस्पर्शान्यवेति। ताहृशेति। मिश्रव्याख्यातेस्वर्ष्ठः दीधितौसाधनतावच्छे
दकविशिष्टइत्यादिइदंचद्रव्यंकर्मान्यत्वेसतिसत्त्वादित्यादौगुणान्यत्वादिसंग्रहा
यसाध्यव्याप्यावृत्त्योपयिकं। सामानाधिकरण्येनसाध्यव्याप्यावृत्तित्वानु
मापकं। व्याख्यातंतथाव्यावर्तकत्वासंभवात्तदाधेनसाध्यव्याप्यावृत्तित्वानुमा
पकत्वासंभवात् आहदैयथ्येनानुमापकत्वांशंविहायनिष्कर्षमाह। गुणक
र्मान्यत्वविशिष्टेत्यगुणकर्मान्यत्वसमानाधिकरणेत्वर्थः। आहदलद्वयनिष्कर्ष

माह। वस्तुतस्तु उत्तरदलं सद्धेतुसाधारणं आख्याय पूर्वदलोपादानं प्रक्षालनतो ग्री
न्तियाय मनुसरन्तीति। तदनुपात्तयैव निष्कर्षमाह दीधितौ। तथा च साध्याभावे
ति। तेन यत्समानाधिकरणेत्यादिनाऽयत्समानाधिकरणे साध्याभाववन्निष्ठा
धारतानिरूपकतानवच्छेदकत्वपर्यवसितविवक्षणेन गुणकर्मान्यत्वादावुक्तरीत्याऽ
व्याप्यभावेऽपि न क्षतिः। साध्याभावेति। अत्र साध्याभावेत्यस्य साध्यतावच्छेदका
वच्छिन्नसाध्याभावेत्यर्थः। तेन गुणकर्मान्यत्वविशिष्टसत्ताभाववान् जातेरित्यादौ
सत्ताभावविशिष्टज्ञात्याद्यप्रसिद्धा गुणकर्मान्यत्वादेर्नाव्याप्तिः कर्मान्यत्वस्येति। राम
विशेषाभावजनकतयाऽनुपाधेरित्यादिः कर्मव्यावर्तकत्वादिति। तद्व्यावर्तकत्वस्य तद्भे
दबुद्धिजनकत्वरूपत्वादिति भावः। द्वितीयदले साध्यविशिष्टेत्यादिदलेऽप्येवमिति
ति। साध्यतावच्छेदकावच्छिन्नेत्यर्थः अत्रेदं बोध्यं। साध्याभावविशिष्टप्रकृतसा
धनाधिकरणसामान्याव्यावर्तकत्वं तत्रेत्याद्युत्तरदलार्थः तदर्थं तद्याभिहितमप

समानाधिकरण्येत्यादेस्साध्याभावसमानाधिकरणप्रकृतसाधनवत्तियद्धत्वं न
वर्त्तत इति विपरीतविलक्षणयोजनया एतद्व्याप्यत्वे न चैतादृशाभावात्। साधनता
वच्छेदके साध्यसंबंधितानवच्छेदकत्वं तन्न निवेश्यं यत्समानाधिकरण्येत्यादे
स्सद्धेतुस्थले साध्यसामान्यादिसाधारणतया पूर्वं तन्निवेशे यीदृशे साध्या
भाववविशिष्टसाधनाप्रसिद्धेव तत्साधारण्याभावेन तन्निवेशप्रयोजनाभावा
त्। तथाव्यर्थकत्वं च तद्घटितानुमापकत्वं तच्च न फलोपधानगर्भं सर्वत्रासंभवात्
किंतु स्वरूपयोग्यत्वगर्भं तच्चानुमित्यनुकूलव्याप्तिपक्षधर्मतापर्यवसन्नं
तथा च साध्याभाववविशिष्टसाधनाधिकरणसामान्यभेदव्याप्यत्वं उत्तरदला
र्थः पर्यवसन्नः साध्येत्यादि सामान्यस्येत्यन्तं पूर्वदलार्थः तच्च साध्यविशि
ष्टप्रकृतसाधनाधिकरणसामान्यसंबंधित्वं तच्च साध्यविशिष्टप्रकृतसाधन
व्यापकत्वपर्यवसितं तेषामिति निष्कर्षः इत्यस्य एतद्द्वयनिष्कर्षे इत्यर्थः। यद्वास्वरू

पयोग्यत्वघटकपक्षधर्मतयैव तल्लाभः पूर्वदलं संपूर्णमेव नोपादेयं विशिष्टसत्तादेर
पितत्वादिनोपाधितापत्तिस्तस्यापि विशिष्टसत्तात्वादिना तादृशसाधनवत्त्वभेद
व्याप्यत्वात्। शुद्धसत्तात्वादिना तादृशसाधनव्यापकत्वान्नेत्यत आह इत्थं चे
ति। नन्वेवं सर्वत्र व्यतिरेकव्याप्तेरेवेतरभेदानुमितिसौपयिकतया तादृशसाधन
वत्त्वभेदाभावस्य चप्रतियोगितावच्छेदकतादृशसाधनाधिकरणत्वरूपतया सा
ध्याभावविशिष्टप्रकृतसाधनाधिकरणत्वव्यापकीभूताभावप्रतियोगितााव
च्छेदकं सद्घटत्साध्यविशिष्टप्रकृतसाधनव्यापकतावच्छेदकं तत्त्वमित्येव फलितं
तथा च पूर्वकल्पाभेद इत्यत आह नान्विति। तथा च पक्षैकदेशे साध्यप्रसिद्ध्या व
च्छेदकावच्छेदेन पक्षतायामंशतः सिद्धसाधनस्यादोषतयान्वयव्याप्तेरेवात्र प्र
वेशान्नोक्तदोष इति भावः पूर्वकल्पाभेदः स्यादिति। अथान्वयव्याप्तेः प्रवेशोपित
स्याः साध्याभाववद्वृत्तित्वरूपतया तादृशसाधनवद्भेदव्याप्यत्वं तादृशभेदाभाव

राम

वच्छिन्नत्वं तादृशसाधनवद्वृत्तित्वपर्यवसितं तस्यापि जातिव्याप्यत्वादित्यादौ सन्न्याप्य
व्याप्यस्यापत्यत्वाद्गुरुत्वादिरीत्या निष्कर्षे तादृशसाधनाधिकरणत्वव्यापकीभूताभाव
प्रतियोगितावच्छेदकं सत्त्व यत्तादृशसाधनव्यापकतावच्छेदकं तत्त्वमित्यत्र पर्य
वसाने पूर्वकल्पाभेदो दुर्वार एवेति चेन्न । व्यापकसामानाधिकरण्यरूपव्याप्ते रे
वात्र प्रवेशेन स्वावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतादृशसा
धनाधिकरणभेदत्वकतादृशसाधनव्यापकतावच्छेदकवत्त्वस्य विवक्षितत्वेन तयोर्भे
देनाभावात् । नन्वेवमपि साधनतावच्छेदके साध्यसंबंधितानवच्छेदकत्वानुपा
दाने संपूर्णं पूर्वदलानुपादाने वाऽतएवेत्युपष्टंभकासंगतिर्दुर्वारा यदि च प
तएव सर्वत्र सोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकं साधनताव
च्छेदकं साध्याभाववद्विशिष्टसाधनवृत्तीतियावत् अतएव तद्विशेषः विशेषणीभू
तसाध्यसंबंधितावच्छेदकधर्म एव उपाधिरिति प्राभाकरोक्तिः संगच्छते क्वचित्सोपा

धेौ साधनतावच्छेदकस्य साध्याभावविशिष्टसाधनावृत्तित्वे ऽपाधेः साध्याभावविशि
ष्टसाधनघटितत्वद्वयस्याप्य विशेषणत्वनियमभंगेन तदसंगतिप्रसंगात् ति ते
वंशीत्यास्मिकल्पे ऽभिप्रायान्नोपष्टंभकासंगतिरिति विभाअतेन व्यापकाकपंवि
दुपष्टंभकत्वसमर्थनेपि साधनतावच्छेदकभिन्नेनेति सार्थकीकर्तुमाह। यद्वेति
पूर्वग्रंथ्यासंगतिर्दुर्वारैवेति चेन्न यथाश्रुताभिप्रायेण तदुपपत्तेः। केचित्तु धीधि
तेौ यावदित्यनंतरं तथाचेति प्रकृतः साध्याभावेत्यादिपाठः अग्रे इति निष्कर्ष
[illegible]इत्यत्र च इति तु समुदायार्थ इत्यप्याहुरिति पाठः तथाच साध्याभावेत्या
दि मतांतरमेव न तु एव निष्कर्षः सामान्यादित्यनेन तद्वृत्तित्वसामान्याभावो लब्धः
सामान्यस्येत्यनेन निखिलतद्वृत्तित्वलाभः एतावता साध्यतावच्छेदकावच्छिन्न
साध्याभावविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनाधिकरणत्वव्यापकीभू
ताभावप्रतियोगितावच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसाध्याभावविशिष्टसा

राम

धनतावच्छेदकावच्छिन्नसाधनाधिकरणत्वव्यापकीभूताभावप्रतियोगितावच्छे
दकीभूतसाध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टतादृशसाधनाधिकरणत्व
व्यापकतावच्छेदकं यत्तद्वत्त्वमुपाधित्वमिति फलितार्थः पर्यवसितः अत्र
प्रागुक्तलक्षणे व्याप्याधिकरणताघटप्रवेशो न गौरवमत एवैतदुपष्टंभा
संगतिश्चेत्याहुरित्यनेनास्वरसः सूचित इत्याहुरित्यलं विस्तरेण। सामाना
धिकरण्यप्रत्यासत्त्येति इतरसंबंधेनोपाधेस्साधनावृत्तितया तन्निष्ठसाध्य
संबंधितावच्छेदकत्वासंभवादिति भावः आह चरमस्योपाधिविशेषणपदस्या
वश्यकमाह। दीधितावन्यूनानतिरिक्तेति। न्यूनवृत्तित्वमत्र नसत्वादि सामाना
धिकरण्यस्य हेतुनिष्ठस्य सामानाधिकरण्यानतिरिक्तवृत्तितया तद्वारणाया
न्यूनवृत्तित्वोपादानं आर्द्रेन्धनाद्युपदर्शितनशीतस्पर्शाभावत्वादिसामानाधि
करण्यस्य हेतुनिष्ठसाध्यसामानाधिकरण्यान्न्यूनवृत्तित्वेनानतिरिक्तवृत्तित्वो

पादानं एवं च तस्यातिरिक्तवृत्तित्वान्नातिप्रसंगः तथा च समव्यापकत्वं लक्ष्यं तद्घटावच्छे
दकतासंबंधेनेत्यनुपदमेव व्यक्तं। व्याख्यायां वक्ष्यमाणलक्षणलक्ष्यलेति। तस्य साध्याभा
ववद्विशिष्टसाधनवद्वृत्तित्वरूपसाधनाव्यापकत्वघटितत्वादिति भावः। ग्रन्थस्था
विषयस्यापि संनिकर्षादिघटितग्राहकसामग्रीविरहेण विषयतया ग्रहस्यफ
लानुपहितघटादेरपि न क्षतिः। नमहत्त्वे वक्ष्यमाणलक्षणाभावः महत्त्वेऽ
व्याप्तिसंपादकं तत्सामानाधिकरण्यस्य साध्यसामानाधिकरण्यमूलाति
रिक्तवृत्तित्वमुपपादयति। अत्रेत्यादिना। तद्व्यावृत्तिं दर्शयितुमिति तत्प्रकारस्या
नुपदमेव स्फुटीभविष्यति महत्त्वविशिष्टद्रव्यत्ववति। द्रव्यत्वावच्छिन्नमहत्त्ववति। राम
व्याप्तिः। नानित्यसमवेतत्वे साधनावच्छिन्नसाध्याव्यापकत्वघटितलक्षणाभा
वः। अत्रापि महत्त्वसामानाधिकरण्यं गगनत्वादेर्न तत्रानित्यसमवेतत्वसामा
नाधिकरण्यमनित्यसमवेतत्वसामानाधिकरण्यं वणुत्वादेर्न तत्र महत्त्वसामा

नाधिकरण्यामितिरीत्याऽनित्यसमवेतत्वसामानाधिकरण्यस्य महत्त्वसामानाधिकरण्यस्यू
नानतिरिक्तवृत्तित्वनित्यसमवेतत्वव्याप्तिसंपादकं रूपद्वयं। प्रथमहेतुपरत्वेनोक्ता वच्छेदकाव
च्छिन्नत्वव्याप्तिमाह तेनेति द्वितीयेनाह नवेति। उभयत्र। साध्यसामानाधिकरण्ये उपा
धिसमानाधिकरण्ये च अनतिरिक्तेति व्याप्यतावच्छेदककोटावेवेत्यर्थः। वैयर्थ्यादिति तत्र
तन्निवेशं विना व्युक्तोपाधि [illegible] धावव्याप्ते वारणसंभवादिति भावः एवमुत्तरत्रापीति। पृथिवी
त्वादिसामानाधिकरण्यं त्विति यत्रापि सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्य न्यूनवृत्तीत्यन
य इत्यर्थः। दीधितौ गुरुत्वेति सप्तम्यर्थोऽभेदस्तस्यावच्छेदकेन्वयः एवं जलत्वादाविव सर्वत्रापि
व्याख्यायां जलाघवच्छेदेनेति। तथा चावच्छेदकतासंबंधेन न्यूनानतिरिक्तवृत्तित्वविवक्ष
णं त्रकर्मान्यत्वपृथिवीत्वादावतिप्रसंग इति भावः। द्रव्यत्वादिसामानाधिकरण्यस्ये
ति। इदं च साधनतावच्छेदकभिन्ने नेति तृतीयार्थाभेदस्यावच्छेदकीभूतसामानाधिकर
ण्यान्वयाभिप्रायेण तत्प्रतियोगित्वं साध्यसामानाधिकरण्ये वान्वये च द्रव्यत्वादेरि

ति वह्न्यादिसामानाधिकरण्यस्येति एवं च साध्यसामानाधिकरण्ये इति तथा च भिन्नां तु
स्यानवच्छेद्यांतमर्थस्तस्य तृतीयार्थभिन्ने तस्य साध्यसामानाधिकरण्येनान्वयः । पक्षसत्वे
नाक्यं सावधारणमिति न्यायेन भिन्नत्वं तस्य तन्मात्रमर्थः तृतीयार्थो विच्छेद्यत्वं मात्रार्थो
न्तर्गत विशेष्यं च न विवक्षितं तथा च विभक्त्यंते न साधनतावच्छेदकानवच्छेद्यत्वलाभ इति ध्ये
यं अवच्छेदकीभूतसामानाधिकरण्यविशेषणत्वेपि यद्यप्यनति प्रसंगस्तथापि प्रथमो
पस्थितत्वात् साध्यसामानाधिकरण्य एव विशेषणत्वमुचितमिति भावः । अत्रापि अन
वच्छेद्यां तस्य साधनतावच्छेदके स्वविशिष्टहेत्वधिकरणसाध्याभाववत्कत्वसाध्याभाव
वन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वरूपेणतात्पर्यं तेनैतेनेत्यादिनोक्तपूर्वदोषानव
काशः नाव्याप्यवृत्तित्वमिति न च हेतुनिष्ठसामानाधिकरण्यनिरूपकाधिकरणत्वं हेतुनि
ष्ठसाध्यसामानाधिकरण्यनिरूपकाधिकरणत्वान्यूनानतिरिक्तवृत्तित्वमित्यर्थेऽव्या
प्यवृत्तित्वाभावो न स्यात् इति करइति वाच्यं । तथापि विशेषणस्य समानाधिकरणार्थकत्वे

राम

उद्भूतस्पर्शवत्त्वादित्यस्य दुरुद्धरत्वात्। केचित्तु एतन्मते गुरोरुपाधिसामानाधिकरण्यस्योपा
धेर्यत्स्वरूपं संबंधरूपसाध्यसामानाधिकरण्यावच्छेदकत्वाभावे उपाधेर्विरोधभं
जकतया कथं तस्योपाधित्वमित्यस्वरसः अथोपाधेरनवच्छेदकत्वेपि उपाधिघटि
तधर्मस्य साध्यसामानाधिकरण्यावच्छेदकतया तद्घटकतयोपाधेरपि विरोधभं
जकतयोपाधित्वं एवं चावच्छेदकघटकत्वे सति प्रकृतसाधनतावच्छेदकानवच्छिन्नसा
धननिष्ठसाध्यसामानाधिकरण्यान्यूनानतिरिक्तवृत्तिसामानाधिकरण्यप्रतियोगि
त्वमुपाधित्वमिति पर्यवसितं। न चैवमपि त्वरूवत्स्पर्शादित्यादौ स्पर्शादिनिष्ठसाध्य
सामानाधिकरण्यस्य लाघवेन केवलशीतत्वावच्छिन्नतया तत्रत्यजलत्वाद्युपा
धावव्याप्तिरिति वाच्यं। द्रव्यत्वादिसाधारणसाध्यसामानाधिकरण्यस्य जल
त्वाद्युपाधिसामानाधिकरण्यरूपोपाधिघटितधर्मेणैवावच्छिन्नतया तत्राव्याप्त्य
भावात्। न च तथापि स्पर्शत्वावच्छिन्ने हेतौ जलत्वादेरुपाधित्वं न स्यात् तस्य केवल

भवानं.दी

50

शीतत्वेनैव लाघवेनावच्छिन्नत्वादिति वाच्यं। संग्राहकलाघवेन तत्र जलत्वसामानाधिक
रण्यस्यैवावच्छेदकत्वेनाव्याप्यभावादिति चेन्न तथापि तत्र जलत्वविशिष्टस्पर्शादि
रूपाधित्वं न स्यात्। जलसमवेतत्वाद्यपेक्षया जलत्वविशिष्टस्पर्शसामानाधि
करण्यादेर्गुरुतया नावच्छेदकत्वादित्यस्वरसो बोध्य इत्याहुः। लक्ष्यतावच्छेदकोपष्टंभ
कतया द्वितीया तत एवेत्यादि आचिख्यासुराह दीधितौ न त्विति। न तु घटः प्रत्यक्षो मूर्तत्वा
दित्यादावुद्भूतरूपवत्वादेरुपाधित्वस्यासिद्ध्यापत्त्य प्रत्यक्षत्वविशिष्टमूर्तत्वव्यापकत्वेन
साध्यविशिष्टसाधनव्यापकत्वरूपसाध्यसंबंधितावच्छेदकत्वसत्त्वेन तत्तत्र सर्वत्र
सोपाधौ सद्धेतौ उपाधिना साध्यसंबंधोऽवच्छिद्यत इति नियमे व्यभिचारप्रदर्शनमसं
गतमित्याशंक्याशयमाह व्याख्यायां न त्वित्यादिना॥ निरुक्तावच्छेदकत्वेति। विशेष
णत्वविशिष्टसाध्यसंबंधितावच्छेदकत्वेत्यर्थः। उक्तनियमः। इत्यंतेन तत्रोक्तो निय
मः विशेषणत्वविशिष्टसाध्यसंबंधितावच्छेदकत्वनियम इत्यावत्र। कथमिति उक्त

राम

रूपवत्त्वादौ साध्याभाववद्विशिष्टसाधनवद्वृत्तित्वात्मकविशेषणत्वाभावप्रयुक्तत्वविशे
षणत्वविशिष्टसाध्यसंबंधित्वावच्छेदकत्वाभावेन व्यभिचारादिति भावः एवं च दीधि
तौ इति न नियम इत्यस्य इत्यादिर्न नियम इत्यर्थस्तत्र। विशेषणमुपाधिरित्यंतेन नि
यम इत्यादिना। विशेषणत्वविशिष्टसाध्यसंबंधितावच्छेदकत्वनियमाभाव इति
पर्यवसितार्थः यथा शब्दवानित्ति धूमवान्वह्नेरित्यादावार्द्रेन्धनादेर्व्यभिचारान्न त्वपरि
त्यागः साध्यसमनियतस्य साध्यसामग्र्यादेः। निरुक्तावच्छेदकत्वेति। उपदर्शितार्थकं
न तद्व्याप्यत्वेति गुरुधर्मस्य व्याप्यतानवच्छेदकत्वादिति भावः तथात्वसंभव इति
। इदं च दीधितौ तस्य तथात्वासंभव इत्यस्य प्रतियोगिप्रतीकं तेन दीधितौ तथा
त्वासंभव इति सत्त्वेपि नासंगतिः तत्रोपाधावित्ति षष्ठ्यर्थे सप्तमी दीधितौ तादृशे
त्यादिमत इत्यंतं पूरितं तत्र धत्वाद्याश्रये तादृशेत्यादि। दीधितिस्थस्य तादृशसाध
नासामानाधिकरण्यपर्यवसितमित्यस्यान्तर्निपतमित्यथोनितु तत्स्वरूपमित्यर्थः

भवानं-दी·

51

इत्याशयेनाह। तथा चेति। तादृशसाधनासामानाधिकरण्यपर्यवसितमिति पाठे तादृ
शसाधनासामानाधिकरण्यमित्यस्यैव तन्निरूपितमित्यर्थो न तु तत्स्वरूपमित्यर्थ इ
त्याशयेनाह। तथा चेतीति वोध्यं तत्स्वरूपमित्यर्थे दोषमाह तेनेति। कश्चित्तामि
प्रायमेतत्। वस्तुतः ~~तु स्वरूपमित्यर्थ इत्याशयेनाह। तथा चेतीति वोध्यं। तत्स्वरूप~~
~~मित्यर्थे दोषमाह तेनेति। कश्चित्ता~~ स्तु वस्तुमात्रस्य स्वरसादाह तथा चेति अर्थ इति
तादृशसाधनासामानाधिकरण्यपदार्थ इत्यर्थः। तथा च निरुक्तधर्मवत्स्वरूपं
तादृशसाधनासामानाधिकरण्यं विवक्षणीयमिति भाव इति कुतः। पंक्त्याः परेति
निवेशनीयप्रकृतापीत्यर्थः सत्यं तासंभव इति प्रत्यक्षादिविषयघटे घटत्वाभाव
स्याभावेन घटत्वाभावस्य तादृशसाधनव्यापकत्वाभावादिति भावः। दीधितौ
साध्याभावेत्यादि उपपादनमित्यं तेन विरोधभंजनं लभ्यं तादृशोपपादनेति
विरोधभंजनेत्यर्थः। प्रत्यक्षत्वाद्यभावसामानाधिकरण्यवति मूर्तत्वादावुक्त

राम

रूपवत्वादेः सामानाधिकरण्यसत्त्वेनातिप्रसक्तत्वात् साध्यसामानाधिकरण्यावच्छेद
कत्वासंभवादिति भावः विरोधभंजनमेव स्पष्टमुपाधिफलं व्यभिचारोन्नयनस्या
पि तत्फलत्वसंभवादित्याशंकायां तत्तीयात एवेत्यादि व्याचिख्यासुराह दीधिता
वयेति। सोपाधावुपाधिविशिष्टहेतुतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वादाह
स्वाभाविकमिति। व्याख्यायां तत्र हेतुतावच्छेदके एतस्य निरूपितत्वेन विशेषणान्ता
यां विशेष्यतया प्रतीतौ चान्वयः साध्यसंबंधितावच्छेदकत्वप्रतीत्युपपादकत्वरूप
मिति पाठः साध्यसंबंधितावच्छेदकप्रतीत्युपपादकत्वरूपमित्यपि क्वाचित्कः पाठः
तेनोभयनिष्ठसाध्यसंबंधितावच्छेदकरूपलक्षणव्याप्तिसंक्रामतयेति दीधिति।
स्वारस्यानुरोधादाह साध्यसंबंधितावच्छेदकधर्मेति साध्यसंबंधितावच्छेदकत्वभ्र
मेऽप्यपि क्वचित्पाठः। अनुपपन्नमेवेति। अवच्छेदकत्वप्रतीत्युपपादकत्वाभावा
द्भ्रमजनकत्वाभावाच्चेति भावः। ननु व्याप्तिसंक्रामकत्वस्यानुपपन्नतयोपष्टंभकत्वे

भवानं.टी.

पि साध्यसंवंधितावच्छेदकरूपलक्षणव्याप्तेरनुपष्टंभकत्वेन यत एव साध्यसंवंधि
तावच्छेदकं रूपं व्याप्तिरित्यनेनोपष्टंभककोटौ तन्निवेशोऽसंगत इत्यत आह। उपष्टं
भकोपष्टंभकतयेति। उपष्टंभकं यत्साध्यसंवंधितेत्यादिव्याप्तिसंक्रामकत्वं तदुपष्टंभ
कया तद्घटकत्वेनेन तदुपपादकतयेत्यर्थः। उपयोग इति साध्यसंवंधितेत्यादिव्या
प्त्यनंगीकारे तद्घटितव्याप्तिसंक्रामकत्वस्योपष्टंभकत्वासंगतेरिति भावः। न च स्वस
मानाधिकरणेत्यादिव्याप्तिसंक्रामकत्वस्योपष्टंभकत्वेपि साध्यव्याप्यस्येवोपाधि
त्वस्याचार्यसंमतत्वं सिध्यतीति साध्यसंवंधितेत्यादिव्याप्तिसंक्रामकत्वस्य विशिष्यो
पष्टंभकत्वाभिधानसंगतमिति वाच्यं। स्वसमानाधिकरणेत्यादिव्याप्तेराचार्या
णमंगीकारेण तद्घटितसंक्रामकत्वस्य परित्यागात्। केचित्तु। व्याप्त्यंतरांगीकारे
प्याचार्यैः साध्यसंवंधितावच्छेदकरूपां व्याप्तिं संक्रामयतीत्येवोक्तं न तु व्याप्त्यंतर
संक्रामकत्वमतस्तदनुवादकोयं ग्रंथ इत्याहुः। अपरे तु स्वसमानाधिकरणेत्यादिव्याप्ति

राम

हेतुतावच्छेदकघटितत्वेननानारूपतयोपाधिनिष्ठायास्तस्याउपाधितावच्छेदकघटि
तत्वेनव्यभिचारित्वहेतौविशेषदर्शनग्रहकालेतस्याभ्रमोनसंभवतिसाध्यसंबंधिता
वच्छेदकत्वस्यतूपाधितावच्छेदकनिष्ठस्यव्यभिचारिहेतुतावच्छेदकेभ्रमःसंभवतिए
वंव्याप्येपिस्वसमानाधिकरणेत्यादिव्याप्यंतरभ्रमसंभवात्सद्धेतावप्युपाधितापत्तिः
त्तिःसाध्यसंबंधितेत्यादिव्याप्तेस्त्वनुगततयानास्याव्याप्येभ्रमःसंभवतीतिसाध्य
संबंधितावच्छेदकरूपव्याप्तिपक्षस्यैवाचार्यग्रंथःसंगच्छतेएवंचसाध्यसंबंधित्वेति
व्याप्तिघटकावच्छेदकत्वमपिस्वरूपसंबंधरूपमेवनतुस्वविशिष्टाधिकरणेत्यादिप्राक्
निरुक्तंतथात्वस्याप्यपिव्याप्तेर्विशेषविश्रांतत्वेनोपदर्शितरीत्याभ्रमासंभवेनोप
ष्टंभकत्वासंगतेरितिप्राहुः नात्रसंयुक्तसंयोगेतिगुरुत्वादिरूपोपाध्यसंभवा
दितिभावः नन्वपूर्वमुपाधेर्विशेषणतयाहेतुतावच्छेदकेसाध्यसंबंधितावच्छेद
कत्वप्रतीत्युपपादकत्वरूपव्याप्तिसंक्रामकत्वमुक्तंएवंचहेतौव्याप्तिसंक्रामकतयेत्य

53

संगतमतआतस्वविशिष्टेतिकृत्यादेनेनकृत्यादेनहाराकृत्यादेनंचप्रतीत्युपपादकत्वं
क्वचिदनुपपादनेनेति पाठे अर्थस्सएव। साध्यव्यापकस्यैवेतीति। अत्रसाध्यव्या
पकस्यैवेत्यस्यसाध्यसमव्याप्यस्यैवेत्यर्थः। तेनेनासंगतिः। अतएवाहएवकारेणे
त्यादि। तथाचोपाधिपदस्ययौगिकत्वानंगीकारेतदनुपपत्त्योपष्टंभसंगतिरिति
भावः। अथार्द्रेंधनप्रभववह्नित्वावच्छेदेनसाध्यसंबंधितेत्यादिव्याप्तिसत्वेवह्न्यादौ
तत्र धूमजनकत्वरूपतत्संक्रामकत्वस्यार्द्रेंधनप्रभववह्न्याद्यावसंभवेनवह्नेर्धू
मव्याप्यावार्द्रेंधनप्रभववह्निरूपाधिरित्यादिव्यवहारानुपपत्तिर्दुर्वारैवेतिचेद
त्रमाम्याः प्रमेयत्वावच्छेदेनघटकारणत्वाभिमवत् वह्नित्वावच्छेदेनतस्या
पिभ्रमः संभवतितदभाववतितत्प्रकारकज्ञानस्यैवतदनवच्छेदकावच्छेदेनतज्ज्ञा
नस्यापिभ्रमत्वादिति। नवीनास्तुव्याप्तिबोधकपदसमभिव्याहृतोपाधिपदस्य
स्वनिष्ठसाध्यसंबंधितावच्छेदकवत्त्वरूपविशिष्टव्यापकत्वपर्यास्याभित्रसमभिव्याहृत

राम

पदेऽपस्याप्यवत्तावच्छेदकवह्नित्वादिसंबंधेनसंक्रामकतान् ।प्रत्यापकत्वमेवस्वीक्रियते।
तथाविधसंबंधेनवह्न्यादेस्तथाविधव्याप्तेरभावेनतादृशधूमप्रभववह्न्यादेर्धूम
जनकत्वानुपपत्तिः प्रवर्तेनसंबंधेनतस्याउपाधिनिष्ठत्वाभावात्कथंस्वनिष्ठव्या
प्तिसंक्रामकत्वमितिवाच्यं।व्याप्तिबोधकमभिव्याहारस्थलेसंबंधेक्यस्यानपे
क्षितत्वादित्याहुः आचार्यमतेसाध्यसमव्याप्तस्यैवोपाधित्वोपाधिपदस्य
योगार्थमादायविषमव्यापकेऽप्युपाधिव्यवहारंनिरस्यविषमव्याप्येयोगार्थस
त्वेनतत्रोपाधिव्यवहारनिराकरणंतुयोपाधिपदस्यरूढार्थकवस्थापनपरतया
तल्लक्षणंत्विस्यादिग्रंथंव्याचख्यासुराह।दीधितौसाध्यन्यूनवृत्तावित्ति।वाच्यत
यारूढिशक्त्यवच्छेदकतयाभूतस्योपाधिपदेत्यभिचारानुमानोपयुक्तोऽस्यार्थः।न
नुतदुपयुक्तंसाध्यव्यापकत्वमात्रमितिसाध्यसाधनसंबंधव्यापकत्वस्यतदुप
युक्तत्वाभिधानमसंगतमतआहअत्रसाध्यव्यापकत्वमात्रमिति।मात्रप

देन व्यभिचारानुमानानुपपत्तेः साध्यसाधनसंबंधव्यापकत्वव्यवच्छेदः अनुप
युक्तत्वमेवाह तावतेवेति। केचित्तु नन्वेतस्य गोत्वावाच्यत्वादित्यादिविरुद्धस्य
त्रीयसाध्याभाववत्त्वाद्युपाधावव्याप्तेः सत्त्वात्कथं दूषकतौपयिकत्वमित्यत आहात्र
साध्यव्यापकत्वमात्रमिति वदंति। अपरे तु आचार्यमते विरुद्धोपाधिर्नास्त्येव
उपसमीपवर्त्तिनि स्वसमानाधिकरणे व्यभिचारिणीति दीधितिस्वारस्येनोपाधिप
दयोगार्थघटकसामीप्यस्य स्वसमानाधिकरणसाध्याभाववद्वृत्तित्वरूपतया
विरुद्धस्थले तदसंभवादित्यवहितोक्तमवतारणमसमंजसं एतेन गुरुमते
दध्वंसत्वादित्यत्र गगनकर्मान्यत्वमुपाधिर्नाचार्यमते साध्याव्यापकत्वान्न विरुद्धे राम
त्वोपाधिस्याचार्यमतेन तन्मत इति विशेष इत्यपि परास्तमिति प्राहुः साधन
वतीति निवृत्तान्वयी दं व्यापकेति साध्यसाधनसंबंधव्यापकेत्यर्थः व्याख्यापां
त्वदूषितेत्वदूषणघटकतया तथैव साध्यसाधनसंबंधव्यापकत्वेनैव दीधितौ यो

गानादरमिति। न च व्यभिचारोन्नायकत्वमेवेत्येवकारस्य रूपान्तरानादरसूचकत्व
मेतत्किं नोक्तमिति वाच्यं। तथा सति योगार्थाभावादेवाप्रयोजकत्वादेवातिप्र
संगाभावेन तत्रातिप्रसंगप्रतिपादकाग्रिमग्रन्थासंगत्यापत्तेः। उपाधित्वस्य
व्यभिचारोन्नायकत्वरूपत्वे पौनरुक्त्येन व्यभिचारोन्नायकत्वमेवोपाधित्वमित्य
भेदान्वयानुपपत्तिरत आह उपाधित्वमिति प्रवृत्तीतिकाण्डप्रवृत्तीत्यर्थः व्याख्यायां
अपादानं। उपाधित्वापादानं। उपाधिपदेनेति। तथा चोपाधितापदस्योपाधि
पदवाच्यतार्थकतयोपाधितापत्तेरित्यनोपाधिपदवाच्यत्वमेवाप्रयोजकत्वा
दावापादितमिति भावः। ननु तत्रापीष्टापत्त्या तदापादनमपि न घटत इत्यत आ
ह अप्रयोजकत्वादाविति। प्रविष्टत्वापेक्षया।। तादृशप्रविष्टत्वरूपव्यभिचारो
न्नायकत्वापेक्षया। ननु मात्रपदेन साधनाव्यापकत्वव्यवच्छेदो लभ्यः स चा
संगतः साधनव्यापकवारणाय साधनाव्यापकत्वस्यावश्यकत्वादत आह। स्व

निष्ठेति लाभादिति व्यभिचारिसाधनव्यापकस्य साध्याव्याप्यत्वनियमेन साधनव्याप
कत्वे साध्याव्याप्यतापत्त्यातस्य स्वनिष्ठव्याप्तिसंक्रामकत्वस्यैवासंभवादितिभा
वः दीधितौ रूढिरिति तथा च साधनाव्यापकत्वस्य योगार्थमर्यादयैव लाभे न
रूढिनिवेशा इतिभावः। केचित्तु मात्रपदेन साध्यव्याप्यत्वमात्रं व्युदस्तं नतु साध
नाव्यापकत्वमपि योगरूढत्वव्यवस्थापनेनेति प्राग्युक्तग्रंथस्वरससिद्धं चैतत्
दित्याहुः। व्याप्तिवादभवानंदगूढार्थविशदीकृतः महादेवेन सुधिसंप्रदाया
नुसारतः।।१।। इति श्रीमन्महादेवविरचिते भवानंदीप्रकाशे व्याप्तिवादप्रकाशः
।। श्रीरस्तु।। ।। श्रीमन्महागणपतये नमः।। सहचारे अतिदुर्बोधे भवानंदीप्र
काशानेकरोत्तु मम सामर्थ्यं शिवासहचरः शिवः।।१।। व्याप्तिग्रहोपायेकथनी
य इति। पूर्वं व्याप्तिग्रहोपायस्य वक्ष्यत इत्यनेन समारब्धानुमानप्रामाण्यपरी
क्षाकारणीभूतव्याप्तिग्रहोपायनिरूपणे प्रतिज्ञाते तत्कारणीभूतव्याप्तिस्वरूप

राम

वच्छेदेनैकात्म्यवृत्तित्वविरहे ऽकुत्रापि व्याप्यत्वानुभवोत्पादानुपपत्तेरितिबाधकान्तरस्य दर्शि
तत्वेन हेतुत्वमिति भावः। इदमुपलक्षणम्। अपेक्षाबुद्ध्यात्मकदर्शनमात्रापेक्षबुद्धिमित
तसंभवेपि व्यभिचारादेवतत्भूयोदर्शनत्वेन तथात्वमित्यस्पष्टव्याप्तिव्याख्यानं तद
सत्। दीधितिकाराणां विकल्पदर्शनानामित्यादिग्रंथव्याख्यानविरोधात्। भूयो
दर्शनत्वेन तथात्वमित्यस्पष्टव्याप्तिव्याख्यानं तदसत्। दीधितिकाराणां विकल्पदर्श
नामित्यादिग्रंथव्याख्यानविरोधात्। भूयोदर्शनत्वेन हेतुतावादिनां जरन्नैयायि
कानिराकरणेपि अद्यतनस्य तदनभ्युपगतमतांतरनिराकरणे ऽर्थांतरप्रसंगाच्चेति सं
क्षेपः। दर्शनानामित्यत्राप्यादिपदेन हेतुत्वपरतयैव व्याख्यानसंभवे विकल्पेन व्याख्या
नवैयर्थ्यमत आह आरभ्यायां प्रत्येकपदस्वरसादिति। दर्शनानां प्रत्येकमहेतुत्वे आद्वि
त्यादेर्हेतुत्वासंभवादिति भावः। समुदायस्य प्रत्येकानतिरिक्ततया मिलितानां हेतुत्वे
पि प्रत्येकहेतुतयाऽप्रत्येकं वा मिलितानां वेति विकल्पासंगतेराह प्रत्येकमित्यादि तत्र

घटत्वादिनापिस्वरूपयोग्यत्वसंभवात्तत्फलोपधायकत्वमिति साध्यघटकमिति
शेषः दीधितौ मिलितानां चेति भूयस्त्वविशिष्टसहचारदर्शनत्वेन चेत्यर्थः हेतुत्वमित्य
नुषज्यते तच्चोत्कार्यैकमेव। अपेक्षाबुद्धिविशेषविषयत्वरूपं मिलनमपेक्षाबुद्धिविनाशि
नाम पीत्यत आह। व्याख्यायां एकक्षण इति एकाधिकरणवृत्तेरित्यादिः समत्वे स
मानविषये स्मरणे प्रत्यभिज्ञाने चेति अत्र स्मरण इति दृष्टांतार्थं प्रत्यभिज्ञानपदं
चोपनीतभानमात्रोपलक्षणं। तथा च यथा स्मरणे समानविशेष्यकसमान
प्रकारकसंस्कारो हेतुस्तथा तद्विशेष्यकोपनीततत्प्रकारकप्रत्यक्षं प्रति तद्विशेष्यक
तत्प्रकारकसंस्कारो हेतुः। न चैवं तत्तादिविशेष्यकसंस्कारात्प्रत्यभिज्ञादिकं न स्यादिति राम
वाच्यं। इष्टापत्तेः। अत एव यो यत्र पूर्वमवगतः स तत्र संस्कारवशात्तथात्वप्रत्यक्षे
भासत इति प्राचीनप्रवादोपि संगच्छत इत्याशयः। वस्तुतस्तु स्मरणे प्रत्यभिज्ञाने
चेत्यनेन स्मरणे उपनीतभाने चैकमेव संस्कारहेतुत्वं स्वाश्रयवृत्तितोपरत्वादिसंबंधेन ता

दृशासंस्कारविशिष्टमेव अन्यतावच्छेदकं लाघवादिति सूचितं। आरब्धायां अतइति समा
नविषयइत्यादिपंक्त्याः मूलस्य व्याप्तिज्ञाने सहचारविषयकसंस्कारहेतुतानिरा
सकत्वासंगतेरित्यर्थः मूलं। समानविषये इत्यादि मूलं संगमयति उक्तहेतुतानिरा
सकत्वेनेत्यादिः पूर्वमेव प्राप्यमिकसहचारदर्शनोत्पत्तिकालएवइदं चागृहीतेत्यत्रा
न्वेति दीधितौ हेतुत्वमिति नैयायिकैरितिशेषः एवं च मूले व्याप्तिज्ञानमित्यत्र व्याप्तिप
दं व्यापकताप्रकारकपरमिति भावः धूमसहचरितो वह्निरित्याकारकसाध्यविशे
ष्यकसहचारप्रकारकसंस्कारस्य व्यापकत्वग्रहसमानविशेष्यकत्वमेवेत्यतो व्या
चष्टे आरब्धायां साध्यविशेष्यकेत्यादि। ननूपदर्शितकार्यकारणभावानुरोधेन य
त्र स्वअन्यतावच्छेदकीभूतप्रकारतानिरूपितविशेष्यतातत्रस्वीयप्रकारतानिरूपित
विशेष्यतारूपव्याप्यवृत्तिसाध्ये स्वीयप्रकारतानिरूपितविशेष्यत्वरूपव्यापका
भावे न तादृशनियमभंगापत्तेरितिक्रमेण व्याप्तिग्रहस्ये सहचारसंस्कारहेतुतानि

भवानं·टी·

58

रासमर्थनसंभवेनसमानविषयइत्यादियथाश्रुतमूलार्थेनुपपत्त्यभावेन दीधितिकार
स्यसामानाधिकरण्यांशस्यअप्ययमस्त्वेवेत्यादिनासामानाधिकरण्यांशस्यआप्ययसंगृही
तत्वाद्व्याप्यांशव्यापकत्वांशगुरुत्वएवतद्धेतुत्वेतितन्मूलाभिप्रायमुन्नीयकार्यकारणयोर्भि
न्नविशेष्यकत्वसंपादनेनतद्धेतुतानिरासस्यसमर्थनपरतयातन्मूलाभिप्रायवर्णनम
नर्थकं।नचयत्रस्वजन्यतावच्छेदकीभूतप्रकारतातत्रस्वीयप्रकारतेति नियमाश्रयणे न
यथाश्रुतमूलेनतद्धेतुतानिरासस्यसमर्थनंनसंभवतीति दीधितिकारस्यतन्मूला
भिप्रायवर्णनंसार्थकमितिवाच्यं।तथासतिभ्रमस्यवैशिष्ट्यावगाहित्वेपितादृशनि राम
यमभंगाभावेनभ्रमात्मकत्वस्याग्रिमग्रंथानुस्यूतापत्तेरिति चेन्नैवं।स्वजन्यताव
च्छेदकतापर्याप्त्यधिकरणीभूतप्रकारतानिरूपितविशेष्यतायत्रतत्रस्वीयप्रकारता
निरूपितविशेष्यतेतिनियममाश्रयणेनतादृशमूलस्ययथाश्रुतार्थकत्वेनसंभ
वतितथासतिव्यापकसामानाधिकरण्यप्रकारत्वस्यैवतादृशसंस्कारजन्यतावच्छेद

कतापर्याप्त्यधिकरणत्वेन तत्प्रकारतानिरूपितविशेष्यतावति हेतौ तादृशसंस्कारीयप्रकार
तानिरूपित। नविशेष्यतासत्त्वेनोक्तनियमभंगाभावेन तत्स्मारकव्यभिचारे तादृशसंस्का
रहेतुतानिरासासंभवादिति दीधितिकारस्योक्तरीत्या व्यापकत्वप्रत्यक्षहेतुतापरत्वे
न तन्मूलाभिप्रायवर्णनं संगच्छते। तथा सति तादृशसंस्कारजन्यतावच्छेदकतापर्याप्त्य
धिकरणव्यापकत्वप्रकारतानिरूपितविशेष्यतावति साध्ये तादृशसंस्कारीयप्रकारता
निरूपितविशेष्यताया अभावेन तादृशनियमभंगापत्तिरिति क्रमेण व्यापकतावत्ताने ता
दृशसंस्कारहेतुतानिरासासंभवात्। न चैवमपि धूमसहचरितो वह्निरित्याकारकसाध्य
विशेष्यकसहचारसंस्कारस्य व्यापकत्वग्रहसमानविशेष्यकतया तद्धेतुतानिरासो न
संभवत्येवेति वाच्यं। तद्धेतुतायामारम्भैयापि केरप्यनंगीकारात्। नवीनमते व्यभिचार
ज्ञानाभावकार्यतावच्छेदकरूपस्यैव प्राचां सहचारसंस्कारकार्यतावच्छेदकत्वाभ्युपगम
स्योचितत्वेन धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वप्रकारकवह्नित्व

विशेष्यकप्रत्यक्षत्वस्यैव साध्यविशेष्यकसंस्कारजन्यतावच्छेदकतया तद्धेतुतानिरासस्या
पि समर्थनसंभवाद्व्याख्यानमास्तु। यत्र स्वजन्यतावच्छेदकप्रकारतानिरूपितमुख्यविशेष्यता
तत्र स्वीयप्रकारतानिरूपितमुख्यविशेष्यतेति नियमाश्रयणेन यथाश्रुतमूलेन व्याप्ति
प्रत्यक्षे सहचारसंस्कारस्य हेतुतानिरासमर्थनं न संभवतीति व्यापकत्वप्रत्यक्षेण तद्धेतु
तानिरासपरतयास्याभासाधिकरण्यांशस्य प्रथममेवेत्यादिना दीधितिकारेण मू
लात्पर्यं वर्णितः शेषं पूर्ववदिति प्राहुः। वस्तुतस्तु व्यापकत्वप्रत्यक्ष एव सहचारसंस्का
रस्य हेतुत्वमिति। वस्तुगतिमनुरुध्यैव दीधितिकारेण व्यापकत्वप्रत्यक्षे तादृशसंस्कार
हेतुत्वे मूलस्य तात्पर्यमुपवर्णितं न तु व्याप्तिप्रत्यक्षे सहचारसंस्कारस्य हेतुत्वखंडनं य
थाश्रुतमूलेन न संभवतीत्यभिप्रायेण एतेन सर्वथा यथाश्रुतमूलानुपपन्नत्वाभिप्रायं
तद्वर्णनेन मूलमुपपादनीयं प्रकृते वस्तुवपक्ष्योपदर्शितनियमाश्रयणेन यथाश्रुतमूलस्य तद्धेतुता
निरासमसमर्थनेनोपपन्नौ नियमांतराश्रयणेन यथाश्रुतार्थपरित्यज्याभिप्रायांतरवर्णनमनुचितमि

ति दीधितिकारस्य नियमांतराश्रयणेनाभिप्रायान्तरवर्णनमसंगतमेवेत्यपि दूषणं निरस्त
मिति दिक्॥ हेतुत्वं द्रष्टव्यमेवेति तथा च व्यभिचारेणोक्तनियमस्यासिद्ध्याऽनन्तराश्रयणेन
तदनुगमभीत्या सत्त्वात्संस्कारस्य व्यापकत्वग्रहस्यैव हेतुतानिराससंभव इत्याशयः एतेन य
थाश्रुते हेतुत्वं द्रष्टव्यमेवेत्यनेन यथाभ्रमे भिन्नविशेष्यकस्यापि संस्कारस्य हेतुत्वमेवं व्यापकत्व
ग्रहस्थलेऽपि भिन्नविशेष्यकस्यापि सहचारसंस्कारस्य हेतुत्वं संभवतीत्यर्थो लभ्यते स च वानु
पपन्नः दृष्टान्ते भिन्नविशेष्यकत्वेऽपि समानप्रकारकत्वमस्ति दार्ष्टान्तिके तु तदपि नास्तीति वैषम्या
दिति शंकायामनवकाशः दीधितौ ज्ञानद्वयमिति तथा च प्राभाकरमते रजतत्वप्रकारता
निरूपितविशेष्यताया शुक्तावभावात्प्रोक्तनियमे व्यभिचार इतिभावः। वैशिष्ट्यावगाहि
त्वघटकेदस्य फलमाह। व्याख्यातां रजतत्वभ्रमस्येति भिन्नविशेष्यकत्वं स्यादिति तथा
च व्यभिचारेणोक्तनियमभङ्गे एवं न सिद्ध्येदिति शेषः। यत्तु चंदने सौरभमित्याद्याकारक
संस्कारजन्ये सुरभिचंदनमित्याद्युपनीतभाने स्वजन्यतावच्छेदकसौरभप्रकारता

निरूपितत्वविशेष्यतावति यंदने स्वजनकयंदने सोऽयमित्याद्याकारकसंस्कारीयप्रकारतानि
रूपितविशेष्यताविरहाद्व्यभिचारः स्फुट एव । एवंभूतले घट इत्यादिसंस्कारादुपनीतघटा
दिप्रकारिकायां संनिकर्षादिवशाद्घटत्वादिविशेष्यकघटादिप्रमायामपि व्यभिचारस्तथा
च भ्रमस्थित्यादिग्रंथेन भ्रमे व्यभिचारनिरासेनैव कथं प्रतीकारः । न च विशेष्यतायामपि
स्वजन्यतावच्छेदकविशेषणदानान्न व्यभिचारस्तत्र विशेष्यताया लौकिकसंनिकर्षजन्यतावच्छे
दकत्वादिति वाच्यं । तथा सति भ्रमेप्युक्तस्यादिविशेष्यताया अपि लौकिकसंनिकर्षजन्यतावच्छे
दकतया व्यभिचाराभावेन भ्रमस्थित्यादिग्रंथानुत्थानप्रसंगादिति तत्र संभ्रमानविषइ
त्यादिग्रंथस्य यद्भूततत्वेन यस्योपनस्तद्भूततत्वेन तस्योपनीतभानं यो यत्र पूर्वमवगतस्स एव राम
तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासत इत्यादिप्राचीनमतानुसारितयोपदर्शितसंस्का
रादुपदर्शितोपनीतभानानुपपत्तेः अथैवमपि यत्र घटत्वविशेष्यकसंस्कारात् घटत्वविशे
ष्यकं घटोपनीतभानं जायमानं संनिकर्षवशाद्घटप्रकारकाभूतलविशेष्यकं तत्र तादृ

शसंस्कारजन्यतावच्छेदकीभूतघटप्रकारतानिरूपितविशेष्यतायाभूतलेसत्वात्तत्रत्वसंस्का
रीयप्रकारतानिरूपितविशेष्यताविरहात्व्यभिचारोदुर्वारएवेतिचेन्नविशेष्यताभेदेन
प्रकारताभेदाभ्युपगमेनतत्रभूतलविशेष्यतानिरूपितसंनिकृष्टघटप्रकारकप्रकारताया
लौकिकसंनिकर्षनियतत्वेनतादृशसंस्कारजन्यतावच्छेदकत्वाभावात्।अतएवसंस्कार
हेतुतावादिनांज्ञानस्यापिहेतुत्वाभ्युपगमेनयत्रघटवद्भूतलमितिसंस्कारानंतरमेवतत्र
घटवद्भूतलमितिज्ञानादेवघटत्वविशेष्यकंभूतलविशेष्यकंचघटप्रकारकोपनीतभा
नंतत्रव्यभिचारइत्यपिपरास्तं।विशेष्यताभेदेनप्रकारताभेदात्संस्कारहेतुता
वादिनांज्ञानस्यहेतुत्वानभ्युपगमाच्च।केचित्तुननुस्मृत्यनुभूताकथंस्मरणेनप्रत्यभि
ज्ञानेचेत्वेवोक्तंप्रत्यभिज्ञानेतत्तांशगोचरस्यैवभ्रमेमिरजतत्वादिगोचरसंस्कारस्यें
द्रियसहकृतस्यतुत्वस्वीकारात्तथाचभूतलेत्याशंकायामाहभ्रमस्त्विस्यादितथा
चभूतलस्यनन्यूनत्वमितिभावः।ननुकर्णचितादृशज्ञानद्वयंकर्णादिविशिष्टज्ञानंचेतिस

धापिन्नूनतेत्यत आह नवितीतिप्राहुरित्यास्तांविस्तरः। नन्वन्वयव्यतिरेकाभ्यांभिन्नविशे
ष्यकस्यापिसहचारसंस्कारस्य व्यापकत्वग्रहंप्रतिहेतुत्वंस्यादितितावतैवदूषयन्ति। मू
ले किंचेति। ननुदीधितौ तथाव्याप्तिग्राहकमित्येवोचितं नत्वसमभिव्याहारे तेनैवव्याप्ति
ग्राहकत्वाभावलाभसंभवादत आह। व्याख्यायां अग्रे इति। अन्यत्रापीति सहकृते तु
ष्वेत्यत्रेत्यर्थः बाध इति भूयोदर्शनपदप्रतिपाद्यत्वरूपभूयोदर्शनत्वस्य तेषां सर्वस्मि
न्नसत्त्वादितिभावः तेनैवव्यभिचारादर्शनेनैव अन्यथासिद्ध इति व्यभिचारादर्शन
संपादकत्वादितिभावः व्यापारेणचेति सहचारदर्शनेनतर्कस्तेन व्यभिचारादर्शनं
तेन च व्याप्तिग्रहादितिभावः अत्र व्यापारत्वघटकजन्यत्वस्य स्थैर्यमसाधारणं तथा
व्यभिचारादर्शनस्य व्यापारत्वोपपत्तिरितिध्येयं मूलेन चेवमिति एवमेव व्यभिचाराद
र्शनसहकृतस्तर्कएव व्याप्तिग्राहकः व्याख्यायामुपयोगित्वमिति अन्यथा स्वाभि
मतस्य व्याप्तिग्रहे भूयोदर्शनोपयोगस्यासिद्ध्या एवमेवेति जरन्नैयायिकोक्तेरसंग

राम

साधनेरितिभावः दीधितौ क्वचित्तर्कप्रवृत्तावितिपाठः तृतीयादिदर्शनादेव कार्यकारण
भावनिश्चयेन व्याप्तिग्राहकतर्कप्रवृत्तिस्तत्रेत्यर्थः उपयुज्यत इति क्वचित्तत्तृतीया
दिदर्शनात्मकभूयोदर्शनं कार्यकारणभावनिश्चयद्वारा व्याप्तिग्रहप्रयोजकं न तु भूय
योदर्शनत्वेन तत्कारणत्वमितिभावः व्याख्यायां अस्य व्याप्तिसाधनत्वनिरूपितस्व
नयात्रत्वनिष्ठव्याप्तिज्ञानस्यहेतुत्वस्याहुरिति । वक्ष्यमाणमूलोक्तरीत्यास्वक्रिया
भाघातारेवाकारणककार्योत्पत्तिशंकाविरासः संभवोऽत्रास्वरसः केचित्वितित कं
चिन्नेवेति मूलात्पथात्तथैवस्यालाभेनोदद्भ्यरत्वमेवात्रास्वरसः अदर्शनादितिमू
लेइत्यादिः नंहेतुंतादृशेति अवंतरेत्यर्थः ज्ञानाभावात् । ज्ञानाभावइत्याशयः
नदीधितौभूयोदर्शनापेक्षेति तथा चानेकसाध्याधिकरणवृत्तित्वरूपवेग्रहे भूयो
दर्शनपदार्थइतिभावः व्याख्यायांभावत्रपदमंतर्भाव्येति । उक्तरूपत्वे सकलेंद्रिय
सहकारित्वरवंडनेनपूर्वकल्पेमात्रार्थस्यलाभादितिभावः उपाध्यभावइतिप्राभाक

मुक्तत्वस्यैव व्याप्तित्वादित्यभिमानः तद्ग्राहकेति साधनग्राहकेत्यर्थः । पक्षस्येति ग्राह्याकार
प्रतद्रूपत्वादिः असिद्धिः स्वरूपासिद्धिः तथेति साध्यसाधनसाधनसंबंधग्राहकातिरिक्ता
नपेक्ष्ये इत्यर्थः व्याप्तिः प्रकारतयानुमितिजनकतावच्छेदको धर्मः प्राथमिकेति । इदं च
काप्रभेदयोर्दर्शनगम्यत्वेपि साध्यसाधनसंबंधग्रहविषयतयासिद्धसाधनवारणा
य अत्रानुगतं प्राथमिकत्वं स्वसमानाधिकरणसाध्यसाधनसंबंधग्रहाश्रयकाल
ध्वंसानधिकरणकालवृत्तित्वसंबंधेन साध्यसाधनसंबंधदर्शनवत्त्वं संबंधघट
कसामानाधिकरण्यं च समवायेनावच्छेदकतया चातेन नाप्रसिद्धिः केचित्तु साध्य
साधनसंबंधविषयिता व्यापकविषयिताप्रतियोगित्वरूपं सकृद्दर्शनगम्यत्वं राम
साध्यमित्याहुः तत्र प्रथमदर्शनेनत्पन्ने ममरुत्ता स्वारस्यात् साध्यसाधनसंबंधग्रा
हकेति । न च व्यत्र तादृशानपेक्ष्यसमूहालंबनात्मसाध्यसाधनग्रहविषयत्वस्य साध्य
व्याप्येघटादौ सत्त्वेन व्यभिचारः न व्यपक्षविषयकज्ञानत्वावच्छेदेन तादृशातिरिक्तानपेक्ष्य

त्वं तत्वादित्रितिहेतुर्वाच्यः तथा च घटादिविषयकज्ञानत्वावच्छेदेन तादृशज्ञानपेक्ष्यत्वाभावा
त्र व्यभिचार इति वाच्यं । व्याप्तत्वविशिष्टसाध्यसाधनसंबंधग्राहके व्यभिचारात्तादृ
शविशिष्टसंबंधग्रहत्वावच्छेदेन तादृशज्ञानपेक्ष्यत्वस्य सत्त्वात् । न च तन्न्यासेन
साध्यसाधनसंबंधग्राहकातिरिक्तापेक्ष्यग्रहविशिष्टयोर्योऽयस्तादृशैकरूपवत्त्वं तदर्थः
तथा चोक्तविशिष्टसंबंधे तादृशातिरिक्तविशेषणांशग्रहसापेक्षग्रहसापेक्ष्यग्रहवि
षयत्वसत्त्वान्न व्यभिचार इति वाच्यं । भेदकूटस्य दुर्ज्ञेयत्वादित्रितिचेन्मैवं साध्यसाधन
संबंधविषयताव्यापकविषयतावच्छिन्नकार्यतानिरूपितकारणतानवच्छेदकरूपा
वच्छिन्नकारणतानिरूपितकार्यतानवच्छेदकविषयिताकत्वादित्रितिहेतुनिष्कर्षे लक्ष
णे दोषात् । अत्र साध्यादिविषयताशालिग्रहकारणतावच्छेदकस्यापि साध्यसाधन
संबंधविषयतावच्छिन्नकार्यतानिरूपितकारणतानवच्छेदकतया साध्यादिवृ
त्ति दृष्टान्तासिद्धिरतः साध्यसाधनसंबंधविषयतावच्छिन्नेति विहाय साध्यसाधन

संबंधविषयताव्यापकविषयतावच्छिन्नेत्युक्तं एवं च साध्यादिविषयताया अपि साध्यसाध
नसंबंधविषयताव्यापकविषयत्वेन तदवच्छिन्नकार्यतानिरूपितकारणतानवच्छेदक
त्वस्य तत्राभावान्न दृष्टांतासिद्धिरिति ध्येयं । न चात्रापि नञ्द्वयवैयर्थ्यं तादृशकार्य
निरूपितकारणता ~~नवच्छेदकत्वस्य तत्राभावान्न दृष्टांतासिद्धिरिति ध्येयं~~ वच्छेदका
वच्छिन्नकारणतानिरूपितकार्यतावच्छेदकविषयताकत्वस्यैव सम्यक्त्वादिति वाच्यं
१ यथासंनिवेशे नावैयर्थ्यात् । नञ्द्वयघटितस्येतद्रूपस्य परिशेषस्वरूपत्वाभावा
त् । किं च तथा सति साध्यसाधनसंबंधाभावादौ व्यभिचारः तत्संबंधप्रकारतारूपता
दृशविषयताव्यापकविषयितावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकं यत्तत्संबंध
ज्ञानत्वं तदवच्छिन्नकारणतानिरूपितसंबंधाभावविषयकप्रत्यक्षत्वावच्छिन्नकार्य
तावच्छेदकविषयताकत्वस्य तत्र सत्त्वाद्युपोक्तसाध्यासत्त्वाच्च । न नञ्द्वयप्रवेशेन तु तादृ
शविषयतावच्छिन्नकार्यतानिरूपितकारणतानवच्छेदकं यद्भावग्राहकतावच्छेदकमि

राम

ऽयसंबंध।विशेषणतात्वादितदवछिन्नकारणतानिरूपितकार्यतावछेदकविषयता
कत्वेन व्यभिचारविरहस्यादितिसंक्षेपः।व्याप्तिलक्ष्यरोतितथात्वुपाध्यभावो
व्याप्तिरित्यादिनेत्यादिः दीधितौ उपाधिस्मरणइत्यादीति नचावतारणिकात्वा
देवनन्वित्यादिग्रंथस्यैतदनंतरत्वलाभेनेतत्पाठधारणं व्यर्थमितिवाच्यं।उपा
धियोग्यानुपलब्ध्योरनुमितिहेतुत्वेइत्यभिधानेशाकगौरवेणाशकुलाघवादेव
मित्यनेनपूर्वोपाख्यिततदभिधानसौकर्यायतत्पाठधारणात्।व्याख्यायां इत्या
दे: इत्यादिग्रंथस्यस्वचनीयं।तात्पर्यग्राहकतयायोद्योतनीयं।अन्यथाप्रथम
दर्शनादनुमित्यापत्तिरूपपूर्वपक्षेतद्व्यवहारहेतुत्वाभिधानरूपसमाधानाः
संगतेरितिभावः।विवक्षितार्थे उपाध्यभावत्वप्रकारकज्ञानहेतुत्वरूपं।उपाधि
योग्यानुपलब्धिः तत्सहिताधिकरणज्ञानस्य।एवमग्रेपि।अतोंऽद्वियादीति आ
दिनाप्रत्यक्षप्रयोजकसामग्र्यंतररहितस्ययोग्यस्यपरिग्रहः दीधितौ अत आहेति।

अतः उपाधिस्मरणे इत्यादिग्रंथस्य यथाश्रुतार्थविलायविवक्षितार्थे तात्पर्यं ग्राहयितुं
आह तद्व्यवहारहेतुत्वादिरस्य स्वतात्पर्यग्राहकत्वमाह। विवक्षितार्थे तात्पर्यग्राहकता
प्रकारं दर्शयितुमाह तथा चेत्यादि। चकारेणानुमितिहेतुत्वतद्व्यवहारहेतुत्वयोरेकध
र्मिगतत्वेऽवगते फलितार्थमाह तथा चेत्यादिस्यपि कश्चित् 'तद्व्यवहारे' इति उपाध्य
भाववत्वप्रकारकव्यवहारे इत्यर्थः। हेतुरेवेत्येवकारेण योग्यानुपलब्धेर्हेतुताव्यवच्छेदः
व्यवहारहेतुरपि योग्यानुपलब्धिर्भवतु तथा च पूर्वोक्तदोषोऽनुद्धृत एवेत्यत आह तद्व्येति
तद्व्यवहारकारणं चेत्यर्थः: ज्ञानं लौकिकालौकिकसाधारणं ज्ञानं तेनासंनिकृष्टा
दिहेतौ तयोर्नानुपपत्तिरिति भावः: विवक्षितार्थप्रकाशयितुमाह उपाधीत्यादिए
तदनंतरं क्वचिद्व्याख्यापानन्वेवमपि योग्यानुपलंभस्य अनुमितिहेत्वाप्रतिक्षेपा
त्तद्दोषतादवस्थ्यं उक्तस्थले व्यवहारानुपपत्तिश्चेत्यतस्तथा चेति। नन्वेवमुपाधिस्मरणे
इत्यादिमूलं व्यर्थमत उपाधिस्मरणे इत्यादीति पाठोऽस्ति तत्र एवमपि योग्यानुपलंभ

राम

स्योपाध्यभावव्यवहारहेतुत्वेपिअनुमितिहेतुत्वेतितद्व्यवहारहेतुत्वादित्यनेनेत्यादिः
अप्रतिरुध्येत्यादितिविवक्षितत्वार्थालाभेनेतिशेषः। तद्दोषेति असंभासंनिकृष्टादिहेतुकानु
मित्यनुपपत्तिरूपदोषेत्यर्थः। एकविशेष्यकविधेरितरनिषेधफलकत्वमितिन्यायेन
तत्प्रतिरुध्येपलाभसंभवाद्गृहउक्त्यन्वितइति असंनिकृष्टादिहेतुकइत्यर्थः। व्यवहा
रेति उपाध्यभावत्वप्रकारकव्यवहारेत्यर्थः। अनुपपत्तिश्चेति चकारेणान्वयेवाभिति
मूलीयपूर्वपक्षसमाधाना लाभसमुच्चयः। दीधितौ तत्कारणप्रदर्शनपरमि
ति क्वाचित्कानुमितिहेतुलौकिकप्रत्यक्षात्मकोपाध्यभावत्वप्रकारकज्ञानकार
णप्रदर्शनपरमित्यर्थः। तथाचेदंकारे लोकदि प्रात्र कृष्यनं तेनोपनयानुमान
शंका अभिप्रायासंभवं बोध्यादितिभावः। व्याख्यायां कारणप्रदर्शनमुखेन सं
निकृष्टस्थलेइत्यादिः ज्ञानोपलक्ष्यकमिति। न च स्वरादेनैव कार्यीभूततादृश
ज्ञानप्रदर्शनसंभवे कारणप्रदर्शनमुखेन तत्प्रदर्शनं व्यर्थमिति वाच्यं। तादृशज्ञानस्य

प्राथमिकत्वाभावसूचनार्थं तथा प्रदर्शनात्। तथा च मूले ऽनुमितिहेतुत्वादित्यत्रैव तद्
व्यवहारहेतुत्वाच्चेति हेतुः चस्तत्त्वार्थकः एवं चोपाधिस्मरणमित्यादिग्रंथस्योपाध्य
भावत्वप्रकारकस्मरणहेतुतातात्पर्यग्राहकस्तद्व्यवहारहेतुत्वाच्चेतिग्रंथ इति विवक्षि
तार्थत्वाच्च इति फलितं। न च मूले विवक्षितार्थस्य स्वशब्देनाभिधानस्यैव च युक्तत
या तत्र एव च तल्लाभसंभवेन तद्व्यवहारहेतुत्वाच्चेत्यस्य तात्पर्यग्राहकतया शा
कांतरेण तत्प्रदर्शनानौचित्यमिति वाच्यं। उपाध्यभावत्वप्रकारकस्मरणेनुमि
तिहेतुत्वस्य व्यवहारहेतुत्वेन समं तुल्यकक्ष्यत्वसूचनायोक्तरीत्या विवक्षिता राम
र्थप्रकाशनात्। तथा च तादृशज्ञानहेतुतायां लौकिकत्वस्यानिवेशे नासंनिकृष्टा
दिहेतुस्थलेऽलौकिकतज्ज्ञानसंभवेन नानुपपत्तिरित्याशयः। उक्तार्थे अत्र वदंति
दीधितिकारेणोक्तरीत्या व्याख्यानमनुमितिहेतुत्वादित्यत्र न कृतं तद्व्यवहारहे
तुत्वाच्चेति ग्रंथस्य लाघवानुरोधेनात्रैव कृतं वस्तुतस्तु अनुमितिहेतुत्वादिति मूला

त्सर्वस्मुपाध्यभाववत्त्वप्रकारकज्ञानत्वेनेति पूरणीयं उपाधिस्मरणादित्यादौ सहित
त्स्येत्यंतं कारणप्रदर्शनपरमेव तद्व्यवहारहेतुत्वादिति वृहद्यांतार्थमिति त्वे कुरीत्वे
वमूलव्याख्यानं साध्विति। अतिप्रसंगः नवेव मित्यादिनोक्तातिप्रसंगः एवमाका
रकेति उपाधिर्नास्तीत्याकारके त्यर्थः अस्येवेति तथा च सहचारदर्शनगम्यत्वानु
माने स्वरूपासिद्धिरिति भावः। दीधितावधिकापेक्षां भूयोदर्शनापेक्षां। ननु व्या
प्तित्वेन व्याप्तिज्ञाने भूयोदर्शनापेक्षायामेव स्वरूपासिद्धिरस्त्वेवेत्यत आह व्या
ख्यायां व्याप्तिस्वरूपेति अधिकापेक्षा भूयोदर्शनापेक्षा व्याप्तिस्वरूपस्यैव सहचार
दर्शनगम्यत्वादिति भावः। नन्वेवं व्याप्तित्वेन व्याप्तेर्भूयोदर्शनगम्यत्वस्यैव
नैयायिकाभिमतत्वान्न तन्मतखंडनासिद्धिरत आह नैयायिकेति तद्ग्रह एवत
द्ग्रहेपि अवधारणार्थको वा एवकारः तथा च व्याप्तिस्वरूपे सहचारदर्शनगम्यत्व
स्य व्यवस्थापने न तन्मतखंडनसिद्धिरिति भावः एतदनंतरं अन्योपाधिकः संबंधो

व्याप्तिः तत्संशयो यदि धूमो वह्निसमानाधिकरणो न वा उपाध्यभावविशिष्टवह्निसमानाधि
करणो न वेत्याकारस्तत्राद्यसंशयापादने किंविधमानम् इति मूलमसंगतमितीशा
यस्मात्तत्समाधानं द्वितीयसंशयाभावापादनपरत्वेन मूलमुपपादयितुं विक
ल्पयति व्याप्तिस्वरूपइत्यादिना द्वितीयसंशयाभावापादनमपि उपाधिस्मरणा
दिसम्यधाने चेत्तदा किंविधमनिमित्तिमूलमसंगतं तदसम्यवधाने चेत्तु यद्वेत्या
दिमूलासंगतिरतस्तदपि विकल्पयति। द्वितीयमिति पाठः तत्र धूमो वह्निसमा
नाधिकरणो न वेति अत्र वह्निसमानाधिकरणत्वे न वस्तुगत्योपाध्यभाववि
शिष्टवह्निसामानाधिकरण्यमेव विषय इति ध्येयं आद्यसंशयाभावापादनेन
न्वेवमित्यादिनेत्यादिः व्याप्तिस्वरूपसंशयात्मकाद्यसंशयाभावापादनेइति
तदर्थः। एवमग्रेपि मूलं समाधानपरं मूलं असंगतमिति प्रथमदर्शनोत्तरं व्या
प्तिस्वरूपसंशयाभावस्य सर्वसिद्धत्वात्तदापादने इष्टापत्तिरूपसमाधानस्यत

राम

मूलाहत्वाभावादितिभावः। ननु व्याप्तिस्वरूपसंशयाभावोपपादनं समाधातुं स्व
यमित्यादि। द्वितीयसंशये ति निरूपाधिसंबंधत्वरूपव्याप्तित्वेन व्याप्तिसंशयात्मक
द्वितीयसंशयेऽस्यार्थः। उपाधिस्मरणादिसमवधाने चेत्। तदनंतरोत्पन्नप्रथमद
र्शनोत्तरं चेत् असंगतं तत्र योग्यानुपलब्धिसत्वेन निरूपाधिसंबंधत्वरूपव्या
प्तित्वप्रकारकनिश्चयसंभवेन समानप्रकारकनिश्चयाभावेन संशयोत्पादानुप
पत्तेः इत्याकारकस्य तन्मूलकस्य प्रथमसमाधानस्यासंभवादितिभावः तत्सम
वधाने चेत्। उपाधिस्मरणाद्यसमवधानानंतरोत्पन्नप्रथमदर्शनोत्तरं चेत् द्विती
यसंशयाभावोपपादनमित्यनुपपत्तेः। तदेतिदोषः मूलासंगतिरिति विरोधिनि
श्चयकालीनार्थसंशय एव प्रामाण्यसंशयस्यापेक्ष्यत्वेन तदानीं चोक्तव्याप्तित्व
प्रकारकनिश्चयासंभवेन सहजत एव तत्प्रकारकसंशयसंभवेन प्रामाण्यसंशय
मभ्युपगम्य तदुपपादनरूपस्याद्वैत्यादि द्वितीयसमाधानस्यासंभवादिति भावः।

तदपि द्वितीयसंशयाभावापादनमपि । अत्रानौपाधिक इत्यारभ्य द्वितीयमित्यंतग्रंथः । क्व
पुस्तके ऽनोलिखितो दृश्यते । उपाधिस्मरणादिकं विनासंबंधग्रहे व्याप्तित्वप्रकारकसंश
याभावापादने तदानीं विरोधिनिश्चयाभावेन व्याप्तित्वप्रकारकसंशयसामग्रीसंघट
नेन संशयोपपादनमेव समाधानेन तच्च किं विद्यमान इत्तिमूलानन्वय मिति तद
संगतेराह दीधितौ तथा चेति मात्रपदव्यवच्छेद्यमाह न त्विति तदानीं योग्यानुपल
ब्धेरभावादिति भावः मूलसंगतिमाह व्याख्यायां मूले चेति । साधारणधर्मेत्युपा
धिमत्वेनाज्ञाततत्त्वरूपसाधारणधर्मस्यार्थः दर्शनादीति आदिना विशेषादर्श
नपरिग्रहः । संशयेति व्याप्तित्वप्रकारकसंशयेस्यार्थः एतत्त उपाध्यग्रहमात्रं एवं
च मूले शंकापदं कार्यप्रदर्शनमुखेन कारणीभूतशंकासामग्र्युपलक्षकमिति ध्येयं
दुर्घट इति तन्निश्चयसामग्रीविरहादिति भावः स्वारस्यमेव शंकासमाधानाभ्यां वि
शदयति व्याप्तीत्यादिनामूलार्थ इति व्याप्तिभ्रमविषये तत्स्वीकारे सत्येवान्यत्रापि तदा

राम

पादनेऽर्थात्सर्वत्र तत्सत्त्वे भ्रमापादनस्य पर्यवसानादिति भावः चरमोक्तावगत इत्यस्य
प्रथमतो व्याख्याने बीजमाह अवगतत्वस्येत्यादिना अनवगतत्वस्याविवक्षणे ना
श्रुतस्यास्मिन्नित्यस्य पूरणं प्रत्याख्याने लाघवमित्याधेनानुचितमत आह अवगतत्व
ज्ञानस्येति अवगतत्वपर्यन्तानामेवानुमितेरनुभवात्प्रथमतस्तद्ग्रहणमासंभ
वादेवेति भावः केचित्तु व्यभिचारिसाधारण्यवारणायावगतत्वस्य स्वरूपकथन
मात्रत्वमुक्तमिति वदन्ति तन्तुच्छं व्यभिचारज्ञानाभावकाले एव तत्तादृशज्ञानसं
भवेन तदनुमितेरिष्टत्वेन तत्साधारण्यस्यादोषत्वात्। आहेति अतद्रूप्यादिः मह
तो रूपादिनेति अयमत्र संक्षेपः अभावप्रत्यक्षे योग्यमात्रप्रतियोगिकत्वं न तन्त्रं
किंतु योग्यानुपलम्भः तथा च महावायुं पक्षीकृत्य पक्षवृत्तिमहत्त्वविशिष्टोद्भूत
रूपवत्त्वमापादकीकृत्योद्भूतरूपवत्त्वोपलम्भस्यैव योग्यत्वे वन्हौ योग्यताविशि
ष्टतादृशप्रतियोगित्वमापादकीकृत्य तदनुपलम्भापादनसंभव इति पक्षावृत्ति वि

भवानं॰सी

68

शेषणं । विरोधिततप्रतियोगिसत्त्वापादककापत्तियोग्यप्रतियोगिकप्रतियोग्युपलंभा-
भावरूपयोग्यानुपलंभसत्त्वेन तादृशप्रतियोगित्वतद्वतोरसंबंधान्योन्याभावो
नायोग्यो न च द्वयोरप्ययोग्यत्वेन तद्विशेष्यकत्वद्रूपाभावप्रत्यक्षं न संभवतीति वा-
च्यं । वायुघटेऽनोद्भूतरूपस्य वायुविशेषणकोद्भूतरूपाभावविशेष्यकप्रत्यक्षस्यैवांगी-
कारात् । वायवीयपरमाण्वादौ व्यभिचारात् महत्त्वयोग्यत्वयोर्वायुवद्विशेष-
णतयोपादानं । न च वायवीयत्वयोग्ययोर्वस्तुगत्यापादकाभावेप्यापन्नावा-
हार्यापादकत्वतज्ज्ञानस्यैव हेतुत्वात् तदुभयोस्तत्संभवे तदेतद्रूपाभावतादृशप्र-
तियोगित्वाभाववतोः प्रत्यक्षापत्तिरिति वाच्यं । वैशिष्ट्यनियामकसामानाधिकरण्य राम
घटकसंबंधेन यत्रापादकाविशेषणं तत्र तद्विशेषणवत्प्रत्यक्ष एवाभावप्रत्यक्षोप-
गमेन तदुभयोस्तद्विशेषणवृत्त्याभावेन तत्र तादृशाभावप्रत्यक्षापत्त्यभावात् । वा-
य्वादौ व्यभिचारेण महत्त्वादिविशेषणविशिष्टस्यापि रूपसत्त्वस्य रूपोपलंभाभावा

मत्वाद्रूपसामान्याभावेन प्रत्यक्षत्वमित्यत्रेतल्लाभायोक्तमिति। नन्वेवमपि इदंपदं निरुक्तावधे
यं यत्र यद्विद्यमानमपि वह्नित्व इत्यादि यदीयत्वमिति ग्रंथविरोधः योग्यत्वविशि
ष्टं स्व धूमवह्निः त्रिषु भावप्रतियोगितावच्छेदकत्वसत्वस्य तादृशावच्छेदकत्वो
पलंभादेकत्वसंभवादिति चेन्न अभावदेशाविप्रकर्षादिना स्वात्मकाभावेन तत्र
त्र प्रत्यक्षस्याभावाद्व्याप्यसंभवः इत्यत्र तद्ग्रहणं स्वपदे ... विरोधात्। अधिकं तत्रैव वक्ष्या
मः मूले एवं तद्वह्नि न धूमयोरिति अत्रेदं चिंत्यं स्वोक्तेर्येन तदूषणं संभवति तत्र व्या
प्ति स्वरूपमात्रस्य सकृद्दर्शनगम्यत्वं स्वमते संभवतीति वाच्यं। २ तद्वह्निनाम
मितत्वसंभवात्। यत्तु व्याप्तित्वेन व्याप्तेः सकृद्दर्शनगम्यत्वमपि स्वे तद्वह्निनामा
शाय इति तन्मते एवेतदूषणमिति तत्र तादृशाशयस्य शापथनिर्णेयत्वादिति।
तादृशाभावप्रतियोगितावच्छेदकत्वाभावस्य तु ग्रहत्वात्तदीयत्वेतो
प्रतियोगितासामान्येनेत्यर्थेति। अन्योन्याधिकत्वमिति शेषः तेनानाधिकरण

स्वरूपमेवेति नपुंसकलिंगत्वानुपपत्तिः अन्योपाधिकत्वरूपव्याप्यत्वप्रवेशे आत्माश्र
याद् इत्याशंकायां तद्व्याप्यत्वमिति। कूटस्येति धूमवान्वह्नेरित्यादौ साधनाव्या
पकहृदत्वादिव्याप्यत्वाभावस्य धूमादौ सत्त्वेन कूटनिवेशस्यावश्यकत्वादिति
भावः अवच्छेदकत्वस्थले इति साध्यतावच्छेदकावच्छिन्नप्रकारतायां साधनाव्यापक
व्याप्यतावच्छेदकावच्छिन्नप्रकारताभिन्नत्वविशेषणे न स्वार्थः उपपादनीय मिति अ
न्यथा विशिष्टस्यानतिरिक्ततया वह्नित्वे पि तादृशव्याप्यतावच्छेदकत्वाभावासं
भवादिति भावः द्विविधोपाधेरिति अंतर्गतत्वं सख्यर्थः प्रथमोपाध्यन्तःपीतत्र अ
न्योपाधिकत्वं प्रयोजनं विना तद्दर्शनमेवानुचितमत आह व्याप्तेरिति हेतुनिष्ठावे राम
ति प्रथमोपाध्यभावघटितस्य साध्यनिष्ठत्वादिति भावः साधनतावच्छेदकाति
रिक्तेति सावधारणं तथा च प्रमेयावच्छिन्नहेतुकेऽप्रसिध्याविशेष्यदले साध
नतावच्छेदकातिरिक्तेति नदेयं तथा सत्यात् साधनतावच्छेदकानवच्छिन्नत्वे सतीति

अभिप्रेत्येति अन्यथा वह्निमान् प्रमेयधूमादित्यादावव्याप्यापत्तेरिति भावः इतरथा तु
गुरुसाधारणावच्छेदकत्वस्य लघुसाधारणघटकत्वेन प्रथमोपाध्यभावघटितमेवा
न्तेऽपाधिकत्वं स्यादिति हेतुनिष्ठत्वान्तोपाधिकसंबंधरूपत्वयोस्संगमनेन परिष्कृत्याह
साधननिष्ठेत्यादिना वस्तुतस्तु द्वितीयस्यैवायं निष्कर्षः तथा हि साधनतावच्छेदको
तिरिक्तो यस्साधनाव्यापकतावच्छेदकरूपावच्छिन्नेत्यर्थः अवच्छेद्यत्वं चानूनवृ
त्तित्वरूपावच्छेदकतानिरूपकत्वरूपं व्याप्यत्वपर्यवसन्नं तच्च न तदवच्छेद्यावृत्तित्वं न च तत्त्वं
च सामानाधिकरण्येन तच्चायं तच्च तत्स्वघटितनियामकतया न संभवतीति सा
मानाधिकरण्यवत्त्वपर्यवसितमित्याशयेनाह साधननिष्ठेत्यादि साध्यसंबंधे
तत्त्वावच्छेदेन सामानाधिकरण्यव्याप्यत्वेति सामानाधिकरण्यसंबंधेन ता
दृशावच्छिन्नवदवृत्तित्वरूपव्याप्यत्वेत्यर्थः व्याप्यत्वं चाधिकरणं तद्भाववेन
बोध्यं। एवं च साधननिष्ठसाध्यसंबंधितेना दृशव्याप्यतावच्छेदकत्वाभावपर्यव

भवानं·सी०

70

सानंते तेन तत्पूर्वोक्तरीत्या वह्निमान् धूमादित्यादावव्याप्तिः तादृशव्याप्यत्वनिवेशान्न द्रव्यं
पृथिवीत्वादित्यादावप्रसंगः एतेन जातिमान् सत्तादित्यादौ सत्त्वनिष्ठसाध्यसामा
नाधिकरण्यवृत्त्यसत्ताव्यापकतावच्छेदकगुणविशिष्टत्वाद्यवच्छिन्नसामानाधिकरण्य
व्याप्यत्वादेरप्रसंगत्वमित्यपि परास्तं वाच्यः अनौपाधिकसंबंधो वाच्यः अत्रेदं बो
ध्यं। द्विविधो व्याप्यभावघटितमपि लक्षणद्वयं विशिष्टानुयोगिकाभावांगीकारे
ण अन्यथा साधननिष्ठसाध्यसंबंध इत्यस्य साधनवृत्तित्वविशिष्टसाध्यसंबंधाप्र
कृतयाऽसंगत्यापत्तेः तदनंगीकारे तु प्रथमे साधनसंबंधे तादृशव्याप्यत्वविशि
ष्टयत्साध्यवत्प्रतियोगिकत्वं तदभावस्तादृशव्याप्यत्वसाध्यवत्प्रतियोगिकत्वोभ
यथाभावो वा निवेश्यः द्वितीये च साधनसंबंधे साधनतावच्छेदकानवच्छिन्नघटत्ववि
शिष्टावच्छेदघटत्वविशिष्टसाध्यवत्प्रतियोगिकत्वाभावस्साधनतावच्छेदकानवच्छेद्य
त्वावच्छेद्यघटत्वसाध्यवत्प्रतियोगिकत्वे सत्त्वित्यभावो वा निवेशनीयः वैशिष्ट्यं च सा

राम

सामान्याधिकरण्यसंबंधेनेति हेधितावच्छेदकत्वाभावोपीति अधिकरणस्वरूपमेवेत्यर्
ष ज्यते । उपाधेरयोग्यस्यापीति इदमुपलक्षणं । अभावदेशाविप्रकर्षादिनोपाधित्व
ग्राहकाभावाद्व्याप्यत्वसिद्धेरवं । सिद्धसिद्धिभ्यामित्यादिनोपाधित्वविशिष्टाभावस्य ल
क्षणे निवेशप्रसक्तेश्चेत्यादुपाधिसामान्येत्यादिकमसंगतमतस्तद्वतारिरिको
कार्याभिप्रायेण व्याचष्टे व्याख्यायां साधनाव्यापकस्येति । तज्ज्ञप्यतात्पर्यार्थेति व्य
वहारहेतुत्वाद्वेति ग्रंथस्य तात्पर्यार्थं पूर्वमुपवर्णितेदृत्तिशेषः मूलोक्तहेतुस्वे
ति यद्वोक्ताभित्वादिनातद्व्यवहारहेतुत्वाद्व्याप्यत्वेनोक्तमर्थं मन्दधतत्रयतप्पापीत्या
दिमूलोक्तं दूषणं तस्येत्यर्थः यथाश्रुतयितीति तथाचोपाध्यभाववत्त्वप्रकारक
ज्ञानस्यानुमितिहेतुत्वमिति पूर्वोक्तविकल्पेतु किं चेत्यादिनोक्तमेव दूषणं द्रष्टव्य
मिति भावः अत्र केचित्तद्व्यवहारहेतुताव्याप्त्यस्य पूर्वमेवोपाधिस्मरणे सती
त्यादिनानुमितिहेतुतादिस्यं तेनोपाधियोग्यानुपलंभस्यानुमितिहेतुत्वस्याभि

भवानंदी टी.

धानायथाश्रुतस्यैवस्याप्यनुक्तिसंभवएवेति नोक्तमित्याह यथाश्रुतमिति ग्रंथव्याख्यानं
तुक्तं किंतु यच्चोक्तमिति मूलस्यपन च प्रतियोगिज्ञानमधिकरणज्ञाने कारणं उपाध्य
भावव्यवहारस्तु तन्नियममपेक्षते इत्यनेन पूर्वं यदुक्तमित्यर्थः तत्र च तत्त्वापीत्यादि
ना मूलकृदुक्तमानं दूषणं न संगच्छते तदुक्त्यनंतरं नचैवमित्यादिनाशंक्योपाधि
स्मरणे सतीत्यादिनानुमितिकारणकथनेनानुमित्यापादनस्य दूरीकरण इ
त्याशयवानाह यथाश्रुतमिति ग्रंथमतएव यथाश्रुतं तथा दूषयतीत्यर्थः तथा च
नचैवमित्यादिनापूर्वमुक्तं तत्प्रतिसंधायैवेदं दूषणमुक्तमिति भाव इति प्राहुः ॥ राम
॥ ॐ ॥ ॥ इति श्रीमन्महादेवरचिते भवानंदीप्रकाशे व्याप्तिग्रहोपायपूर्वपक्ष
प्रकाशः ॥ ॥ शुभं भूयात् ॥ ॥ इदं पुस्तकं बालमुकुंदभट्टस्येदम् ॥ ॥
काशीवासी मालई विप्र मिश्र गनराम से पनगर मे रहत है सपन नगर विश्राम ॥